प्रबन्धप्रकाशः

(प्रथमो भागः)

अर्थात्

संस्कृतनिबन्धरचनाप्रक्रियायाः प्रदीपकः संस्कृतनिबन्ध-
रत्नानां सुभाषितरत्नसंदोहस्य च समुल्लासैः
समुपेतो ग्रन्थः

स च

'तुलनात्मकभाषाशास्त्र', 'ऋग्वेदप्रातिशाख्यव्याख्या' प्रभृतिग्रन्थाना
निर्मात्रा, नैकप्राचीनग्रन्थाना सपादकेन, भारतीयसविधानस्य
(उत्तरार्धस्य) संस्कृतानुवादकर्त्रा, प्रिंसिपल, गवर्नमेण्ट
सस्कृत कालेज, बनारस, सुपरिन्टेन्डेन्ट ऑफ सस्कृत
स्टडीज, यू० पी० इत्यादिपद च पूर्वमधिष्ठितवता

विद्यामार्त्तण्ड (का० वि०)


डाक्टर श्रीमङ्गलदेव शास्त्री,

M A, M. O L., D Phil (Oxon)

इत्येतेन विनिर्मितः

२००६ वै० (सन् १९५२)

नवमं सस्करणम्] [मूल्यम् ३)
१०००



प्रकाशक
के० मित्रा
इण्डियन प्रेस, लिमिटेड,
इलाहाबाद।

प्रथमं संस्करणम्	१९३० ई०
द्वितीय संस्करणम्	१९३२ ई०
तृतीय संस्करणम्	१९३५ ई०
चतुर्थ परिवर्धित संस्करणम्	१९३८ ई०
पञ्चम परिवर्धित संस्करणम्	१९३९ ई०
षष्ठ संस्करणम्	१९४१ ई०
सप्तम परिवर्धित संस्करणम्	१९४२ ई०
अष्टम परिष्कृत परिवर्धित च संस्करणम्	१९४७ ई०
विशेषत. परिष्कृत परिवर्धित च नवम संस्करणम्	१९५२ ई०

मुद्रक
श्री अमलकुमार बोस,
इण्डियन प्रेस, लिमिटेड,
बनारस ब्राञ्च।

महामहोपाध्याय श्री० प० गोपीनाथ कविराज, एम० ए० (Late Principal, Government Sanskrit College, Banaras, and Superintendent of Sanskrit Studies, U P)

महोदयाना सम्मति.—

गवर्नमेट सस्कृत कालेज,

बनारस

प्राचामभिनवाना च विदुषा गीर्वाणभाषयोपनिबद्धान् निबन्धान् तत्तद्विषयभेदगर्भितान् सगृह्य सकलितोऽय प्रबन्धप्रकाशो नाम ग्रन्थो डा० श्रीमङ्गलदेवशास्त्रिणा । सोऽय वस्तुवैचित्र्येण गुम्फनसौष्ठवेन च श्लाघनीया लेखसरणिं प्रदर्शयन् सचेतसां मनसि मोदमादधानो देवभाषाया रचनापाटवमधिजिगमिषूणां विद्यार्थिनां भृशमुपकरिष्यतीति संभावयन्तो ग्रन्थस्यास्योपादेयत्वे श्रद्दधाना वयं शतशो धन्यवादैर्ग्रन्थकर्तॄन् सभाजयामः ।

२० । ८ । १९३० }

कविराजोपाह्वगोपीनाथशर्माणः
अध्यक्षाः

विद्वद्वर्य श्री डा० लक्ष्मणस्वरूप, एम० ए०, डी० फिल०,
(भूतपूर्व प्रिंसिपल, ओरिएटल कालेज, लाहौर)
महोदयाना

सम्मतिः—

I have looked through the Prabandha Prakāśa of Dr M. D Shastri It is a collecion of essays in Sanskrit on various subjects Written in easy simple Sanskrit and replete with apt quotations from classical authors, it is suited to the needs of Sanskrit students of Oriental Title Examinations I believe, it is the only book of its kind and will supply a long-felt want I hope, the author will get the encouragement he deserves so well

LAKSHMAN SARUP,
M A, D. Phil (Oxon).
University Professor of Sanskrit,
University of the Punjab, Lahore.

11th June, 1930

सुप्रसिद्ध श्री० पं० ईश्वरीदत्तदौर्गादत्ति शास्त्रि, एम० ए०, एम० ओ० एल०, (Late Superintendent, Sanskrit Studies, Bihar and Orissa) महोदयैः कृत

प्रबन्धप्रकाशशुभाशंसनम्

विद्याभिरनवद्याभिर्विविधाभिर्विभूषितैः ।
कविताकान्तकान्तार-केलिलालसमानसैः ॥ १ ॥
प्रज्ञाऽऽकरैः परद्रोहदिवाभीतदिवाकरैः ।
श्रीमन्मङ्गलदेवाख्यशास्त्रिभी रचितः शुभः ॥ २ ॥
सहजैरपि सश्रीकैः सरसैः सरलैरपि ।
मितैर्मतैश्च महितः शब्दैः सस्कारशालिभिः ॥ ३ ॥
पदे पदे प्रशसार्हैरस्पृष्टैः पुनरुक्तिभिः ।
युक्त्या समर्थितैरर्थैः प्रापितः स्पृहणीयताम् ॥ ४ ॥
सुभाषितैश्च सुरभिर्भव्यैर्भावैर्विभूषितैः ।
रीत्या रञ्जनमञ्जर्या मञ्जुता काञ्चिदञ्चितः ॥ ५ ॥
विद्यार्थिचातकव्रात-नीलनूतननीरदः ।
अध्यापकपिकाना चानन्तो वासन्त उत्सवः ॥ ६ ॥
विद्वद्वृन्दमिलिन्दानामरविन्दवनं नवम्
दिव्यवाङ्मयसङ्कोचभुजङ्गमभुजङ्गभुक् ॥ ७ ॥

लेखदुर्बलताऽऽवर्त-परीक्षातटिनीतरीम् ।
रचनाचातुरी चार्वी गीर्वाणगिरि चार्पयन् ॥ ८ ॥
निबन्धोऽयं सदा भूयाद् भावबन्धाय धीमताम् ।
भारते वसतामन्तेवसतां च विभूतये ॥ ९ ॥

ईश्वरीदत्तदौर्गादत्तिः ।

FOREWORD

My friend and former pupil, Dr. Mangal Deva Shastri, has put together what I am sure will prove a very useful little book on Essay-writing in Sanskrit The majority of the essays given as examples are written by himself in an excellent natural style Others selected from standard authors or from contemporary writers have been judiciously chosen At the end of the book there are some useful collections of quotations and pithy sayings that can be used to adorn an essay or to provide subjects for others

August 1930

A C WOOLNER
Vice-Chancellor, University
of the Punjab, Lahore,

विषय-सूची

मातृभूमेरभिनन्दनम् १-२
ऊपर के अभिनन्दन का हिन्दी अनुवाद ३-४
ग्रन्थसमर्पणम्

[उल्लास १]

पृष्ठत.

उपोद्घात १

प्रबन्धाः

[उल्लास २]

१ समयस्य सदुपयोगः १२
२ मित्रता १४
३ यदि सन्ति गुणा. पुंसां विकसन्त्येव ते स्वयम् . १६
४ दीर्घौ बुद्धिमतो बाहू १८
५ ज्ञानं भार. क्रियां विना २०
६ द्विषन्ति मन्दाश्चरितं महात्मनाम् . २३
७ कुमुदाकरेण शरदिन्दुचन्द्रिका . २५
८ दैवं हि दैवमिति कापुरुषा वदन्ति .. . २७
९ तीर्थयात्राया लाभा' ... ३०
१० वरमद्य कपोत' श्वो मयूरात् . ३२
११ मर्कटस्य सुरापानं ततो वृश्चिकदंशनम् .. ३६

१२ उद्योग ३८
१३ भगवती भवितव्यता ४३
१४ धैर्यम् ४७
१५ इन्द्रजालमञ्जूषा ५१
१६ पुरुषार्थचतुष्टयम् (उपमितिभवप्रपञ्चाख्यकथाया) ६१
१७ परोपकार. ६७
१८ का हि पुङ्गगाना तेषा येऽन्यशिक्षाविचक्षणा ७१
१९ सत्सङ्गति (आर्यशूरविरचितजातकमालाया) ७५
२० इयमुदरदरी दुरन्तपूरा ९७
२१ धर्म १०४
२२ क ईप्सितार्थस्थिरनिश्चय मन प्रतीपयेत् १०८
२३ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसशया. ११२
२४ नैष्ठिकाना सत्पथीना मति ११५
२५ व्रतपालनम् (म० म० श्रीविधुशेखरभट्टाचार्यमहोदयस्य) ११९
२६ कन्यापितृत्वम् (म० म० श्रीविधुशेखरभट्टाचार्यमहोदयस्य) .. १२४
२७ गीर्वाणवाण्या अभ्युदयोपाया . १२९
२८ कोकिल तावद्दिवसान् यापय दिवसान्वनान्तर निवसन् . १४८
२९ अयि दलदरविन्द ! १५३
३० पुराणेषु विकासवाद (महामहोपाध्याय श्री पं० गिरिधरशर्मचतुर्वेदस्य) १५९

पृष्ठतः

३१ वाराणसीवैभवम् (महामहोपाध्याय साहित्याचार्य-
श्रीनारायणशास्त्रिखिस्तेमहोदयस्य) १७०
३२ भगवतो बुद्धस्य चरितमुपदेशश्च (म० म० श्री-
गोपीनाथकविराजमहोदयस्य १८१
३३ अेद्याना सस्कृतपठनपाठनप्रणाल्या स्थानम् १९२
३४ भारतीयसस्कृति २०२
३५ कृत्स्नो हि लोको बुद्धिमतामाचार्यः, अथवा, संस्कृतज्ञेषु
लोकप्रगतेर्लोकावस्थितेश्चोपेक्षा .. २१६
३६ शिक्षाया प्रधानमदृश्यम् .. २२३
३७ भारतीयसस्कृतौ स्त्रीजातेः स्थानम् . २३१
३८ अस्माक तीर्थानि २३४
३९ साप्रदायिकथसहिष्णुता तत्प्रतीकारश्च २३८
४० गीताया कर्मणो यज्ञस्य च स्वरूपम् २४२
४१ जैनविद्वास संस्कृतसाहित्य च . २४८

[उल्लास ३]

१ कृशे कस्यास्ति सौहृदम् ? २५२
२ आर्जव हि कुटिलेषु न नीति . २५३
३ ज्यौतिषशास्त्रस्य महत्त्वम् .. २५४
४ दानम् ... २५६
५ न कूपखनन युक्त प्रदीप्ते वह्निना गृहे .. २५८

६ हार वक्षसि केनापि दत्तमज्ञेन मर्कट २६०
७ परीक्ष्यकारिणो हि कुशला भवन्ति ... ...
अथवा
संस्कृतज्ञेषु वस्तुतत्त्वज्ञानस्येपेक्षा २६२
८ अशनेरमृतस्य चोभयोर्वशिनश्चाम्बुधराश्च योनय. .. २६६
९ अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिता . २६८
१० स्त्री-शिक्षा २७०
११ भारतीयार्यधर्मस्य आशावाद २७२
१२ अयोध्यापुरीवर्णनम् ... २७६
१३ प्रगतिवादो रूढिवादश्च .. २७८
१४ सीताया भक्ते. स्वरूपम् . . २८२
१५ जीवेम शरदः शतम्। भूयश्च शरद. शतात् ... २८६

[उल्लास' ४]

सुभाषितरत्नसन्दोहः

१ सुभाषितपद्यावली २९५
सुभाषितपद्यावल्या विषयसूची ... ३१२
२ सुभाषितपद्यखण्डमाला ३१५
३ सुभाषितगद्यावली ३२८
४ वैदिकसूक्तिमञ्जरी ३३६
५ लौकिकन्यायाञ्जलि ३४९

मातृभूमेरभिनन्दनम्

卐 सा नो माता भारती भूर्विभासताम् । 卐

येयं देवी मधुना तर्पयन्ती
तिस्रो भूमीरुद्धृता द्योरुपस्थात् ।
कामान् दुग्धे विप्रकर्षत्यलक्ष्मी
मेधां श्रेष्ठां सा सदास्मासु दध्यात् ॥ १ ॥

सर्वे वेदा उपनिषदश्च सर्वा
धर्मग्रन्थाश्चापरे निधयो यस्याः ।
मृत्योर्मर्त्यानमृतं ये दिशन्ति वै
सा नो माता भारती भूर्विभासताम् ॥ २ ॥

यां प्रच्युतामनु यज्ञाः प्रच्यवन्ते
उत्तिष्ठन्ते ते भूय उत्तिष्ठमानाम् ।
यस्या व्रते प्रसवे धर्म एजते
सा नो माता भारती भूर्विभासताम् ॥ ३ ॥

यां रक्षन्त्यनिशं प्रतिबुध्यमाना
देवा ऋषयो मुनयो ह्यप्रमादम् ।
राजर्षयोऽपि ह्यनघाः साधुवर्याः
सा नो माता भारती भूर्विभासताम् ॥ ४ ॥

महान्तोऽस्यां महिमानो निविष्टा
देवा गातुं यां क्षमन्ते न सद्यः ।
सा नो वन्द्या भ्राजसा भ्राजमाना
माता भूमिः प्रणुदतां सपत्नान् ॥ ५ ॥

अभिनन्दनमिदं पुण्यं
दिव्यभावैः समर्हितम् ।
मातृभूमेः पठन्नित्य-
मात्मकल्याणमश्नुते ॥*॥

हिन्दी अनुवाद

भारतीय संस्कृति की दृष्टि से मातृभूमि का अभिनन्दन

विश्वप्रसिद्ध हमारी मातृभूमि भारत देदीप्यमान हो !

१—द्युलोक से अवतीर्ण, तीनो लोको को दिव्य माधुर्य से आपूर्ण करनेवाली, अभिलषित कामनाओ को देनेवाली तथा दु:ख-दारिद्रय (अलक्ष्मी) को हटानेवाली, देवीस्वरूपिणी भारत-माता सद्विचारो की साधना मे हमारी सहायक हो।

२—मनुष्यों को मृत्यु से हटाकर अमृतत्व की प्राप्ति का उपदेश देनेवाले समस्त वेद, उपनिषद् तथा अन्य (बौद्ध, जैन आदि) धर्म-ग्रन्थ जिसके निधि-स्वरूप है, वह विश्वप्रसिद्ध हमारी मातृभूमि भारत देदीप्यमान हो !

३—जिसका अपकर्ष ससार मे धर्माचरण के अपकर्ष का कारण होता है, जिसके उत्कर्ष मे धर्माचरण का उत्कर्ष निहित है, जिससे धर्म की प्रेरणा प्राप्त होती है, वह विश्वप्रसिद्ध हमारी मातृभूमि भारत देदीप्यमान हो !

४—देवगण, ऋषि, मुनि, राजर्षि और पवित्रात्मा सन्त-महात्मागण सावधानता तथा तत्परता से जिसके लोक-कल्याणकारी

स्वरूप की निरन्तर रक्षा करते आये है, वह विश्वप्रसिद्ध हमा
मातृभूमि भारत देदीप्यमान हो !

५—जिसकी महिमा महान् है, देवगण भी जिसके स्वरूप व
गान नहीं कर पाते, समुज्ज्वल तेज से देदीप्यमान वह सर्व-लोव
वन्दनीय हमारी मातृभूमि अपने विरोधी शत्रुओं का शम
(निराकरण) करनेवाली हो ।

(मङ्गलदेव शास्त्री 'मेधातिथि')

——

ग्रन्थसमर्पणम्



ग्रन्थकर्त्रा विनीतेन पित्रोर्देवस्वरूपिणोः ।
समर्प्यते पदद्वन्द्वे सद्ग्रन्थकुसुमाञ्जलिः ॥

प्रबन्धप्रकाश:

(प्रथमो भाग:)

—:०—

उपोद्घात:

जयत्यमन्दमादधन्मुद मन सु सन्ततम् ।
सतामुदात्तकर्मणा निरञ्जन: पर प्रभु ॥

प्रबन्धरचनाया: स्वरूपम्

अथात. प्रस्तूयते प्रबन्धरचनाया प्रक्रियादिविषयमधिकृत्य किञ्चिद्वक्तुम् । प्रबन्ध., प्रस्ताव, रचना, सदर्भ, निबन्ध इत्येते शब्दा. समानार्थत्वेनैवाद्यत्वे व्यवह्रियन्ते । तत्रैतै शब्दैरस्मिन् प्रसङ्गे किमभिप्रेयत इति प्रश्ने संक्षेपत एवमेव वक्तव्य यत् कमपि प्रतिपाद्यविषयमवलम्ब्य तत्स्वरूपोपयोगमहत्त्वादिप्रदर्शनपुरःसरमुपपत्तिपूर्वक च हृदयग्राहिण्या भाषया तद्विषयकस्वाभिमतार्थप्रतिपादनमेव तदर्थ. ।

प्रबन्धरचनाया उपयोग:

प्रबन्धरचनाया अभ्यासस्य क उपयोग इति जिज्ञासायामुच्यते । प्रथम तावदस्योपयोग. स्वबुद्धिविकासार्थं भाषाया गतेर्दार्ढ्यार्थं च । तथा चास्मद्विचारशक्ते परिमार्जनं विकास.

परिपुष्टता च यथा प्रबन्धरचनाया अभ्यासेन जायते न तथान्येन केनाप्युपायेन। एव भाषाया गति प्रतिष्ठा च यथा प्रबन्धलेखनेन सुदृढा सम्भवति न तथान्यथा। द्वितीय, स्वविचारप्रचारार्थमप्यस्योपयोग। सार्वजनिकदृष्ट्यावश्यकानामुपयोगिना च तत्तद्विषयाणा सम्बन्धे स्वविचारप्रचाराय सामयिकपत्रादिषु प्रबन्धलेखनमेवात्युत्तमोऽभ्युपाय॰। इत्यादिकारणैरेवाद्यत्वे तत्तत्परीक्षासु प्रबन्धरचनाविषयस्य प्राय प्राधान्येन समावेश॰ कृतो दृश्यते। अस्मिन् प्रसङ्ग एतदप्यवधार्य परीक्षार्थिभिर्यत्प्रबन्धरचनाभ्यासो न केवल स्वविषय एव समुत्तीर्णतासाधनम्, किन्त्वन्यविषयेष्वपि भाषापाटवसाधकत्वेन महोपकारक।

अस्य विषयस्येतिहासः

सोऽय विषय आपाततो नवीनत्वेन प्रतीयमानोऽपि न हि वस्तुत सर्वथा नवीन। सत्य, प्राचीनसमये प्रबन्धरचनेतिविशिष्टनाम्ना नहि कश्चिद्विषय प्रायेण पठनपाठनविधेरङ्गमासीत्। तथापि प्राचीनदर्शनशास्त्रेषु तत्तदधिकरणरूपेण, नीत्यादिग्रन्थेषु कथाख्यायिकादिभि, पुराणेतिहासादिग्रन्थेषु तत्तद्दृष्टान्तसहकारेण च भिन्नभिन्नप्रकारैरेकार्थप्रतिपादन दृश्यत एव। धर्मशास्त्रादिविषयकानर्थानुद्दिश्य लिखिता प्राचीना "निबन्धा" प्रसिद्धा एव। कौटिलीयार्थशास्त्रे (अधिकरण १५), सुश्रुते (उत्तरतन्त्रेऽध्याय ६५), चरके (सिद्धिस्थानेऽध्याय॰ १२) च तन्त्रयुक्तिप्रकरणम्, पूर्वोत्तरमीमासयोरधिकरणस्वरूपप्रतिपाद-

कानि वाक्यानि[१], अन्येषु च शास्त्रेषु समानार्थप्रतिपादकानि वचनानि प्रकारान्तरेण प्रबन्धरचनाप्रक्रियाप्रतिपादकान्येव सन्ति। सत्यप्येवम्, अद्यत्वे विशेषरूपेण विशिष्टविषयत्वेन च प्रबन्धरचनाया विषयेऽवधान दीयत आधुनिकपठनपाठनपरिपाट्याम्। एतावदेवान्तर प्राचीननवीनपरिपाट्यो ।

प्रबन्धरचनायाः प्रकाराः

यद्यपि प्रतिपाद्यविषयाणामानन्त्यात् प्रबन्धकर्तृबुद्धिवैचित्र्याच्च कतिप्रकारा प्रबन्धा इति विशेषतो निर्देष्टु न शक्यते, तथापि सामान्येन त्रिप्रकारत्व तेषामभ्युपगम्यते—**निरूपणात्मका., आख्यानात्मका., आलोचनात्मकाश्चेति**[२] ।

तत्र कमपि चेतनमचेतनं वा पदार्थमधिकृत्य तत्स्वरूपादिनिरूपणपरा प्रबन्धा **निरूपणात्मका** (Descriptive Essays) इत्युच्यन्ते । यथा वननदीपर्वतोष कालसायङ्कालवायुयानादेर्निरूपणम्।

कामप्यैतिहासिकीं सामयिकीं वा घटना वृत्तान्त वाधिकृत्य तदाख्यानपरा प्रबन्धा **आख्यानात्मका** (Narrative Essays)

---

१ पञ्चम पृष्ठमत्र द्रष्टव्यम्।

२ अयमेव विभागो वस्तुवर्णनात्मका वृत्तान्तवर्णनात्मका विचारात्मकाश्चेति, यद्वा वस्तुमूलका वृत्तान्तमूलका विचारमूलकाश्चेति शब्दान्तरैरपि निर्देष्टु शक्यते।

इत्युच्यन्ते। यथा देशदेशान्तरतीर्थादियात्राया आत्मनोऽन्यस्य जीवनचरितादेश्च वर्णनम्।

कमपि गूढ विमर्शसापेक्षं च विषयमवलम्ब्यालोचनात्मकदृष्ट यथावश्यक पक्षप्रतिपक्षनिर्देशेन च तद्गुणदोषादिविवेचनप प्रबन्धा आलोचनात्मका (Reflective Essays) इत्युच्यन्

अस्मिन्विषये प्रविविक्षूणा दृष्ट्या सामान्यरूपेणैव ह्येष विभा प्रबन्धानामिति द्रष्टव्यम्। वस्तुतस्तु नैष ऐकान्तिको विभाग तथा च दृश्यते हि विभिन्नभाषासु प्रसिद्धलेखकाना प्रबन्धेष् भेदाना परस्पर सकरः संसृष्टिश्च।

प्रबन्धरचनायाः प्रक्रिया

तत्र निरूपणात्मकानामाख्यानात्मकाना च प्रबन्धाना वि नह्यत्र बहु वक्तव्यमपेक्ष्यते। प्रथम तावत्सस्कृतपरीक्षास्वालोच त्मका एव प्रबन्धाः प्रायेणापेक्ष्यन्ते। किञ्च द्वयोरप्याद प्रकारयोर्बहून्युदाहरणानि पुराणादिग्रन्थेषु महाकाव्येषु च दृश्य इत्यादिकारणैरत्र प्राधान्येनालोचनात्मकप्रबन्धानामेव विषये कि सक्षेपेणोच्यते।

आलोचनात्मकप्रबन्धरचनाया प्रक्रियाविषयेऽनेकानि प्र नानि नवीनानि च मतानि दृश्यन्ते। तेषु कानिचित् प्रदर्श्यन्ते।

पूर्वोत्तरमीमासाशास्त्रयोर्हि तत्तद्विषयकप्रबन्धानाम् अधिकरण-सज्ञा प्रसिद्धा। एकार्थप्रतिपादको विषयसशयपूर्वपक्षसिद्धान्तनिर्णया-त्मकपञ्चाङ्गबोधकवाक्यसमुदायो न्यायोऽधिकरणमिति हि पूर्वमीमा-साया तल्लक्षणम। तथा चोच्यते—

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।
निर्णयश्चेति सिद्धान्त. शास्त्रेऽधिकरणं स्मृतम्॥ इति।

"तत्र विचारार्ह वाक्य विषय। तस्यार्थविषये विशय इदमित्थ न वेति विकल्प। तत्र सदिह्यमानयो पक्षयोरसत्पक्षे युक्तिप्रदर्शन-वाक्य पूर्वपक्षवाक्यम्। पूर्वपक्षोक्ता युक्ति खण्डयित्वा सत्पक्षे युक्तिप्रदर्शनवाक्य सिद्धान्त। ततश्चेत्याद्यभिलापेन सिद्धान्त-सिद्धार्थोपसहारक वाक्य निर्णयकवाक्यमिति।" उत्तरमीमासाया तु "तत्रैकमधिकरण पञ्चावयवम्। विषय. सदेह सगति पूर्वपक्ष सिद्धान्तश्चेति पञ्चावयवा।" इति विशेष। (वाच-स्पत्येऽधिकरणशब्दोऽत्र द्रष्टव्य)। इत्येतदनुसार प्रबन्धरचनाया अपि विषयादीनि पञ्चाङ्गानीति युक्तम्।

यद्वा "प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवा:[1]" (न्यायसूत्रे १।१।३२) इति न्यायसूत्रोक्तविधया प्रबन्धाना प्रतिज्ञादि-पञ्चावयवात्मकत्वमपि प्रतिपादयितु शक्यते। एवमेवान्यान्यपि मतान्यत्र विषये दृश्यन्ते।

---

१ प्रतिज्ञाद्यवयवाना लक्षणादीनि तु न्यायसूत्र एव द्रष्टव्यानि।

परन्तु विषयभेदाद् लेखकाना रीतिवैचित्र्याच्च सभवत्यप्येतेषा सर्वेषामवयवानामनेकेषु स्थलेषु प्रबन्धरचनाया अङ्गत्वे नह्येकान्ततस्तेषा सर्वत्र समानावश्यकता। सर्वविधेष्वपि[१] प्रबन्धेषु समानत्वेनैकान्ततश्चावश्यकान्यङ्गानि तु त्रीण्येव सभवन्ति। तानि चैतानि—**उपक्रम**, **उपपत्ति**, **उपसहारश्चेति**। सत्यप्यावश्यकत्वेऽन्येषामङ्गाना तेषामेतेष्वेव यथायथमन्तर्भाव कल्पयितु शक्यते।

तत्र **उपक्रमे** तावत्सामान्यरूपेण विषयप्रस्तावना विषयस्वरूपोद्देशस्तदुपयोगिता चेत्यादि प्रदर्शनीयम्।

उपपत्त्या तत्तद्विषये साधकबाधकयुक्तिप्रमाणोपन्यासपूर्वक विभिन्नसिद्धान्तानामनेकदृष्टीना च समालोचनया विचारणा स्वाभिमतार्थस्य च प्रतिपादन विधेयम्। यथावश्यक प्रसिद्धसमुचितदृष्टान्तैरपि स्वाभिमतार्थस्य पोषण कर्तव्यम्। किं बहुना, यदपि प्रसङ्गागत सङ्गत च तद्विषय आवश्यक भवेत्तदत्र प्रपञ्चनीयम्।

उपसंहारे तु पूर्वोक्ताना प्रधानहेत्वादीनां सक्षेपेणानुवादपूर्वकम् अथवा अनुवादमन्तरेणैव प्रतिपाद्यविषयस्योपसंहार कर्तव्य।

---

१ निरूपणात्मकानामाख्यानात्मकाना चापि प्रबन्धानामेतान्येव उपक्रमोपपत्त्युपसहाररूपाणि त्रीण्यङ्गानि। केवलमेतावानेव भेदो यदेतयो प्रकारयो. प्राधान्येन (वस्तुवृत्तान्त)वर्णनात्मकत्वादत्र तेषामङ्गाना स्वरूपमपि यथायथं किञ्चिद् भिद्यते।

प्रबन्धरचनायामुपयोगिनः केचिन्नियमाः ।

बहिरङ्गनियमाः

प्रबन्धरचनाया उपक्रमात्पूर्वं सामान्येनैते नियमा अनुसरणीया —

(१) प्रथम तावत् प्रतिपाद्यविषयस्वरूपस्यावधारणा कर्तव्यम् । विषयस्वरूप सम्यगनवधार्यैव प्रायश प्रवर्तन्ते रचना कर्तुं विद्यार्थिन । ततश्च रचनायामसङ्गत्यादिदोषा अपरिहार्या भवन्ति ।

(२) तत. तत्सम्बन्धिविचाराणा स्वय विमर्शश्चिन्तन च विधेयम् । एष स्वयविमर्श एव बुद्धिविकासे मुख्य' कारणम् ।

(३) तदनन्तर तद्विशिष्टविषयोपयोगिविचाराणा कृतेऽन्यग्रन्थानामनुशीलन विधातव्यम् ।

(४) सामान्येन, सामयिकपत्राणामितिहासादे' काव्यग्रन्थरत्नानामन्यस्य चैवविधसाहित्यस्याध्ययन तथा तत्तद्विषयोपयोगिसुभाषितादीना कण्ठस्थीकरणञ्च निबन्धरचनावसरे प्रासङ्गिकविचाराणा सस्फुरणाय तेषामुद्धरणाय चावश्यकम् ।

(५) विषयोपयोगिना प्रस्तुतरचनाङ्गभूतानामवान्तरविषयाणां प्रथम सस्फुरणाक्रमेणैवैकत्र समासतो लेखन विधेयम् । अनन्तरमर्थानुपूर्व्येण शृङ्खलाबद्धाः सूत्ररूपेणैव ते लेखनीया । एव रचनोपक्रमात् पूर्वमेव समासतो रचनाया स्थूलरूपेणाकारो लेख्य. । एव प्रधानाङ्गाना लेखनानन्तर तेषामौचित्यानौचित्यादि विचार्य, साकल्येन च रचनास्वरूपमवधार्य पश्चाद्रचना विधेया ।

अन्तरङ्गनियमाः

(१) समस्तप्रबन्धस्य यथावश्यक त्रिष्वधिकेषु वा खण्डेषु विभाग. कार्यः। ते च खण्डा पृथक् पृथक् स्वातन्त्र्येण लेखनीया । तत्र प्रथमे खण्डे विषयस्योपक्रम, मध्यमे मध्यमयोर्मध्यमेषु वा विषयस्योपपत्ति, अन्तिमे चोपसहार कर्तव्य ।

(२) अत्रेदमवधेय यदत्र प्रतिपादितान् साधारणनियमान वर्जयित्वा नहि रचनाशैलीविषये निश्चिता व्यवस्थिता वा नियमा सन्ति । प्रधानप्रतिपाद्यविषयस्य रक्षा कुर्वन्, भाषाया औचित्य चापरिहरन् प्रबन्धलेखको येन केनापि प्रकारेण स्वेच्छया रचनाकरणे स्वतन्त्र ।

(३) विचारेषु स्वोपज्ञता भाषाया च स्वाभाविकतावश्यकी। अलङ्कारशास्त्रप्रतिपादिताना गुणानामपि रचनाया यथोचित समावेशः कर्तव्य ।

(४) रचनाया यावदुपपत्तिप्रकारस्य प्राधान्य न तावत् तत्तद्विषयकसिद्धान्तविशेषाणाम् । रचनाप्रकारो हृदयग्राही युक्तियुक्तश्चेत् तत्तद्विषये यस्य कस्यापि सिद्धान्तस्य प्रतिपादने लेखक स्वतन्त्रः। शब्दान्तरेषु, 'कि प्रतिपाद्यते' इत्यस्यापेक्षया 'कथं प्रतिपाद्यते' इत्यत्रैव विशेषतोऽवधान देयम् ।

(५) रचनाया. परिमाणापेक्षया तस्या प्रकार शैली चाधिकमावश्यकौ। शोभनप्रकारेण रचितोऽल्पतरपरिमाणोऽपि निबन्धोऽशोभनप्रकारेण रचितादत्यधिकमादरास्पदम् ।

(६) पुनरुक्तव्याघातादिदोषा अन्ये चाप्यलङ्कारशास्त्रप्रतिपादिता दोषा परिवर्जनीयाः।

(७) यथा प्रसङ्गोचितसुभाषितादिवचनोल्लेखो रचनाया शोभामावहति, तथैवात्यधिकोऽप्रासङ्गिको वा तेषामुल्लेखो रचनासौन्दर्यमपहरति। किञ्च नैव मन्तव्यं यदेतादृशं परवचनोपन्यास सर्वथावश्यक एव रचनायाम्।

(८) नैव कश्चिद्व्यवस्थित प्रकारो रचनाया उपक्रमस्य विषये। बुद्धीना रुचीना च वैचित्र्याद् वैचित्र्यमत्र दुर्वारम्। नैव सर्वेषु विषयेषु समान एवोपक्रमप्रकार समुचित। प्रतिपाद्यविषयानुकूलेनैव रचनाया उपक्रमेण भवितव्यम्।

(९) उपसहारप्रकारोऽपि नहि सर्वत्र समान। अत्रापि लेखकादिभेदेन विभिन्नताऽनिवार्या। तथा हि कदाचित्पूर्वमुक्ताना हेत्वादीना समासेन पुनरावृत्तिद्वारैव समाप्ति क्रियते। कदाचित्पुनरावृत्तिमन्तरेणैव। एवमन्येऽपि भेदा उपसंहारप्रकारे दृश्यन्ते।

एवमन्येऽपि नियमा दर्शयितुं शक्यन्ते। ते पुन प्रसिद्ध लेखकाना प्रबन्धानामनुशीलनेन स्वयमेव छात्रैर्निर्धारणीया। किं बहुना, तथापि स्मर्यताम्—

बह्वपि स्वेच्छया काम प्रकीर्णमभिधीयते।
अनुज्झितार्थसबन्ध प्रबन्धो दुरुदाहर.॥
(शिशुपालवधे २।७३)

रीति विचिन्त्य विगणय्य गुणान् विगाह्य
शब्दार्थसार्थमनुसृत्य च सूक्तिमुद्रा ।
कार्यो निबन्धविषये विदुषा प्रयत्न
के पोतयन्त्ररहिता जलधौ प्लवन्ते ॥

(काव्यमीमासायाम्)

किञ्च, शब्दार्थयोर्ग्रन्थनकौशलस्य महत्त्वमप्यत्र प्रसङ्गे न विस्मरणीयम । यथा हि—

त एव पदविन्यासा ता एवार्थविभूतय ।
तथापि नव्य भवति काव्य ग्रन्थनकौशलात् ॥

अपि च—

यानेव शब्दान् वयमालपामो
यानेव चार्थान् वयमुल्लिखाम ।
तैरेव विन्यासविशेषभव्यै
समोहयन्ते कवयो जगन्ति ॥


(नीलकण्ठदीक्षितस्यैतत्)

उपसंहार:

एवमत्र सक्षेपेणैव प्रबन्धरचनायाः प्रक्रियादि प्रदर्शितम् । तन्निदर्शनभूताश्च केचित्प्रबन्धा अस्मिन्ग्रन्थे संनिवेशिता. सन्ति । रुचिवैचित्र्येण शैलीवैचित्र्यस्य प्रद्योतनार्थं च न केवल स्वकर्तृका एव किन्त्वन्यप्रसिद्धलेखकनिबद्धा अपि

प्रबन्धा, यथावश्यक तदधिकारिणामनुज्ञयैव, सधन्यवादमत्र सगृहीता । किंच, यद्यप्यालोचनात्मकनिबन्धानामेव प्रायशोऽपेक्षितत्वेन तेषामेवात्र प्राधान्येन समावेश. कृतस्तथाप्यन्यप्रकारका निबन्धा न सर्वथैवोपेक्षिता । ग्रन्थान्ते पुन सुभाषितानां वैदिकसूक्तीना लौकिकन्यायाना च प्रबन्धरचनायामुपयोगितामाकलय्य पञ्चभि प्रकरणैस्तान्यपि सगृहीतानि ॥

इति प्रबन्धप्रकाशस्य प्रथमभाग
उपोद्धातो नाम
प्रथमोल्लास. ॥



(१)

समयस्य सदुपयोगः

मनुष्यस्य सर्वमपि कार्यम्, सर्वमप्यभीष्टम्, समयस्य सदुपयोगेनैव साध्यम्। ततश्च मनुष्यजीवने समयस्य मूल्यं कियदिति वक्तुमशक्यम्।

जीवने यद्यत्कार्यजातं संपादनीयं तदपेक्षया उपलभ्यमानस्य समयस्यापर्याप्तत्वमिति केन नानुभूयते? वस्तुत एव "अनन्तपारं किल कार्यजातं स्वल्पं तथायुर्बहवश्च विघ्नाः"। अत एव "जीवनं वारितरङ्गचञ्चलतरम्" इत्याहुरभियुक्ताः।

सत्यप्येवं यथा समयस्यापव्ययो दुरुपयोगो वा दृश्यते, न तथा कस्याप्यन्यस्य पदार्थस्य अत्यल्पमूल्यस्यापि।

धनादिपदार्था नष्टा अपि भूयः प्राप्तुं शक्यन्ते, नष्टः समयस्तु सर्वथा नष्ट एव। न हि कथमपि तस्य पुनरवाप्तिः संभवति। तथापि लोकाः प्रायेण यथा धनाद्युपार्जने कृतभूरिपरिश्रमाः, नैव तथा समयस्य सदुपयोगे संरक्षणे वा।

षणायाश्च व्युत्थायापि प्रायेण मानवा लोकैषणाया प्रभावमपनेतु-मशक्ता दृश्यन्ते। सासारिकजीवन परित्यज्य आपाततो लोकसेवाया तत्परेष्वपि आत्मन ख्यातिकामना जागर्त्ति। अत एव "उदात्तचेतसामन्तिमा दुर्बलता" (last infirmity of noble minds) इत्येव ता वर्णयति रस्किन-नामा पाश्चात्यो मनीषी।

एव च सति नात्र महदाश्चर्यं यद् दृश्यन्ते लोके बहवो मनुष्या ये रात्रिंदिव स्वप्रसिद्धि कामयमाना:,

घट भित्वा पट छित्वा कृत्वा रासभरोहणम्।
येन केन प्रकारेण प्रसिद्ध पुरुषो भवेत्॥

इत्युक्त्यनुरूप स्वकीययोग्यतायोग्यतयोर्विचारमुपेक्ष्यैव, सर्वथा विशिष्टगुणैर्विहीना अपि, युक्तैरयुक्तैर्वा उपायै ख्यातिलाभायैव चेष्टापरा भवन्ति।

तथापि एतादृशा अपि मानवोत्तमा विद्यन्ते जगति येऽसाधारण-गुणगणैरलकृता अपि आत्मसमानभावनयैव निरुद्धा नैव ख्याति-कामनया प्रयत्नपरा भवितु शक्नुवन्ति। तादृशानेवाभिलक्ष्य नून "यदि सन्ति गुणा" इत्यादि पद्यमुच्यते।

एष एवार्थो भङ्ग्यन्तरेणैव वर्ण्यते—

वार्ता च कौतुकवती विमला च विद्या
लोकोत्तर: परिमलश्च कुरङ्गनाभे.।

तैलस्य बिन्दुरिव वारिणि पुर्निवारम्
एतत्त्रय प्रसरति स्वयमेव भूमौ ॥

स्वशरीरस्य च्छायेव शरीर, सत्पुरुषान् स्वत एव ख्यातिरनुसरति। ततश्च "सता गुणा स्वत एव प्रकाशन्ते" इति नियम विश्वसन्तो गुणवन्त सन्त आत्मसमानभावनया भावितचित्ता मर्यादामतिक्रम्य ख्यातिलाभाय यत्नपरा न भवन्ति।

तदत्र स्मर्यतामेतदपि पद्यम्—

अद्यापि दुर्निवार स्तुतिकन्या वहति कौमारम्।
सद्भ्यो न रोचते साऽसन्तस्तस्यै न रोचन्ते ॥

अयमेवार्थ परा काष्ठा नीत्वा एव वर्ण्यते मनुस्मृतौ—

समानाद् ब्राह्मणो नित्यमुद्विजेत विषादिव।
अमृतस्येव चाकाङ्क्षेदवमानस्य सर्वदा ॥

—

(४)

दीर्घौ बुद्धिमतो बाहू।

मानवेन नून बलवता भवितव्यमिति केन नाभ्युपगम्येत। तद्धि बल सामान्येन शरीरबल शस्त्रबल सैन्यबल वा इतिरूपेणैव गृह्यते। तद्वै "भौतिक बलम्" इत्येव वर्णयितु शक्यते। वस्तुतस्तु तदतिरिक्त यद् बुद्धेर्बल तदेव सर्वप्रधानमिति मन्तव्यम्। यतस्तद्विरहित हि भौतिक बलमन्तत आत्मन एव हानिकर सपद्यते।

अयमेवार्थस्तैस्तै प्रकारैरस्मत्प्राचीनवाङ्मये प्रपञ्चितो दृश्यते। वसिष्ठविश्वामित्रयो सघर्षे "धिग्बल क्षत्रियबल ब्रह्मतेजोबल बलम्" इत्येव क्षत्रबलापेक्षया ब्रह्मबलस्य श्रेयस्त्वप्रतिपादन वस्तुतो भौतिकबल-बुद्धिबलयोस्तारतम्यस्य प्रदर्शनार्थमेव। एवमेव बुद्धिमतश्चाणक्यस्य साहाय्येन चन्द्रगुप्तस्य नन्दराज्यावाप्तिरप्येतस्यैवार्थस्यापर निदर्शनम्।

तस्यैतस्य तारतम्यप्रदर्शनस्यायमेवाभिप्रायो यद् व्यक्तिगतस्य समाजगतस्य वा कल्याणस्य कृते उभयविधयोरपि बलयो समन्वय सामञ्जस्य चापेक्षितम्। अत एव "ब्रह्म च क्षत्र च सश्रिते" (ऐत० ब्रा० ३।११), "ब्रह्मणि खलु वै क्षत्र प्रतिष्ठितम्। क्षत्रे ब्रह्म" (ऐत० ब्रा० ८।२) इति श्रूयते। केवल हि भौतिक बलं चक्षूरहितोऽन्ध इव कार्याक्षमम्। अत एव "बुद्धया सर्वं प्रसाध्यते", "कृत्स्नो हि लोको बुद्धिमतामाचार्य। शत्रुश्चाबुद्धिमताम्" (चरके) इत्येव बुद्धे प्रशसा, "मेधा मे वरुणो ददातु मेधामग्नि प्रजापति." (यजु० ३२।१५), 'धियो यो न प्रचोदयात्" इत्यादिमन्त्रवर्णेषु च बुद्धिसबन्धिनी प्रार्थना दृश्यते।

ततश्च भौतिकबलेन सहैव तदपेक्षया उत्कर्षातिशय भजमानाया बुद्धे. सपादनार्थमपि मनुष्येण प्रयतनीयमित्येतदेव "दीर्घौ बुद्धिमतो बाहू" इति सुभाषितस्य हृदयम्।

भवन्ति चात्राभियुक्तोक्तयः। तथा हि—

शस्त्रैर्हता न रिपवो निहता भवन्ति
प्रज्ञाहताश्च सुतरा निहता भवन्ति।
शस्त्र निहन्ति पुरुषस्य शरीरमेकम्
प्रज्ञा यशश्च विभव च कुल च हन्ति ॥
यत्र वायोर्गतिर्नास्ति रश्मीना च विवस्वत ।
तत्रापि प्रविशत्याशु बुद्धिर्बुद्धिमतामिह ॥

इममेवार्थं नीतिविद एव वर्णयन्ति—

अपकृत्य बुद्धिमतो दूरस्थोऽस्मीति नाश्वसेत् ।
दीर्घौ बुद्धिमतो बाहू याभ्या हिंसति हिंसितः ॥
(विदुरनीतिः ६।८)

किञ्च । एक हन्यान्नवा हन्यादिषुर्मुक्तो धनुष्मता ।
बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद्राष्ट्र सराजकम् ॥
(विदुरनीति १।४८)

---

(५)

ज्ञानं भारः क्रियां विना ।

ज्ञान तदनुकूलाचरण विना, तस्य कार्यरूपेण प्रयोग वा विना, केवल भार एव । ज्ञान संपाद्य यदि कोऽपि जनस्तदुपयोगं न वेत्ति न करोति वा तर्हि नून तज्ज्ञानसपादन व्यर्थमेव ।

सर्वाणि शास्त्राणि सर्वाश्च विद्या किञ्चित्प्रयोजनमुद्दिश्य वा पुरस्कृत्यैव प्रवर्त्तन्ते। "सर्वस्यैव हि शास्त्रस्य.. यावत्प्रयोजनं नोक्त तावत्तत्केन गृह्यताम्" इति वै सर्वसम्मत सिद्धान्तः।

सत्यप्येव प्रायेण दृश्यते यद्बहवस्तत्तच्छास्त्राण्यधीत्यापि नहि तदनुकूलमाचरन्ति नापि तदुपयोगरहस्य जानन्ति। तानुद्दिश्यैव प्रोच्यते—

"शास्त्राण्यधीत्यापि भवन्ति मूर्खा" इति।

'मूर्खा' इत्यल्पतरकमुच्यते। दुष्टा अनाचारवन्त इत्यपि वक्तव्यम्।

सर्वस्यापि ज्ञानस्य साफल्य तदनुकूलाचरणे तस्य प्रयोग एव वा विद्यते।

आयुर्वेद चिरायाधीत्यापि यदि कश्चित्तत्प्रयोगेऽवसीदति, तत्तद् भौतिकविज्ञानमभ्यस्यापि यदि कश्चित्तत् प्रयोगरूपेण घटयितु न शक्नोति, तर्हि तस्य कि फल किं वा सार्थक्यम?

धर्मशास्त्रपारगतोऽपि यदि तद्विपरीतमाचरति तर्हि स मायावी सन्, न केवल लोकमेव, किन्त्वात्मा मपि वञ्चयति। "यथा काष्ठमयो हस्ती यथा चर्ममयो मृग" तथैव त प्रति केवल नाम बिभ्रदपि नि सार शास्त्रम्। तादृशमेव च्छद्मना वर्तमान जनमुद्दिश्य उच्यते—

नैन छन्दासि वृजिनात्तारयन्ति
मायाविन मायया वर्तमानम्।
नीड शकुन्ता इव जातपक्षाश्
छन्दास्येनं प्रजहत्यन्तकाले॥

"किं तया क्रियते धेन्वा या न सूते न दुग्धदा" इति न्यायानुसारं धर्मशास्त्रस्य तत्कृते व्यर्थत्वमेव।

किं कर्तव्यं किं वा न कर्तव्यमिति ज्ञानेऽपि जनो यदि स्वकर्तव्यविषये उदास्ते तर्हि किमर्थं तस्य तज्ज्ञानम्। चक्षुष्मानपि अन्ध इवाचरति चेत्तर्हि 'को लाभस्तस्य नेत्रयो'?

किञ्च, शास्त्रज्ञोऽपि यदि शास्त्रप्रतिकूलतयाचरति तर्हि स न केवलमात्मन एवापकुरुते, किन्तु लोकस्यापि हान्यै प्रभवति।

"यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन" इत्युक्तं शास्त्रज्ञा एव लोकस्य नेतार। ते एव यद्यनाचारवन्तस्तर्हि ध्रुवं लोकस्य हानि। अत एवोच्यते—

नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत्।
विश्वस्मिन्नधुनान्य कुलव्रतं पालयिष्यति क॥

किञ्च। श्रुते पथो दर्शयितार ईश्वरा
मलीमसामाददते न पद्धतिम्॥

एवमेव भौतिकविज्ञानस्य साफल्याय क्रियाया तत्प्रयोगस्य वा अपेक्षा। एतदेव साम्प्रतिकानामाविष्काराणां निदानम्। अत एवोच्यते—

"शरीरे चैव शास्त्रे च दृष्टार्थं स्याद्विशारद।"

किञ्च। शास्त्राण्यधीत्यापि भवन्ति मूर्खा,
यस्तु क्रियावान् पुरुषः स एव।

ततश्च सर्वथा सत्यमेव

(६)

अलोकसामान्यमचिन्त्यहेतुकं
द्विषन्ति मन्दाश्चरितं महात्मनाम् ॥

द्वन्द्वात्मकं खलु जगदिदम्। सतत गच्छतीति व्युत्पत्त्या निष्पन्नो हि जगच्छब्द । ततश्च सततं गतिशीलस्य जगतस्तत्त्व-मेतत्कृतमेव। वस्तुत परस्परविरुद्धशक्त्यो सघर्ष एव जगतः स्थिति प्रगतिश्च। अत एवास्मिन् ससारे कस्यचिदपि पदार्थस्य विरोधिपक्षो न विद्यत इत्यसभवमेव।

एतन्नियमानुरूपमेव महात्मनामलोकसामान्येऽचिन्त्यहेतुकेऽपि चरिते मन्दा प्रायेण सद्वेषा भवन्तीति नाश्चर्यकरम् ।

सहस्ररश्मेर्लोकाभिनन्दनीयमपि तेज. प्रति कौशिकस्य द्वेषबुद्धि कस्य न विदिता ?

लोकाभिराम भगवन्त राम प्रति रावणस्य, भगवन्त देवकीसुतं वासुदेव प्रति कसस्य शिशुपालस्य वा, करुणावतार भगवन्तं बुद्धं प्रति पितृव्यसुतस्यापि देवदत्तस्य वा द्वेषबुद्धिर्ज्वाज्वल्यमानमत्र निदर्शनम् ।

साप्रतिके भारतवर्ष एव अहिंसासत्ययोरवतारस्य लोकानुग्रह-मूर्त्तेर्महात्मनो गान्धेश्चरितविषयेऽपि केषाञ्चिन्निष्कारण द्वेषबुद्धि-रस्माक विदितैव ।

दुर्जना: स्वभावेनैव सुजनाना निष्कारणवैरिणो द्वेषिणश्च भवन्तीति नीतिविदामुच्चैर्घोष । तथा चोच्यते—

दुर्जनो दूषयत्येव सता गुणगण क्षणान् ।
मलिनीकुरुते धूम सर्वथा विमलाम्बरम् ॥

मृगमीनसज्जनाना
तृणजलसन्तोषविहितवृत्तीनाम् ।
लुब्धकधीवरपिशुना
निष्कारणवैरिणो जगति ॥

दह्यमाना सुतीक्ष्णेन नीचा परयशोऽग्निना ।
अशक्तास्तत्पद गन्तु ततो निन्दा प्रकुर्वते ॥

किञ्च ।

"न विना परवादेन रमते दुर्जनो जन ।"
"परदूषणमेव भूषण येषाम्" (=दुर्जनानाम्)। इति ।

तस्यैतस्य दुर्जनपक्षे स्वाभाविकस्य द्वेषस्य वास्तविक मूल तु सर्वानर्थकारणमज्ञानमेव । एतदेव प्रकृतस्य प्रबन्धस्य शिरोवाक्ये 'मन्दा' इति पदेन ध्वन्यते । कस्यापि गुणवतो वस्तुनोऽवज्ञायाः कारण वस्तुतोऽज्ञानमेव भवति । तथा चोक्तम—

न वेत्ति यो यस्य गुणप्रकर्ष
स तस्य निन्दा सतत करोति ।
यथा किराती करिकुम्भजाता
मुक्ता परित्यज्य बिभर्ति गुञ्जाम ॥

महात्मन क्राइस्टस्य आत्मनोऽकारणाद्वेषिरा प्रति लोद्गाना पितर परमेश्वर सबोध्य "यतस्तेऽज्ञानिन, अतस्तेषा मा प्रति द्वेषबुद्धि चान्तव्या" इत्युक्तिरत्र स्मृतिपथमायाति। अत एव महात्मानो द्वेषिष्वपि करुणापरा एव भवन्ति।

वस्तुतस्तु निष्कारणाद्वेषेण नैव महात्मना काचिद्धानिर्जायते। प्रत्युत स तेषा माहात्म्यस्य वृद्धये विकासाय चैव कल्पते। विरोधिशक्त्यैवास्माक शक्तेर्विकास इत्येष वै प्रकृतेर्नियम ॥

---

(७)

कुमुदाकरेण शरदिन्दुचन्द्रिका
यदि रामणीयकगुणाय संगता।
सुकृतं तदस्तु कतमस्त्वयं विधिर्
यदकालमेघविततिर्व्ययूयुजत् ॥

सृष्टावेतस्या किमपि वस्तु अविचालि कापि परिस्थितिर्वा अनपायिनीति वै विप्रतिषिद्धम्। नहि कापि अभिमता परिस्थितिश्चिराय एकरसेनानुवर्तते। न चापि इष्टै सयोगा स्थायिनो भवन्ति। एतत्सर्वमालोचयत एव कस्यापि कवेरन्योक्तिरूप सुभाषितम्—

कुमुदाकरेणेत्यादि ।

ससारेऽस्मिन् "रत्न समागच्छतु काञ्चनेन" इत्यनुरूपं जायमानो योग्यस्य योग्येन सह सगमो नितरा लोकानामानन्दाय कल्पते। महनीयचरिताना यशश्चन्द्रिकाधवलीकृतदिगन्तराणा त्रिभुवनभूषणाना मानवकुलतिलकाना स्वयोग्यतमेन जनान्तरेण पदेन परिस्थित्या वा सयोग निरतिशया शोभासम्पत्तिमावहति। पर "सयोगा विप्रयोगान्ता पतनान्ता समुन्छ्रया" इति न्यायानुसार यदि कथंचित्सहसा तयोर्वियोगो जायते तन्नून लोकानामसह्यपीडन भवति। शरदिन्दुज्योत्स्नाया कुमुदाकरेण साक सयोगो वै नितरा सौन्दर्यावह। स एव सयोगो यद्यकालमेवपड्क्त्या विहन्यते तदतितरामसह्य शोचनीय च भवति।

यथा हि राजराजो नलो दमस्वस्रा सगम समासाद्य नितरामेव लोकाभिनन्दनीय सन् विवासकाले सहसा तया वियुक्तो लोकाना शोकसागरे निमज्जनाय बभूव।

एव भगवत्या सीतया सयोगमासाद्य विवासकालेऽकाले तया वियुक्त श्रीरामचन्द्रोऽत्र निदर्शनम्।

एतादृशेऽवसरे हि सहसैव मुखान्नि सरति—

प्रायेण सामग्र्यविधौ गुणाना
पराङ्मुखी विश्वसृजः प्रवृत्तिः।

अथवा सर्वथा सत्यमेवैतदुच्यते यद् "मधुरविधुरमिश्रा. सृष्टयो हा विधातु."।

एवं हि प्रतीयते यत्क्रूरो विधि क्रीडनकैरिवावशेर्मानवै सह क्रीडति।

भवन्ति चास्मिन्नर्थे कवीनामन्या अप्युक्तय । तथा हि—

सुहृदिव प्रकटय्य सुखप्रद
प्रथममेकरसामनुकूलताम्।
पुनरकाण्डविवर्तनदारुणो
विधिरहो विशिनष्टि मनोरुजम्॥

किञ्च। नियतिर्विधाय पुसा
प्रथम सुखमुपरि दारुण दु खम्।
कृत्वालोक तरला
तडिदिव वज्र निपातयति॥

एतादृशीभिरुक्तिभिर्वै अपूर्णोऽस्मिन् जगति खिन्नमनस्कतामनुभवतो मानवस्य उत्तरोत्तर पूर्णताया सामग्रयस्य च कृते तीव्राभिलाष एव व्यज्यते॥

---

(८)

दैवं हि दैवमिति कापुरुषा वदन्ति।

सर्वस्यामपि सृष्टौ कर्मण एव साम्राज्य समालोच्यते। न केवल प्राणन्निमिषच्च जगदेव स्वभावत कर्मपरायणम, न केवल वृक्षौषधिवनस्पत्यादयो नदीनदा एव वा सतत कर्मपरा, किन्तु विश्वस्य सचालका वाय्वादित्यादयो देवताकोट्यन्तर्गता अपि अविरत

स्वस्वकर्मणि निरता दृश्यन्ते। तेषु सर्वेषु सर्वमेतद्वृत्त पश्यतोऽपि, बुद्ध्या समन्वितस्यापि केवल मनुष्यस्यैव मनसि स्वकर्तव्यकर्म परित्यज्य दैवमेवाश्रयणीयमित्येषा भावना कथमपि पद लभेतेति महदाश्चर्यम्!

स्पष्ट मानवसमाजस्य सभ्यतायाश्च सर्वोऽपि विकास, नानाविधनूतननूतनाविष्काराश्च, मानवीयपरिश्रमस्यैव परिणाम। तत्तद्विद्याना तत्तद्विज्ञानाना च स्वस्वविभागे चेतश्चमत्कारिणी समुन्नतिरपि आजीवनं घोरतपासि चरता विदुषा परिश्रमस्यैव साफल्यमुद्घोषयति। इतिहासेषु वर्णिताना महतीनां क्रान्तीना महता कार्याणा वा मानवीय समुद्यम एव मूलम्। स्वकीयप्रकृत्या प्रचोदित इव शिशुरपि अविरत हस्तपादादि चालयन् कर्मण' परिश्रमस्यैव च माहात्म्य वर्णयति।

तदेव सर्वत्रापि कर्मण, परिश्रमस्य, उद्योगस्य वा निरपवादा प्रवृत्ति पश्यतोऽपि मनुष्यस्य मनसि कर्म परित्यज्य दैवमाश्रयणीयमित्येषा भावना समुत्पद्यते चेत्तस्या कारण केवल निखिलानर्थमूल काचिद् भ्रान्ति', बुद्धेर्विपर्यय, सर्वस्या समुन्नतेररातिरूपमालस्यमेव वा भवितुमर्हति।

प्रथम तु दैवेत्याख्यो वस्तुत कर्मणोऽपेक्षया स्वतन्त्र पदार्थ एव न विद्यते। येऽपि दैववादिनस्तैरपि पूर्वजन्मकृतस्य कर्मण एव दैवमिति सज्ञा क्रियते। द्वितीय पुन', यदपि दैवाख्य पूर्वकृत कर्म तदपि वर्तमाने क्रियमाणस्य कर्मणो नैरपेक्ष्येण स्वातन्त्र्येण वा

नहि कार्यक्षम भवितुमर्हति । न चापि तत्कर्मकर्तुरनाश्रयेण कुत्रचित् स्वातन्त्र्येण तिष्ठति । केवल कर्तु कर्मकरणस्य शक्तेः स्वरूपसपादन एव तत्पर्यवस्यतीति बुद्धिमारोहति । अत एवोच्यते—
"पुरुषकारेण विना दैव न सिद्धयति" इति ।

ततश्च दैवमित्याख्य. स्वतन्त्रस्थिति पदार्थ. केवलमलीकमेव । सत्यपि तस्मिन् न तेन मनुष्यस्य किञ्चित् प्रयोजनम् । दैवमाश्रयणीयमिति भावना च न केवल विश्वप्रपञ्चस्य किन्तु कर्मण्येवाधिकार भजमानस्य मनुष्यस्यापि य स्वभावस्तस्य प्रतिकूलैव ।

भवन्ति चात्र श्लोका —

आरभेतैव कर्माणि श्रान्त. श्रान्त पुन' पुन ।
कर्माण्यारभमाण हि पुरुष श्रीर्निषेवते ॥
कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥
न दैवमिति सचिन्त्य त्यजेदुद्योगमात्मन ।
अनुद्यमेन कस्तैल तिलेभ्य. प्राप्तुमिच्छति ॥
पूर्वजन्मकृत कर्म तद्दैवमिति कथ्यते ।
तस्मात् पुरुषकारेण विना दैव न सिध्यति ॥
धीमन्तो वन्द्यचरिता मन्यन्ते पौरुष महत् ।
अशक्ता. पौरुष कर्तुं क्लीबा दैवमुपासते ॥
काकतालीयवत्प्राप्त दृष्ट्वापि निधिमग्रत' ।
न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते ॥

तस्मादवितथमेवेद यत्—

दैव हि दैवमिति कापुरुषा वदन्ति ॥

---

(९)

तीर्थयात्राया लाभाः ।

चिराय राजनीतिकदास्येन पीडिता वय भारतीया हन्त! स्वदेशेऽपि वैदेशिका संवृत्ता स्म. । एतदेव कारण यद् भारतीयेष्वाचारविचारेषु अज्ञानमूलको विरागोऽनास्था चास्माक दरीदृश्यते। चिरन्तनकालात्प्रचलितायास्तीर्थयात्राया विषयेऽपि समानैव उपेक्षात्मिका प्रवृत्तिर्बहूनामस्माकम् । अत एव भारतेऽग्रत्वेऽपि आबालवृद्धमाराजरङ्कं च समादृतायास्तीर्थयात्राया लाभानधिकृत्य किञ्चिदत्र वक्तु साम्प्रतमेव ।

सक्षेपेणैव ते लाभा अत्र प्रदश्यन्ते—

(१) प्रथम तावत्पदमवगाहते आध्यात्मिको लाभ । मुख्यतया एतदुद्देश्येनैव नानाविधकष्टपरम्परा सहमानैरपि तीर्थयात्रा क्रियते। आध्यात्मिकता हि मानसी अवस्था। सा च सकल्पाधीना। अत एव "तन्मे मन शिवसकल्पमस्तु" इत्येवं वैदिकप्रार्थना श्रूयन्ते। यत्संकल्पेन मनुष्य कर्मारभते तस्य तदेव फल लभ्यते। अत एव "मन एव मनुष्याणा कारणं बन्धमोक्षयो" इति स्मर्यते।

किञ्च, सासारिकान् रागद्वेषानुबन्धिनो भावान् तावत्काल विहाय तेषु तेषु पवित्रतीर्थेषु विचरन्मनुष्यस्तैः सबद्धमात्मन उन्नायक-

मितिहास श्राव श्रावम्, तत्रत्यैर्महात्मभिश्च समागम कुर्वन् नूनमाध्यात्मिकभावनाना दृढभूमिकता लभत इति कोऽत्र सदेह-स्यावकाश.।

(२—३) तदनन्तरमागच्छतो मनोविनोदोऽनुभववृद्धिश्च। दैनन्दिनी गार्हस्थ्यजीवनस्य चिन्ता मुक्त्वा तीर्थयात्रार्थं गतवतो जनस्य तत्तत्समाजेन प्रकृत्या च सबद्धाना विभिन्नप्रकारकाणा नूतननूतनाना दृश्याना प्रसङ्गाना च दर्शनेन न केवलमत्यन्तमव-र्णनीयो मनोविनोद एव, किन्तु अनुभवस्य ज्ञानस्य वा वृद्धिरपि भवत्येव। तथा चोक्तम्—

देशाटन राजसभाप्रवेशो
व्यापारिविद्वज्जनसगतिश्च।
सर्वेषु शास्त्रेष्ववलोकन च
चातुर्यमूलानि भवन्ति पञ्च॥

किञ्च। नद्य फुल्लसरोरुहा वनभुव पुष्पानमद्वीरुध
शैला काञ्चनरत्नचित्रकटका प्रोत्तुङ्गहर्म्या पुर.।
नानाकेलिविचक्षणा युवतय· शूराश्च घोराहवा
दृश्यन्ते भुवि केन कोमलहृदा देशानगत्वा बहून्॥

(४) भारतीयसस्कृतेरेकात्मकताया पुष्टिरित्यपरो लाभः। भारतवर्षो हि महान् देश। अत्र हि विभिन्ना भाषा आचार-विचाराश्च तत्तत्प्रान्तभेदेनोपलभ्यन्ते। एतद्दृष्ट्या भारत नाम नैको देश, किन्तु देशाना समूह इत्यपि वक्तु शक्यते। तथापि समस्तेऽपि

भारत एकैव भारतीया संस्कृतिरिति भारतीयाना चिरप्ररूढो विश्वास । अत एव विभिन्नदेशवासिषु परस्परमुपलभ्यमानाया देशमूलकविद्वेषभावनाया नामापि भारतीयेतिहासे न श्रूयते। तत्स्थाने विभिन्नप्रान्तीयतीर्थेषु समाना श्रद्धा भक्ति मान्यता च धारयन्तो भारतीयास्तीर्थयात्रा कुर्वन्ति। स एष भारतीयतीर्थयात्राया एव महान् महिमा।

एवम् "आम्राश्च सिक्ता पितरश्च प्रीणिता" इति न्यायानुरूपं मुख्येन आध्यात्मिकताया लाभेन सहैव तीर्थयात्राया अनेके लाभा ।

किञ्च। कस्याविदित यत् पाश्चात्यदेशेषु अपि प्राकृतिकसौन्दर्यावहाना समुद्रतीरस्थनगरादीना यात्राया. परिपाटी अद्यत्वेऽपि सोत्साह प्रचलति। पूर्वोक्तहेतुभि स्पष्टमेतद् यदस्मद्देशीयतीर्थयात्राया न केवलं तस्या पाश्चात्यप्रथाया एव गुणा, किन्तु ततोऽप्यधिका, अन्तर्गच्छन्ति। तच्चैतदाध्यात्मिकभावनाप्रधानाना भारतीयानामस्माक स्वाभाविक वैशिष्ट्यम्॥

---

(१०)

वरमद्य कपोतः श्वो मयूरात्।

इह खलु नानाविधचिन्तासन्तानसन्दानित[१]मानवकुलसंकुले संसारे किन्तु मनुष्याणा दु खस्य निदानं किं वा तत्प्रतीकार

---

१ "बद्धे सन्दानितं मूतम्" इत्यमरः।

अय भाव.। यथा हि प्रथम तु मर्कट· स्वाभावेनैव चपल इति महाननर्थ। स यदि सुरापान विदधीत, वृश्चिकश्च त दशेत्, ततोऽपि च प्रेतादिसचार स्यात्तर्ह्येतदनर्थचतुष्टयसमापतने यदपि सघटेत तदल्पमेवेति मन्तव्यम्। यतस्तस्यामवस्थाया को नु वक्तु समर्थो यदेतावत्येवानर्थसम्भूतिर्भविष्यति। एवमेव यत्रापि स्वतोऽनर्थकारिणोऽनुरूपसाहाय्यलाभस्तत्र कदा कोऽनर्थ समापतेदित्येतदवधारणा दु शकम्।

यथा हि खलु यत्र यौवन धनसम्पत्तिः प्रभुत्वमविवेकिता इत्येतच्चतुष्टयसद्भावस्तत्र यदप्यनर्थजात समापतेत्तदल्पमित्येवावगन्तव्यम्। नैव तत्रानर्थश्रेणिसमापतन इयत्तावधारणासभव। तदेतत्पद्य गीयते—

यौवन धनसम्पत्ति· प्रभुत्वमविवेकिता।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्॥ इति।

तथ्यमियमेवावस्था समुपस्थितासीद् भारते वर्षे महाभारतयुद्धप्रवर्तनात्प्राक्। तस्मिन्नेव हि समये यैर्दुर्योधनादिभिर्धनादिमदोन्मत्तैर्भारत समाक्रान्त तेऽपि यौवनधनसपत्त्यादिभिश्चतुर्भिरप्यनर्थकारणै. समेता बभूवु। तत एव तत्तन्महानर्थजात भारतस्योपरि समापतित यस्य दुष्प्रभावेणाद्यापि ग्रस्त भारतमुन्नतिपथात्प्रस्खलति।

किं बहुना, यस्मिन्नपि काले कस्याप्युद्दण्डतया निरकुशाचारेण च समुद्वेजितो लोक आसीत्तदैवमेवानर्थमूलानि नानाविधकारणानि समुपस्थितान्यासन्।

अद्यत्वेऽपि नानादेशेषु यत्रापि शासकानामत्याचारेण पीडिता प्रजास्तत्रैवमेवानेकविधान्यनर्थानुरूपकारणानि सघटितानि दरीदृश्यन्ते। तद्यथा 'ट्यूनीशिया' देशे 'फ्रांस' देशवासिनामत्याचारा। एतादृशाना हि परपीडापराणा धनसम्पत्तिरतिरोहिता, प्रभुत्वमपि साक्षात्। अविवेकितापि प्रत्यक्षैव। अनपराधिना कारागारपातन प्राणादानमसमसमीक्षणमधिकारिभ्योऽप्यधिकारावितरणमित्यादि सर्व बहुविधचेष्टित तेषामविवेककारितमेव। तत्रैव नानानर्थकारणकलाप[1] सन्निधाने स्वदेशहितचिकीर्षूणा येऽपि कारागारावरोधप्रभृतयोऽनर्थप्रवाहा समुपस्थिता भवन्ति ते स्वल्पा इत्येवावगन्तव्यम्। स्वार्थिना लक्ष्मीवता प्रभूणामविवेकिनामेतादृशामधिकारे किं किमनर्थजात समुपस्थित भवेदिति को नु वक्तु शक्नोति।

एतादृशे ह्यवसरे सुतरा सङ्घटत उपरि निर्दिष्टा कस्यापि विद्वन्मणेर्भणितिरियम्—

मर्कटस्य सुरापान ततो वृश्चिकदशनमित्यादि ॥

——

(१२)

उद्योगः

इह जगति सर्वेषामेव प्राणिनामिय स्वभाविक्यभिवाञ्छा यत्कथमपि शुभमधिगच्छाम इति। सत्यप्येव विरला एव ते ये

---

१ कलाप समूह ।

सदृश्यते। तथा च निशाकरदिवाकरयो पर्यायेणोदयोऽस्तमयन च, सूर्यकरैरनवरतं रसादान, सरिता सातत्येन सलिलप्रवाह॰, पशुपक्षिणा सनियम कर्मपरायणता, अस्मच्छरीरान्तर्गताना हृदय-यकृत्प्रभृतीना सर्वेषामप्यवयवाना सर्वदैव स्वस्वकर्मपरता च सर्वमेतदुद्योगपरतैव जीवनस्य प्रथमो नियम, सृष्टिकर्तुर्भगवतश्च परमोऽभिप्राय इति ख्यापयति। कस्याविदित यच्छरीरपरिश्रमेणै-वास्माक तानि तानीन्द्रियाणि सुस्थानि सबलानि च भवन्ति। एवमेव समुचितपरिश्रमेणैव मानस्यस्तास्ता शक्तय सुपुष्टा॰ सवर्धिताश्च जायन्ते।

ततश्च मधुरमधुराक्षरो बीजमन्त्रोऽयमखिलसिद्धीना य एष समुद्योगो नाम॥

---

(१३)

प्रायः शुभं च विदधात्यशुभं च जन्तोः सर्वङ्कषा भगवती भवितव्यतैव॥

दैवपुरुषकारयो कस्याधिक प्राबल्यमित्येष चिरन्तनो विवाद। केचित्खलु

उद्योगिन पुरुषसिहमुपैति लक्ष्मी-
दैंव हि दैवमिति कापुरुषा वदन्ति।
दैव निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोष।

किञ्च—

पूर्वजन्मकृत कर्म तद्दैवमिति कथ्यते ।
तस्मात्पुरुषकारेण विना दैव न सिध्यति ॥
न दैवमिति सञ्चिन्त्य त्यजेदुद्योगमात्मन ।
अनुद्यमेन कस्तैल तिलेभ्य प्राप्तुमर्हति ॥

इत्यादिपक्षमवलम्बमाना दैवमुपेक्ष्य पुरुषकारस्यैव माहात्म्यमुद्घोषयन्ति ।

अपरे पुनरैहिकपुरुषकारकारण विनैव जन्मत एव कश्चित्सुखी कश्चिद् दु खीत्यादिप्रकार नानाविधभेदभाव पश्यन्त, स्वल्पेनैव परिश्रमेण कश्चिन्महत्फलमासादयति कश्चित्पुनरतिपरिश्रम कृत्वापि विफलमनोरथ केनचिदशेनैव वा सफलमनोरथो भवतीत्यादि वैषम्य चानुभवन्तो दैवस्यैव प्राधान्यमिति सिद्धान्तयन्ति । तन्मतमनुसृत्यैव गीयते—

गजभुजङ्गमयोरपि बन्धन शशिदिवाकरयोर्ग्रहपीडनम् ।
मतिमता च विलोक्य दरिद्रता विधिरहो बलवानिति मे मति ॥

अपि च—

भग्नाशस्य करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवर स्वय निपतितो नक्त मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यात पथा
लोका पश्यत दैवमेव हि नृणा वृद्धौ क्षये कारणम् ॥

तमेतमुत्तरपक्षमाश्रित्यैव कस्यचिद्विपश्चित सुभाषितमिदम्—

प्राय शुभ च विदधात्यशुभ च जन्तोरित्यादि ।

कस्यैतदविदित यदत्रापातरमणीये क्षणभङ्गरे संसारेऽस्थिरे सुखिदु खिनो सुखदु खे । क्षणेनैव जनो दु खसागरे प्रक्षिप्यते, क्षणेन च सुखसम्पत्तिमासाद्य सुखी सजायते । योऽद्य मोदमानस्तिष्ठति अन्येद्यु सहसैव तस्योपरि महद् दु खमापतति । चिराय महता दु खेन कथञ्चित्कालमतिवाहयन्तो बहवोऽकस्मादेव सुखसम्पदमासादयन्ति । वस्तुतो नैवैकान्तत कस्यचिद् दुःखाधिगतिः सुखसमागमो वाकर्ण्यते । सर्वेषामपि ताभ्या समागमोऽस्थिर क्षणभङ्गरश्च ।

तदेतत् शुभाशुभयोरकस्मादेव समुपस्थान क्षणभङ्गरत्व च न केवल साधारणमनुष्याणा विषये अद्यत्व एव वा दरीदृश्यते, किन्तु महामहिमशालिनामितिहासपुराणेषु प्रख्यातयशसा महतामपि विषये तयोस्तादृश्येव स्थिति । तथा हि महाभागो राजराजो नल. प्रथम पितृपितामहपरम्पराप्राप्ता राज्यसम्पत्तिमासाद्य नितरा शुभमन्वभूत् । तदनन्तर च सहसैव स्वसम्पत्तिविरहितो महत्या दु खश्रेण्या सङ्गतोऽरण्यादरण्यानी भ्राम्यश्चिराय क्लेशमतिशयमासिषेवे । मुहुरपि च तामासाद्य पूर्ववदेव सुख भेजे । पाण्डवाना च महानृपतिसूनूनामपि क्रमेण शुभाशुभसमागमोऽतिरोहित एव ।

तदेतादृशं शुभाशुभयोरस्थैर्य सहसैव च पुरुषकारादिसाक्षात्कारणमन्तरेणैव तयोरुपस्थिति किंकृते इति विचारे काचिल्लोकोत्तरा

शक्तिरेव पृष्ठत इवागत्य कार्यं निर्वाहिकेति सपदि मनसि समायाति। सैव लोकोत्तरा शक्तिर्भवितव्यता भाग्य विधिर्नियतिर्दैवमित्यादिशब्द- रभिधीयते। दृष्टप्रभावापि सा स्वय प्रत्यक्षतो न दृश्यत इत्यत एव कैश्चिददृष्टनाम्नापि स्मर्यते।

सा चेय भगवती भवितव्यता देवी महाशक्तिसपन्ना। एनया हि समाक्रान्त समस्त विश्वम्। भुवनत्रयेऽप्यनवरुद्धमकण्टकमस्या शासनम्। गिरिगुरुगर्तदुर्गमे कान्तारे वा, विविधव्यालकुलसमाकुले पाताले वा, अगाधजलसचारे सागरेऽपि वा स्थितो जनो न खलु नास्या दृष्टिगोचर। न केवलमल्पशक्तियुक्ता मानवा अन्येऽवरा प्राणिन एव वास्या शासनमनुवर्तन्ते, किन्तु सर्वमेव जडचेतनात्मक- माब्रह्माण्ड जगदस्या वशे वर्तते।

तामेनामघटितघटनापटीयसी भगवतीं भवितव्यतामेवोद्दि- श्योक्त केनापि—

काश्चित्तुच्छयति प्रपूरयति वा काश्चिन्नयत्युन्नतिं
काश्चित्पातविधौ करोति च पुन काश्चिन्नयत्याकुलान्।
अन्योन्य प्रतिपक्षसहतिमिमा लोकस्थिति बोधय-
न्नेष क्रीडति कूपयन्त्रघटिकान्यायप्रसक्तो विधि॥

अपि च—

अवश्यंभाविनो भावा भवन्ति महतामपि।
नग्नत्वं नीलकण्ठस्य महाहिशयन हरे.॥

तत एतद् धैर्य सकलश्रेय सम्पादकम्। ऐहिकामुष्मिक सर्वविध सुख धैर्येण मानवा आसादयितु शक्नुवन्ति। एतदेव धर्मानुष्ठाने महत्साधनम्। धैर्येणैव मनुजो धर्मपथादविच्युत उत्तमोत्तमा गतिमधिगन्तुमर्हति। सर्वमेतत्समालोच्य जने सर्वथैव धैर्यधारणे यत्नो विधेय।

---

(१५)

इन्द्रजालमञ्जूषा

महतीमपि श्रियमवाप्य विस्मय
सुजनो न विस्मरति जातु किञ्चन।

(१)

स खल्वासीत् साधारणसमितेर्वासर। प्रधानामात्यप्रमुखा महत्पदमधिष्ठिता लघुपदभाजस्तथान्ये कार्यकर्तार सर्वेऽप्यासन्नुपस्थिता।

आदिष्टमासीद् भूभुजा—"अद्यानिवार्य प्रवेशः सर्वसाधारणस्य। यः कोऽपि समेत्यास्थानमण्डपम् अभित्तोणिपतिं स्वमनोऽनुरूपमावेदयतु वाञ्छितम्। नहि कश्चन परिचारकोऽधिकरणमण्डप प्रविशन्तमवरोद्धु क्षम। सर्वोऽपि स्वमनस्तापमभिदधातु। अतो विशा त्राणाय प्रकल्पेऽहम्" इति।

पराभूतानेकनृपतिमण्डलपरिवृत ,तारागणैरिव भगवान् राकापति , गोमेदहीरकादिरत्नकलापगुम्फितमध्यास्ते स्म हैममासनमतुलवीर्यो महामतिर्महीपति । दक्षिणपार्श्वे प्रधानामात्यो वामपार्श्वे च चमूपतिरासन्दीमधितष्ठतु । अन्येऽपि सानुक्रम स्व स्वमासन भेजिरे ।

यथावारं सर्वेऽपि प्रार्थिनो महीभुजः पुरो निजावेदनमुदीरयामासुः । स च सस्मितमनायासञ्च यथार्थ न्यायमनुतिष्ठंस्तांस्तोषयामास । शुभेऽहनि तस्मिन् सुबहूनभिनन्दयन्ननेकेषामाशिषा धन्यवादानाञ्च भाजन बभूव भूप ।

(२)

नातिदूरे नृपासनान्मलिनाम्बरः कश्चिदेको मानवो नरपतेराननें दत्तदृष्टिस्तस्थौ । सोऽपि महीपतेरभिमुख साधारणसमितौ किञ्चिदावेदयितु समागत आसीत् ,परमास्थानमण्डपस्यादृष्टपूर्वामनेकाभरणपरिच्छदैर्भास्वरा सुषमासम्पत्तिमवलोक्य चकितचकितो नैजमावेदनमपि विसस्मार। नहि क्षितिभर्तृ सविधे स यात., नापि किमपि स प्रार्थितवान् ।

प्रसङ्गवशाद्धरापति प्रधानामात्य सम्बोध्य ऊचे—"भद्र ! जगतो यात्राया सुगमो निर्वाहाभ्युपाय कस्मादवगन्तव्य " । इति

प्रधानसचिव सानुनय भक्तिपुरस्सर चाह—"देव ! श्रिया." इति ।

तत्क्षणामेव सवेशे समासीनस्य तस्यानिर्णिक्त[1]वाससोऽपावृतमास्यम् । सप्रश्रय शनैश्चासाववादीत्—"सती पतिव्रता चेद्वर्तते स्त्री, यतस्तस्या सतीत्वाभावे पत्युरापत्परम्परा अवश्य भवेयु" इति ।

धराधिपतिरप्येतदशृणोत् । मुहुरपि च स सस्मितमन्वयुङ्क्त महामात्यमेव—"आर्य ! ससारे किमत्यधिकमुपयुज्यते ?" इति ।

प्रत्युत्तरित मन्त्रिणा—"देव ! दयापाथोनिधे ! धनमेवास्मिन् विषयेऽन्यानि वस्तून्यतिशेते" इति ।

भूयोऽपि—"धन चेत्करगतं भवति, मनुजश्च यदि तदुपयोगरहस्य वेत्ति । अन्यथा तद्भावाभावौ न विशिष्येते" इति स एव मलिनवासा शनकै सान्तस्तोष प्रौढमुवाच ।

महीपतिस्तद्वचोभिरतिशयेन तृप्तस्तदभिमुख सामोदमैक्षत । अनन्तर च तमात्मसन्निधौ सादर समाहूय प्रावोचत्—"को भवान् ? किंप्रयोजनश्चात्र मदन्तिके समागमनम् ? सर्वोऽपि स्वमनोऽनुरूपमस्मत्पुरो निवेद्य स्ववाञ्छित लब्धवान्, पर नहि भवता किमपि समुदीरित साम्प्रत यावत् । किमत्र निदानम् ?" इति ।

एवमनुयुक्तो नरपतिपुङ्गवेन—"विदधातु परेशोऽरिष्टतातिं[2] भवताम् । देव ! वसुन्धरापते ! अहमतिदरिद्र, पर विद्वान्,

---

१ "निर्णिक्त शोधित मृष्टम्" इत्यमर ।

२ अरिष्टस्य शिवस्य (=कल्याणस्य) भावमित्यर्थ ।

भवता राज्याधिवासी ब्राह्मण , पुस्तकान्येव मे धनम् , निजभार्या-हेतोश्चात्रागतं वेत्तु भवान् माम् । सा हि मे प्राणेभ्योऽपि प्रेयसी धर्माचारवती सती भार्या । सार्द्धं तया सानन्द जीवनकालकला अतिवाहयतो निजपुस्तकस्वाध्याये दिवानिशं रममाणस्य धर्म्यां साध्वीमवस्था परिषेवमाणस्य नाद्य यावत् कदाचिदप्यवकाश लब्धवती मे मानसे वित्तैषणा लौकिकसुखैषणा वा । गतवासरात् सा तीव्रेण कठिनामयेन ग्रस्ता । नहि मदन्तिके पानभोजनाय किञ्चित् , न चाप्यौषधपरिषेवणसामर्थ्यम् । अतो भवता सविधमुपस्थितोऽस्मि । तत साहाय्यदानेन देवो मामनु-गृह्णातु, स्थापयतु च परलोकेऽपि साम्राज्यम् । सततं पुनर्निजविद्यया बुद्ध्या च भवत. सेवायै सन्नद्धो भविष्यामि । अग्रे देव प्रमाणम् ।"—इत्येव स सविनयमावेद्य विरराम ।

क्षितिपतिस्तस्य सूनृता वाच निशम्य तदानने दृशं पातयामास । प्रख्यापयत स्म हि तस्य चक्षुषी अनुपमं तद्वैशारद्यम्

अथ महीपति प्रधानामात्यमादिदेश—"अद्यप्रभृति इम-मह स्वपरिषद सभास्तार[१]पदे नियोजयामि । भवद्भिश्चास्य निखिला आवश्यकता सम्पूरणीया " इति ।

---

१ "सभासद सभास्तारा सभ्याः सामाजिकाश्च ते" इत्यमर. ॥

अचिरादेव नृपादेशमन्वतिष्ठत् सचिव । समुपस्थितो भार्या चिकित्सितु तद्गेहेऽगदङ्कार [१] । सा चाचिरादेव निरामय भेजे ।

स चापि मनीषी विप्रो नियमेन राजपरिषद सभास्तारपदेनालञ्चकार । तत प्रभृति न खलु कदाचिन् सोऽदृश्यत पूर्वमिव मलिनाम्बरः । परमासीदच्छश्लक्ष्णवासा । तथापि स पूर्ववदेव स्वाध्यायनिरतोऽभूत् । राजपरिषत्कार्याल्लब्धावकाश, शास्त्रचिन्तन एवासीत् सतत व्यासक्तमना ।

स हि क्षमाया क्षमया[२], धैर्ये च हिमवता सदृश , परमभागवत सर्वेषामचिरादेव समादरभाजन बभूव । महीपतिश्च सर्वदैव समादरेण त सुबहु सत्कृतवान् । तस्य गेहिन्यपि पूर्व यथा दारिद्र्यावस्थाया देवभावनया तं समर्च्चयामास, तथैव तदानी सम्पत्तिसद्भावेऽपि महात्मभावनया सम्भावयामास । नूनमैश्वर्यसद्भावेऽपि पूर्ववदेव सहजसरलस्यापरिवर्तितहृन्मस्तिष्कस्य तस्य जीवनयात्राया केवल शरीरवसनेष्वेव समदृश्यत परिवृत्तिलव, न पुनराचारे स्वभावे वा ।

तथा खल्वेषोऽत्युदारै स्वगुणैर्नरपतेर्मनो जग्राह यत् क्षोणिपतिरेतस्य निखिलविद्यासु दाक्षिण्य, सकलकलासु च वैचक्षण्यमालोक्य निरतिशय प्रसन्न उत्तरोत्तरे पदे स्थापयन् क्रमेणामात्यपदे तं नियोजितवान् । समासाद्य तमधिकार सतत स्वकर्तव्यस्य

---

१ अगदङ्कार चिकित्सक ।

२ क्षमा पृथिवी ।

कर्मणा सत्यभावेन तत्प्रवणतया चानुष्ठानेन समधत्त पदमाशु स प्रजाजनचेत शिलापट्टेषु ।

(३)

राज्ञोऽन्येऽधिकारिण सवीच्य तस्याभ्युन्नति दिने दिने चाभिवृद्धिमीर्ष्याकलुषितचेतसोऽचिन्तयन्—अहो, अय दरिद्र एव गुरुपदमारूढो यदस्मानपि शास्तीति !

आश्चर्यम्, अपरित्याज्यो हि दुःस्वभावो दुर्मतीनाम् !

ते हि तद्विरुद्ध कर्तुं व्यवसिता मिथो मन्त्रयाञ्चक्रिरे। अन्ततस्तेषामेको रहसि कदाचन लब्धावसरो नरपतिमेवमुदीरयामास "क्षमापते ! देव ! अयमतीव मायिको[१] विप्र । इन्द्रजालेन ह्यनेन वशीकृतो भवान्। एवं हि जनप्रवाद —यद्भवदभिमुखमागमनात्पूर्वमय नियतमेव निजगेहप्रकोष्ठे प्रविशति। स च सततमनपावृतद्वारको वर्तते। तत्रास्ते पुनरेका रजतमयी लघ्वी मञ्जूषा। इन्द्रजालमयी च सा। तामुद्घाट्य किञ्चित्तान्त्रिककृत्यमनुष्ठायैवाय भवतामभिमुखमायाति—इति। किञ्च न भवति यद्यय मायावी, कथङ्कारमन्यथा झटित्येवामात्यपदमारूढ । देव ! सावधानैर्भाव्य भवद्भि । नहि जात्वेतादृशो दरिद्रो विशिष्ट कारणमन्तरेण सहसैतामवस्थामाप्तु

१ मायिको मायावी ।

शक्नोति। नूनमेतस्या मञ्जूषाया एव विलसित यद्भवान-प्येतद्वश्य समजनि। झटित्येवायममात्यपदमारूढ, न ज्ञायते किमग्रे भावि ? अतो मायामञ्जूषा प्रति सततमेव सावधानस्तिष्ठतु भवान्" इति ।

एवमाकर्ण्य तस्य वाग्जाल भूप प्रथमन्तु सर्वमेतज्जाड्य-हेतुक वा ईर्ष्याकारित वा इत्येवामन्यत। पर यदानेकैरधि-कारिभि स्ववशसम्भूतैरपि च बन्धुभिर्बहुवारमेव भणितस्तदा कश्चित्सन्देहलवस्तस्मिन् विषये तस्य मनसि प्रादुर्भूत । सत्यमेवोच्यते—

सुजनानामपि हृदय पिशुनपरिष्वङ्गलिप्तमिह भवति।
पवन परागवाही रथ्यासु वहन् रजस्वलो भवति॥

एवमेव गच्छति काले कस्मिंश्चिद् वासरे सततमेव मिथ्या-वचोभि स्वकर्णमापूरयतस्तानखिलान् कर्णेजपान्[१] समाहूय— "नित्य युष्माक वचासि शृण्वन्नह सञ्जातोऽस्मि खिन्नचेता । अद्य तद्गृहमेत्य सर्वेषामभिमुख तामिन्द्रजालमञ्जूषामीक्षिष्ये" इत्येव-मब्रवीद् भूपति । जाता सर्वेऽपि सज्जा । राजा च समादाय तानखिलान् साकमात्मना समुपस्थितस्तस्यामात्यस्य गेहम् । स च बहुमानपुरस्सर धन्यमन्य स्वागतमतिमात्र महीपतेरन्वतिष्ठत् ।

---

१ "कर्णेजप. सूचक स्यात्" इत्यमर ।

अथ तेन सत्कृते समुपविष्टे च बहुमूल्यासनोपरि राजनि अन्येषु च यथायोग्यमासनमधिष्ठितेषु तयो राजमन्त्रिणोरेवमुक्ति-प्रत्युक्तिरूप सवाद सववृते—

राजा—आर्य ! साम्प्रतमेव मया सार्द्धमास्थानमण्डपमेतु भवान् । अस्ति कस्मिंश्चिद् विषये मन्त्रणीयम् ।

मन्त्री—देव ! प्रसीदति चेद्भवास्तर्हि रहसि किञ्चित् क्षणं निर्धार्य भवतां पुरस्तादुपस्थितो भवामि ।

[सर्वेऽप्येतदाकर्ण्य साभिप्राय परस्परमिङ्गित विदधुः ।]

राजा—मन्त्रिन् ! कार्यस्य गुरुतया सपदि गन्तव्यमित्येव मदीय आदेश ।

मन्त्री—[सवितर्काशङ्क सविनयञ्च] महाराज ! क्षण याव-द्रहसि गन्तुमनुजानातु ।

राजा—[विविधविकल्पेषु निमज्जन्] रहसि किंनिमित्तं गमनम् ?

मन्त्री—देव ! क्षण यावदेव प्रकोष्ठं गत्वा साकमत्रभवद्भि परि-षत्प्रासादं यामि ।

[सर्वेऽप्यधिकारिण पुलकितवदना बभूवु ।]

राजा—अस्तु । गच्छतु प्रकोष्ठे, पर मद्द्वितीयो भवान् ।

मन्त्री—(सभयम्) नरपते ! मा वात्तीद् भवान् कष्टम् । नैष प्रकोष्ठो भवतो गमनाय समुचित । यत इहास्ते मामकीना मुख्या सम्पद् । सा च भवतो दृष्ट्यातिलध्वी ।

राजा—(नूनमयमैन्द्रजालिक इत्यवितथो लोकप्रवाद इति मन्यमान) मन्त्रिन् ! नून मयापि नियतमेव प्रकोष्ठाभ्यन्तरे गन्तव्यम् ।

मन्त्री—भवतु । यथाभिरोचते श्रीमते ।

अथ राजा सहान्यैर्निजाधिकारिभिरन्त प्रविवेश । तत्र हि प्रकोष्ठे नासीदासनम्, नापि काचिदलङ्करणसामग्री, न चापि बहुमूल्य किञ्चिदन्यत् । केवल भित्तिनिखातालयेषु पुस्तकान्यासन् संस्थितानि । एकत्र चत्वारो वेदा । एकत्र ब्राह्मणानि । अन्यत्र ह्युपनिषन्निबन्धा । अपरत्र नाटकाख्यानकथादर्शनप्रभृतिप्रबन्धा । मध्येभागं चैका रजतमयी मञ्जूषा स्थितासीत् । अनुयायिभि ससङ्केत बोधितो राजा तदुद्घाटनाय समादिष्टवान् । राजादेशानुसार च यावदेव सोद्घाट्यते तावदेव स तस्यां मलिनानि च्छिन्नानि च चीवराणि वीक्ष्य साश्चर्य सभय चाह—किमेतत् ?—इति ।

मन्त्री—देव ! पुरातनानीमानि मे दारिद्र्यावस्थाया वासांसि; एतदर्थञ्च सुगूढ सरक्षितानि मया यदहमहरहो वीक्ष्यैतानि पुरा-

तनी मामकीनामवस्था स्मरेयम्। कदापि च न विस्मरेय पुरा कीदृशोऽहमासमिति। नित्यमेव सभायामुपस्थानात् प्राक् त्तरा-महमेतानि पश्यामि। कदाचित् परिदधाम्यपि। कीदृश आस-महम्? किं भवत्यैश्वर्ये? किं जायते दारिद्र्ये? केवलमेता-वत्स्मरणार्थमेव सयत्नमेतानि स्थापितानि।

सत्यमयमेवाभ्युपायो येन "क्षणक्षयिणि सापाये भोगे रज्यन्ति नोत्तमा", सम्पत्तिसद्भावेऽपि च "कोऽर्थान् प्राप्य न गर्वित" इतिसाधारणनियममुल्लङ्घयानुत्सेक[१]स्तेषा दृश्यते। एतादृशानेवोद्दिश्य महामतेर्भर्तृहरे· सुभाषितम्—

अनुत्सेको लक्ष्म्या निरभिभवसारा परकथा·
सता केनोद्दिष्ट विषममसिधाराव्रतमिदम्॥ इति॥

(४)

राजा साश्चर्य सस्नेहञ्च तद्वचो निशम्य सभायामेत्य सर्वा-स्तान् पिशुनास्तिरश्चक्रे भर्त्सयामास च। अनन्तर च स्वबान्ध-वानब्रवीत्। उद्तेजयन् हि मा भवन्त सर्वदा तत्ताडनाय। अद्य दास्याम्यह तस्मै दण्डम्। तच्चैतद् यदद्यप्रभृति स मे प्रधानामात्य सञ्जात। अत ऊर्ध्वञ्च यदपि किञ्चित्स आदिशति तन्मदीय एवादेश इति कृत्वा सर्वैरङ्गीकर्तव्यम्।

---

१ उत्सेको गर्व ।

तदत्रैतद्द् हृदयम् । उन्नतिपदाभिलाषिभि· स्वीया पूर्वावस्था नहि विस्मर्त्तव्या। अथवा, एतदेव महात्मना लक्षण यत्—

धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चला ।
प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिन ।।

तादृशानेवाभिलक्ष्य गीयते—

ये दीनेषु दयालव स्पृशति यानल्पोऽपि न श्रीमदो
व्यग्रा ये च परोपकारकरणे हृष्यन्ति ये याचिता ।
स्वस्था सन्ति च यौवनोन्मदमहाव्याधिप्रकोपेऽपि ये
तै स्तम्भैरिव सुस्थितै कलिभरक्लान्ता धरा धार्यते ।।

इति ।

---

(१६)

पुरुषार्थचतुष्टम्

इह चत्वार पुरुषार्था भवन्ति तद्यथा अर्थ कामो धर्मो मोक्षश्चेति। **तत्रार्थ एव प्रधान· पुरुषार्थ इति केचिन्मन्यन्ते।** अर्थनिचयकलित पुरुषो लोके जराजीर्णशरीरोऽपि उन्मत्तपञ्चविंशतिकतरुणनराकार प्रतीयते। अतिकातरहृदयोऽपि महासमरसङ्घट्टनिर्व्यूढ[1] साहसोऽतुलबलपराक्रम इति गीयते। सिद्ध-

१ निर्व्यूट प्रवृद्ध. ।

मातृकापाठमात्रशक्तिविकलबुद्धिरपि समस्तशास्त्रार्थावगाहनचतु-रमतिरिति बन्दिभि पठ्यते। कुरूपतया नितरामदर्शनीयोऽपि चाटुकरणपरायणै सेवकनरैरवजितमकरकेतु[१]रिति हेतुभि स्थाप्यते। अविद्यमानप्रभावगन्धोऽपि समस्तवस्तुसाधनप्रवणप्रभावोऽयमिति सर्वत्र तद्धनलुब्धबुद्धिभि प्रकाश्यते। जघन्यघटदासिकातनयोऽपि प्रख्यातोन्नतमहावंशप्रसूतोऽयमिति प्रणयिजनै स्तूयते। आसप्तम-कुलबन्धुतासम्बन्धविकलोऽपि परमबन्धुबुद्ध्या समस्तलोकैर्गृह्यते। तदिद समस्तमर्थस्य भगवतो विलसितम्।

किञ्च—समाने पुरुषत्वे समसंख्यावयवा पुरुषा यदेते दृश्यन्ते लोके, यदुत एके दायका अन्ये तु याचका, तथैके नरपतयोऽन्ये पदातय, तथैके निरतिशयशब्दाद्युपभोगभाजनम् अन्ये तु दुष्पूरोदरदरीपूरणकरणेऽप्यशक्ता, तथैके पोषका अन्ये पोष्या इत्यादयो नि शेषविशेषा निजसद्भावासद्भावा-भ्यामर्थेनैव सम्पाद्यन्ते। तस्मादर्थ एव प्रधान पुरुषार्थ। अत एवोच्यते—

अर्थाख्य· पुरुषार्थोऽय प्रधान प्रतिभासते।
तृणादपि लघु लोके धिगर्थरहित नरम्॥

काम एव प्रधान· पुरुषार्थ इत्यन्ये मन्यन्ते। तथा हि।

---

१ मकरकेतु काम·।

न खलु ललितललनावदनकमलमकरन्दास्वादनचतुरचञ्चरीक-[1] ताचरणमन्तरेण पुरुष परमार्थत पुरुषता स्वोकुरुते। किञ्च, अर्थ-निचयस्य कलाकौशल्यस्य धर्मार्जनस्य जन्मनश्च काम एव वस्तुत परम फलम्। कामविकलै पुन किमेते सुन्दरैरपि क्रियते। अन्यच्च। कामासेवनप्रवणचेतसा पुरुषाणा तत्स-म्पादका धनकनककलत्रादयो योग्यतया स्वत एवोपतिष्ठन्ते। "सम्पद्यन्ते भोगिना भोगा" इति गोपालबालाबलादीना सुप्र-सिद्धमिदम्।

अपि च—

स्मित न लक्षेण वचो न कोटिभि-
न कोटिलक्षै सविलासमीक्षितम्।
अवाप्यतेऽन्यैरदयोपगूहनं
न कोटिकोट्यापि तदस्ति कामिनाम्॥

अत किन्न पर्याप्त तेषाम्। तस्मात्काम एव प्रधान पुरुषार्थः। अत एवाभिहितम्—

कामाख्य पुरुषार्थोऽय प्राधान्येनैव गीयते।
नीरस काष्ठकल्प हि धिक्कामविकल नरम्॥

धर्म एव प्रधान. पुरुषार्थ इत्यन्ये मन्यन्ते। तथा हि।

---

१ चञ्चरीको भ्रमर।

तुल्ये जीवत्वे किमिति एके पुरुषा कुलक्रमागतद्रविणोपचितेषु गुरुतरचित्तानन्दसन्दर्भधामसु निःशेषजगदभ्यर्हितेषु कुलेषूपजायन्ते, किमिति चान्ये पुरुषा एव धनगन्धसम्बन्धविकलेषु समस्तदुःखभरभाजनेषु सर्वजननिन्दनीयेषु कुलेषूत्पद्यन्ते।

तथा किमिति एकजननीजनकतया सहोदरयोर्यमलयोश्च द्वयो पुरुषयोरेष विशेषो दृश्यते यदुत एकस्तयोर्मध्ये रूपेण मीनकेतनायते, प्रशान्ततया मुनिजनायते, बुद्धिविभवेनाभयकुमारायते, गम्भीरतया क्षीरनीरेश्वरायते, स्थिरतया सुमेरुशिखरायते, शौर्येण धनञ्जयायते, धनेन धनदायते, दानेन कर्णायते, नीरोगतया वज्रशरीरायते, प्रमुदितचित्ततया महर्द्धिविबुधायते। ततश्चैव निःशेषगुणकलाकलापकलितोऽसौ सकलजननयनमनोनन्दनो भवति। द्वितीय पुनर्बीभत्सदर्शनतया भुवनमुद्वेजयति, दुष्टचेष्टतया मातापितरावपि सन्तापयति, मूर्खशेखरतया पृथ्वीं विजयते, तुच्छतयार्कशाल्मलीतूलमतिशेते, चपलतया वानरलीला विडम्बयति, कातरतया मूषककदम्बकमधरयति, निर्धनतया रौरवाकारमाबिभर्त्ति, कृपणतया ढक्कजातीयानतिलङ्घयति, महारोगभराक्रान्ततया विक्लव क्रन्दमानो जगतोऽप्यात्मनि कारुण्यमुत्पादयति, दैन्योद्वेगशोकाद्युपहतचित्ततया घोरमहानरकाकार सन्तापं स्वीकुरुते। ततश्चैव समस्तदोषभाजनतया लोकै पापिष्ठो दुष्टोऽयमिति निन्द्यते।

अन्यच्च—द्वयो पुरुषयोरनुपहतसत्त्वबुद्धिपौरुषपराक्रमयोर्निःशेषविशेषैस्तुल्यकक्षयोरर्थोपार्जनार्थं प्रवर्तमानयो किमित्येको यद्यदा-

रभते कृषिं पाशुपाल्य वाणिज्य राजोपसेवामन्यद्वा तदर्थं कर्म तत्तत्सफलतामुपगच्छति। इतरस्य पुनस्तदेव कर्म न केवल विफल सम्पद्यते, किन्तर्हि पूर्वपुरुषोपार्जितमपि धनलव वैपरीत्यापत्त्या प्रत्युत नि शेषयति।

अन्यच्चेदमपि चिन्तनीय यदुत द्वयोरेव पुरुषयोर्निरुपचरिता. पञ्चप्रकारा शब्दादिविषया क्वचिदुपनमन्ते। तत्र तयोरेकः प्रबलशक्ति. प्रवर्द्धमानप्रीतिस्ताननवरतमनुभवति। द्वितीयस्य पुनरकाण्ड एव किमिति कार्पण्यरोगादिक कारणमुत्पद्यते येन वाञ्छन्नपि तानेव भोक्तु न शक्नोतीति।

न ह्येवविधाना विशेषाणा जीवेषु जायमानाना परिदृष्ट किञ्चित्कारणमुपलक्ष्यते। न चाकारण किञ्चिद्भवितुमर्हति। यदि पुनरकारणा एवविधा विशेषा भवेयुस्तत सर्वदा भवेयुर्यथाकाशम्, न वा कदाचिद् भवेयुर्यथा शशविषाणादय। यतश्चैते क्वचिद् भवन्ति क्वचिन्न भवन्ति, तस्मान्नैते निष्कारणा इति गम्यते।

किं पुनरेतेषामुत्पादक कारणम् (इति चेदुच्यते)। समस्तानामपि जीवगताना सुन्दरविशेषाणा धर्म एवान्तरङ्ग कारण भवति। स एव हि भगवानेन जीव सुकुलेषूत्पादयति, नि शेषगुणमन्दिरता नयति, समस्तानुष्ठानान्यस्य सफलयति, उपनतभोगाननवरत भोजयति अन्याश्च समस्तशुभविशेषान् सम्पादयति।

तथा सर्वेषामपि जीवगतानामशोभनविशेषाणामधर्म एवान्तरङ्ग कारणम्। स एव हि दुरन्तोऽमु जीवं दुष्कुलेषूत्पादयति,

निःशेषदोषनिवासतां प्रापयति, सर्वव्यवसायानस्य विफलयति, उपनतभोगोपभोगविघ्नभूतं शक्तिवैकल्यं जनयति, अपरांश्चामनोज्ञाननन्तान् विशेषानस्य जीवस्याधत्ते।

तस्माद्यद्बलेनैताः समस्तसम्पदः स एव धर्मः प्रधानः पुरुषार्थः। अर्थकामौ हि वाञ्छतामपि पुरुषाणां न धर्मव्यतिरेकेण सम्पद्येते। धर्मवतां पुनरतर्कितौ स्वत एवोपनमेते। अतोऽर्थकामार्थिभिः पुरुषैः परमार्थतो धर्म एवोपादातुं युक्तस्तस्मात्स एव प्रधान इति।

यद्यप्यनन्तज्ञानदर्शनवीर्यानन्दात्मकजीवस्वरूपावस्थानलक्षणश्चतुर्थोऽपि **मोक्षरूपः पुरुषार्थो** निःशेषक्लेशराशिविच्छेदरूपतया स्वाभाविकस्वाधीनानन्दात्मकतया च प्रधान एव, तथापि तस्य धर्मकार्यत्वात् तत्प्राधान्यवर्णनेनापि परमार्थभूतस्तत्सम्पादको धर्म एव प्रधानपुरुषार्थ इति दर्शितं भवति। तथा चाभ्यधायि भगवता—"**धनदो धनार्थिनां धर्मः कामार्थिनां सर्वकामदः, धर्म एवापवर्गस्य पारम्पर्येण साधकः**" इति। नातः प्रधानतरं किञ्चिदस्तीत्युच्यते—

धर्माख्यः पुरुषार्थोऽयं प्रधान इति गम्यते।
पापग्रस्तं पशोस्तुल्यं धिग् धर्मरहितं नरम्॥

[उपमितिभवप्रपञ्चाख्यकथायां.

(१७)

परोपकारः

इह भुवने नानाविधा मानवा समायान्ति दृष्टिगोचरताम्। तत्र "स्वभावो दुरतिक्रम", "स्वभावो मूर्ध्नि वर्तते" इति नियमानुकूल यस्य यादृश स्वभाव स तादृशमेवाचारमाचरति। केचिन्नरपुङ्गवा अपर्यालोच्यैव नैजहानिलाभौ स्वकर्तव्यमेतदिति मन्यमाना परहितानुष्ठानरता अविरत समासते। अन्ये पुनर्नोद्दिश्य परारम्भप्रत्यूह स्वीयमारम्भमारभन्ते, तथापि "सर्वं स्वार्थं समीहते" इति सामान्यनियममनुसृत्य स्वार्थाविरोधेनैव परकार्य सम्पादयन्ति, यद्वा स्वीयव्यापारविधाने व्यग्रा परसम्बन्धिनी हानिमपि स्वकार्यवशादेव जायमाना नहि गणयन्ति। अपरे तु "अमर्षण शोणितकाङ्क्षया किं पदा स्पृशन्त दशति द्विजिह्व" इति वचनानुसारं निष्कारणवैरिणो दुर्जनस्वभावा स्वकार्यसिद्ध्यसिद्ध्योर्विचारमुपेक्ष्य कारण विनैव परारम्भप्रत्यूह-[१] साधनान्येव चिन्तयन्तस्तिष्ठन्ति, परेषामनर्थाचरणेन च परम सन्तोषमनुभवन्ति।

तेष्वेतेषु भेदेषु प्रथममुक्ता समारोहन्ति परामुत्कर्षपदवीम्। द्वितीयविधास्तु मध्यमकक्षामवगाहन्ते। चरमकथितास्तु चरमा

---

१ "विघ्नोऽन्तराय. प्रत्यूह." इत्यमर।

मेव पदवी भजन्ते। तदत्र स्मृतिपथमायाति नीतिज्ञधुरन्धरस्य तत्रभवतो भर्तृहरेर्भणितिरियम्—

एके सत्पुरुषा परार्थघटका स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृत स्वार्थाविरोधेन ये।
तेऽमी मानुषराक्षसा परहित स्वार्थाय निघ्नन्ति ये
ये निघ्नन्ति निरर्थकं परहित ते के न जानीमहे ॥

तत्र ये परोपकार स्वकर्तव्यत्वेनानुतिष्ठन्ति तेषु खलु कारुण्य वस्तुत समालोक्यते। करुणागारत्वेनैव तेऽपारयन्तोऽन्यदीय-दु खसन्तति दृग्गोचरतामानेतु परोपकारपरा सजायन्ते। उक्त च "करुणार्द्रा हि सर्वस्य सन्तोऽकारणबान्धवा" इति। सुस्वभावसम्पन्ना हि ते "आत्मन प्रतिकूलानि परेषा न समाचरेत्" इति लक्ष्यमनुवर्तमाना "अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णा शमयति परिताप छायया सश्रितानाम्" इत्युक्तेरादर्शीभूता नानाविधयातना आत्मनानुभूयापि सतत परशुभाशसिन करुणापरा परहितानुष्ठानतत्पराश्च भवन्ति। अपराधिनमपि क्षमन्ते। स्वदशाया समुत्कृष्टतरदशायामपरमवेक्ष्य तमतिशयितु तत्साम्यमासादयितु वा काम भवतु तेषा प्रयास। न पुनर्जातु ते परस्मा ईर्ष्यन्ति द्रुह्यन्ति वा। नापि तस्य हानिमनिष्ट वा प्रति हेतवो भवन्ति। स्वार्थसम्पादनाय नहि कर्हिचित् कञ्चन प्रतारयन्ति। नहि छद्मना प्रवर्तन्ते। नापि मिथ्याभाषिणो भवन्ति। एतादृश एव मानव-

कुलतिलका सत्पुरुषाभिख्या भजन्ते। सर्वत्रैव तादृशा सत्कृतिभाजनानि सकललोकस्य स्तुतिसमाधाराख्रिलोकी धन्यता नयन्ति। तानेवाभिलक्ष्य गीयते—

मनसि वचसि काये पुण्यपीयूषपूर्णा-
त्रिभुवनमुपकारश्रेणिभि प्रीणयन्त·।
परगुणपरमाणून पर्वतीकृत्य नित्य
निजहृदि विकसन्त. सन्ति सन्त कियन्त ॥

स्वभावेनैव हि सन्त परहितप्रारब्धवीरव्रता अनभिसन्धिप्रणयिनश्च। स्वार्थलवेनापि हि तेऽस्पृष्टा परकार्य साधयन्ति। तथा चाभियुक्तोक्तय —

उपकर्तुं प्रिय कर्तुं कर्तुं स्नेहमकृत्रिमम्।
सज्जनाना स्वभावोऽय केनेन्दु शिशिरीकृत ॥
पिबन्ति नद्य· स्वयमेव नाम्भ
स्वय न खादन्ति फलानि वृक्षा।
नादन्ति शस्यं खलु वारिवाहा.
परोपकाराय सता विभूतय ॥

अपि च।

ते साधवो भुवनमण्डलमौलिभूता
ये साधुता निरुपकारिषु दर्शयन्ति।
आत्मप्रयोजनवशीकृतखिन्नदेह
पूर्वोपकारिषु खलोऽपि हि सानुकम्प ॥

जयन्ति जितमत्सरा परहितार्थमभ्युद्यता·
पराभ्युदयहर्षिता परविपत्तिखेदाकुला. ।
महापुरुषसत्कथाश्रवणजातकौतूहला
समस्तदुरितार्णवप्रकटसेतव साधव ॥

परस्परापेक्षायुक्ता हि सर्वेषा व्यवहारा अस्मिन् जगति। तत्र ये "जात्यैवैते परहितविधौ साधवो बद्धकक्षा·" इत्येवं स्वभावेनैव परहितसाधनबद्धपरिकरास्तानेवाश्रित्य जगदिद सत्यपथानुगं वर्तते। सर्वे धर्मा, अखिलाश्च विद्या, अन्यानि च सर्वहितकराणि कार्याण्येतादृशैरेव सत्पुरुषै प्रवर्तितानि। अत एव सर्वधर्माणा मूल यदेष परोपकार ।

न केवल श्रुतिस्मृतिप्रतिपादितत्वेनैव सदाचारत्वेनैव वा परोपकारस्य धर्मत्व, किन्तु प्राणिमात्रस्य प्रियकारणत्वेनापि। तथा हि, यदा नु कश्चित्कस्याप्युपकुरुते कथमिवामन्दमानन्दमनुभवन् स उपकृत उपकर्तुर्गुणान् गायति। आत्मानुभवेनैव परेषा वृत्तान्यवगन्तुमीहन्ते सन्त । यदा खलु दु खसागरमग्नान् कष्टसन्ततिविषण्णचेतसोऽस्मान् कश्चिद् दयार्द्रचेता समुद्धरति, कमप्यनिर्वचनीयमनवधिमानन्दमनुभवत्प्रमोदतेऽस्मदीय चेत. । तथैव खल्वस्माभिरपि समुद्ध्रियमाणा दु खोदधेरपरेऽपि प्राणिनोऽवश्यमेव कामपि परमानन्दसीमासम्पत्तिमासादयन्तीत्यनुमीयते ।

वस्तुत परोपकारेण न केवल परेषामेव लाभ आनन्दातिशयश्च जायते, किन्तु परोपकारमाचरतोऽप्यन्त.करणे कश्चिदवर्णनीय.

सन्तोष. समुत्पद्यते। अत एव "परोक्षप्रिया हि देवा प्रत्यक्षद्विष" इतिश्रुत्यनुरूप दूरदर्शिन सन्तो वास्तवं स्वार्थमात्मकल्याणरूप नि श्रेयसापरपर्याय समीहमाना लोकपरलोकसहाय परोपकार-मेवाश्रयन्ते। अत एव च

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकार पुण्याय पापाय परपीडनम्॥

इति समुज्जृम्भतेऽमृतमयी वागिय परोपकारस्य सर्वधर्मापेक्षया श्रैष्ठ्य प्रतिपादयन्ती।

तस्मात्सर्वै समाश्रयणीयोऽय धर्मो य एष परोपकारो नाम।

(१८)

का हि पुङ्गणना तेषां येऽन्यशिक्षाविचक्षणाः।
ये स्व शिक्षयितुं दक्षास्तेषां पुङ्गणना नृणाम्॥

इह खलु विचित्रचरित्रचित्रिते जगति केचिदेव विरला एतादृशा नरपुङ्गवा ये यदपि किञ्चित्परस्योपदिशन्ति स्वयममि तत्सम्यगा-चरन्ति। परम् असख्या एव ते समालोच्यन्ते ये सभास्वन्यत्र वा वावदूका नितरामेव सत्पुरुषान्गर्हयन्तो नानाविधशब्दाडम्बरै परेभ्यो धर्मोपदेश वितरन्ति। तथापि स्वकीया तेषामवस्थातीव गर्हणीया भवति। तेषा स्वकीयाचरणेषु स उपदेशोंऽशमात्रमपि

न दृश्यते। एतादृशानेवालोचयतो मनसि नितरां कदर्थनामनुभवतः कस्यापि कवेर्भणितिरियम्—

का हि पुङ्गणाना तेषामित्यादि।

तद्यथानुश्रूयते। कस्मिश्चिद् ग्रामे ब्राह्मण एक प्रतिवसति स्म। तस्य भवदत्तभवदेवनामानौ द्वौ सूनू अभूताम्। कालेन तयोर्ज्यायान् भवदत्तो बौद्धसन्यासिनामुपदेशेन गृहीतक्षपणकवेशस्तैरेव सार्द्धं गत, नितरां विरक्तश्चाभूत्।

एकदा तेषा क्षपणकानामेक स्वमठाधीशादेशेन ग्रामान्तरं गत। तत्रैव तस्य भ्रातापि निवसति स्म। स्वभ्रातुरन्तिक तस्य क्षपणकत्वापादनार्थमुपस्थित स भ्रात्रात्यन्तं न्यक्कृत खलीकृतश्च। एव विफलमनोरथः स स्वमठ प्रत्यागतोऽखिल तत्स्वभ्रातृवृत्त कुलाधीशाय निवेदितवान्। उपहसितश्चासावतिशयेन तद्भ्रातृगर्हणापरै सर्वैं क्षपणकै।

अथ गोष्ठीप्रसङ्गेन भवदत्तस्तैरभिहित। किं भवानपि स्वभ्रातुः क्षपणकत्वापादन एवमेवासमर्थ इति। तेनोक्तम्। नाहमशक्त। प्रतिजाने च यदवश्यमेव स्वभ्रातर क्षपणकतामानेष्यामीति।

तत एकदा कुलाधीशेन सह पर्यटन् भवदत्तो यात्राप्रसङ्गेन स्वाभिजनग्रामसमीपमेवाध्युषित। तदादेशेन च प्रतिज्ञातार्थसम्पादने दृढमतिर्निजभ्रातृभवन तस्य साक्षात्करणाय गतवान्। तत्र

च तस्य विवाहस्तस्मिन्नेव वासरे निर्वृत्त आसीत्। अथास्यानुजो भवदेव स्वभ्रातर समागतमालोच्य यथोचितोत्थानादिशिष्टाचारै सत्कृतवान्। प्रस्थित च तमनुसरन् बहुदूर यावन्मठाधीशान्तिकमुपस्थित.। प्रत्यक्षत सफलमनोरथो भवदत्त कुलाधीशेन पृष्ट। किमथमानीत क्षपणकताग्रहणार्थमिति। भवदत्तेन च बाढमित्यभिहितम्। भवदेवोऽप्येतमर्थ पृष्टोऽब्रवीत्। अस्तु एवमेव, मा पुनर्मे भ्राता मृषावादी भूदिति।

एव भवदत्तेन स्वानुजो भवदेव क्षपणकतामानीतो गृहीतक्षपणकवेशस्तैरेव सार्द्धं निवसन्नस्मरन्नेव वाबला स्वभार्या चिरकाल निनाय। कालेन तस्य ज्यायान् भ्राता भवदत्त स्वर्गपथमारूढ। भवदेवस्तु तदनन्तर यस्य सत्यवादित्वरक्षणाय मया क्षपणकताङ्गीकृता सोऽधुना पञ्चत्व गत इति विचार्य, हन्त! सा वराकी, या मयातिनिष्ठुरेण विवाहदिवस एव परित्यक्ता, साम्प्रत तुहिनाविलेव पद्मिनी मरुमध्यगतेव च मराली ननु का महती कष्टा दशामनुभवन्ती स्यादिति जिज्ञासयैकदा केनचिदपदेशेन स्वग्राम गत। प्रतीक्षमाणश्च ता स्वभवनद्वारि स्थित। क्षणेन च तस्माद् गेहाद् बहिर्निर्गच्छन्त्यौ द्वे स्त्रियौ तेन पृष्टे। कि परिचिता भवत्योर्नागिला (इदमेव तस्य पत्न्या नामासीत्)। परिचिता चेत्का दशामनुभवति सेति।

तयोरेका नागिलैवासीत्। सा च कृताधोमुखी सविनयमब्रवीत्। सा हि 'वियोगवासरादेव देवदेव भगवन्तमुमापतिं निध्यायन्ती कालमतिवाहयति। अहमेव च सा नागिलास्मीति।

ग्तस्मिन्नेवान्तरे कश्चिद् बाल आक्रन्दन् गृहान्निर्ययौ। साग्रह चाब्रवीद् यदह स्ववान्तं भक्षयिष्यामि। त सान्त्वयन्भवदेव आह। सौम्य! नहि वान्त पुनरादत्ते कश्चित्। महद् गर्हणीय हि तदिति।

एवमुक्तवत्येव भवदेवे नागिला एतद्व्याजेनैवोपदेशावसर मन्यमानावोचत्। "देव! किं तथ्यमेवमेव मन्यसे। आहोस्वित्ते परोपदेश एव पाण्डित्यम्। कि पर्वते ज्वलन्तमग्नि पश्यसि, न पुनरक्ष्णो पुरस्तात्स्थितम्। यस्माद् बालन्तूपदिशति भवान् यदेकवार त्यक्त नैवादत्ते विद्वान्। पर पूर्वं वर्जिता मा पुनर्ग्रहीतुकामोऽस्ति! सत्य सुखमुपदिश्यते परस्य! अथवा किं नात्रैतत्सुभाषित चरितार्थ भवति—

का हि पुङ्गणना तेषा येऽन्यशिक्षाविचक्षणा।
ये स्व शिक्षयितु दक्षास्तेषा पुङ्गणना नृणाम्।।" इति।।

अयं भाव।

स्वभावेन परोपदेशकुशला एव बहुशो मानवा समालोक्यन्ते ससारे। नाममात्रेणैव ते मानवा। उपदेशानुगुण स्वयमाचारमनाचरता तेषामेतादृश परोपदेशपाण्डित्य केवलं वाचालत्वमेव ख्यापयति। स्वयमाचारविहीनाना तेषामुपदेशोऽपि नहि परान् सदाचारमार्गावलम्बिन सम्पादयितुं प्रभवति। ये पुन प्रथममात्मान शिक्षयन्ति, पश्चात्तु निजानुभवेन सत्यानृते विविच्य करुणाप्लावितचेतस परानप्युपदिशन्ति

धर्मे त एव धन्या सर्वजगत्पूजास्पदीभूता मानवजन्म सार्थकता नयन्ति। अत एवोच्यते—

परोपदेशे पाण्डित्य सर्वेषा सुकर नृणाम्।
धर्मे स्वयमनुष्ठान कस्यचित्तु महात्मन ॥

---

(१९)

सत्सङ्गतिः

सत्सङ्गतिः कथय किं न करोति पुंसाम्।

(१)

श्रेय समाधत्ते यथा तथाप्युपनत सत्सङ्गम इति सज्जनापाश्रयेण श्रेयोऽर्थिना भवितव्यम्।

तद्यथानुश्रूयते। बोधिसत्त्वभूत किलाय भगवान्यश प्रकाशवशे गुणपरिग्रहप्रसङ्गात्[1] सात्मीभूतप्रजानुरागे प्रतापानतदृप्तसामन्ते श्रीमति कौरव्यराजकुले जन्म प्रतिलेभे। तस्य गुणशतकिरणमालिन सोमप्रियदर्शनस्य सुतस्य सुतसोम इत्येव पिता नाम चक्रे। स शुक्लपक्षचन्द्रमा इव प्रतिदिनमभिवर्धमानकान्तिलावण्य,

---

१ प्रसङ्ग प्रसक्तिरनुराग ।

कालक्रमादवाप्य साङ्गेषु सोपवेदेषु च वेदेषु वैचक्षण्य, दृष्टक्रम. सोत्तरकलाना[1] कलाना लोक्याना[2], लोकप्रेमबहुमाननिकेतभूत सम्यगभ्युपपत्ति[3]सौमुख्यादभिवर्धमानादरात् परिपालननियमाच्च बन्धुरिव गुणाना बभूव ।

अतश्चैन स राजा लोकपरिपालनसामर्थ्यादक्षुद्रभद्रप्रकृतित्वाच्च यौवराज्यविभूत्या सयोजयामास ।

विद्वत्तया स्वासु[4]रतीव तस्य प्रियाणि धर्म्याणि सुभाषितानि ।
आनर्च पूजातिशयैरतस्त सुभाषितैरेनमुपागमद्य ॥

अथ कदाचित्स महात्मा कुसुममासप्रभावविरचितकिसलयलक्ष्मीमाधुर्याणि प्रविकसत्कुसुममनोज्ञप्रहसितानि प्रविततनवशाद्वल[5]कुथास्तरणसनाथधरणीतलानि कमलोत्पलदलास्तीर्णनिर्मलनीलसलिलानि भ्रमद्भ्रमरमधुकरीगणोपगीतानि अनिभृतपरभृतबर्हिगणानि मृदुसुरभिशिशिरसुखपवनानि मन प्रसादोद्भावनानि नगरोपवनान्यनुविचरन्नन्यतममुद्यानवन नातिमहता बलकायेन परिवृत. क्रीडार्थमुपनिर्जगाम ।

---

१ उत्तरकला असाधारण्यो विशिष्टा वा कला । २ लोक्याना लौकिकानाम् । ३ अभ्युपपत्तिरनुग्रह ।

४ आसुरिति बभूवुरित्यर्थे तिङन्तप्रतिरूपकमव्ययम् । ५ “शाद्वल शादहरिते” इत्यमर. ।

स तत्र पुंस्कोकिलनादिते वने मनोहरोद्यानविमान[1]भूषिते।
चचार पुष्पानतचित्रपादपे प्रियासहाय सुकृतीव नन्दने॥

(२)

तत्रस्थं चैनमन्यतम सुभाषिताख्यायी ब्राह्मण समभिजगाम, कृतोपचारसत्कारश्च तद्रूपशोभापहृतमनास्तत्रोपविवेश। इति स महासत्त्वो यौवनानुवृत्त्या पुण्यसमृद्धिप्रभावोपनत क्रीडाविधिमनुभवस्तदागमनादुत्पन्नबहुमान एव, तस्मिन् ब्राह्मणे सुभाषितश्रावणादनवाप्तागमनफले, सहसैवोत्पतित क्रीडाप्रसङ्गजनितप्रहर्षोपहन्तृ प्रमदाजनभयविषादजननं कोलाहलमुपश्रुत्य ज्ञायता किमेतदिति सादरमन्त पुरावचरान्[2]समादिदेश। अथास्य दौवारिका भयविषाददीनवदना ससम्भ्रम द्रुततरमुपेत्य न्यवेदयन्त। एष स देव! पुरुषाद कल्माषपाद सौदास साक्षादिवान्तको नरशतकदन[3]करणपरिचयाद्राक्षसाधिकक्रूरतरमतिरतिमानुषबलवीर्यदर्पो रक्ष प्रतिभय[4]रौद्रमूर्तिर्मूर्तिमानिव जगत्सत्रास इत एवाभिवर्तते। विद्रुत च नस्तत्सत्रासग्रस्तधैर्यमुद्भ्रान्तरथतुरगद्विरदव्याकुलयोध-

---

१ विमान विमानो वा सप्तभूमिकभवनम्। अथवा विमानशब्दस्य मण्डप इत्यर्थं। तथा च रघुवशे (१७।६) "विमान चतु.स्तम्भप्रतिष्ठितम्।" "विमान मण्डपम्" इति तत्र मल्लिनाथ। २ अवचरा रक्षका अनुचरा वा। ३ कदन हननम्। ४ प्रतिभय भयङ्करम्।

बलम्। यत. प्रतियत्नो[1] भवतु देव, प्राप्तकाल वा सम्प्रधार्यतामिति।

अथ सुतसोमो जानानोऽपि तानुवाच। भो क एष सौदासो नाम। ते त प्रोचु। किमेतद् देवस्य न विदित यथा सुदासो नाम राजा बभूव। स मृगयानिर्गतोऽश्वेनापहृतो वनगहनमनुप्रविष्ट सिंह्या सार्ध योगमगमत्। आपन्नसत्त्वा च सा सिंही सवृत्ता, कालान्तरेण च कुमार प्रसुषुवे। स वनचरैर्गृहीत सुदासायोपनीत। अपुत्रोऽहमिति च कृत्वा सुदासेन सवर्धित, पितरि च सुरपुरमुपगते स्व राज्य प्रतिलेभे। स मातृदोषादामिषेष्वभिषक्त.[2]। इदमिद रसवर मासमिति स मानुष मासमास्वाद्य स्वपौरानेव च हत्वा हत्वा भक्षयितुमुपचक्रमे। अथ पौरास्तद्वधायोद्योग चक्रु। यतोऽसौ भीत सौदासो नररुधिरपिशितबलिभुग्भ्यो भूतेभ्य उपशुश्राव[3]। अस्मात्सङ्कटान्मुक्तोऽह राज्ञा कुमारशतेन भूतयज्ञं करिष्यामीति। सोऽय तस्मात्सङ्कटान्मुक्त। प्रसह्य प्रसह्य चानेन राजकुमारापहरण कृतम। सोऽय देवमप्यपहर्तुमायात। श्रुत्वा देव प्रमाणमिति।

अथ स बोधिसत्त्व. पूर्वमेव विदितशीलदोषविभ्रम सौदासस्य कारुण्यात् तच्चिकित्सावहितमतिराशसमानश्चात्मनि तच्छीलविकृत-

---

१ प्रतिकूलयत्नवान्। शत्रो प्रतीकारार्थ यत्नवानित्यर्थ। २ अभिषक्तोऽनुरक्त। ३ उपशुश्राव प्रतिज्ञातवान्।

प्रशमनसामर्थ्यं प्रियाख्यान इव च सौदासाभियाननिवेदने प्रीतिं प्रतिसंवेदयन्नियतमित्युवाच—

राज्याच्च्युतेऽस्मिन्नरमांसलोभादुन्मादवक्तव्य इवास्वतन्त्रे।
त्यक्तस्वधर्मे हतपुण्यकीर्तौ शोच्यां दशामित्यनुवर्तमाने ॥
को विक्रमस्यात्र ममावकाश एवंगताद्वा भयसम्भ्रमस्य।
अयत्नसंरम्भपराक्रमेण पाप्मानमस्य प्रसभं निहन्मि ॥
गत्वापि यो नाम मयानुकम्प्यो मद्गोचरं स स्वयमभ्युपेत ।
युक्तं मयातिथ्यमतोऽस्य कर्तुमेवं हि सन्तोऽतिथिषु प्रवृत्ता ॥

तद् यथाधिकारमत्रावहिता भवन्तु भवन्त इति स तानन्तःपुरावचराननुशिष्य, आश्वासनपूर्वकं विनिवर्त्य युवतिजनं, यतस्तत्कोलाहलं ततः प्रससार। दृष्ट्वैव च व्यायता[१]बद्धमलिनवसनपरिकरं वल्कलपट्टविनियतं रेणुपरुषप्रलम्बव्याकुलशिरोरुहं प्ररूढश्मश्रुजालावनद्धान्धकारवदनं रोषसंरम्भव्यावृत्तरौद्रनयनम् उद्यतासिचर्माणं सौदासं विद्रवदनुपतन्तं राजबलं[२] विगतभयसाध्वसः[३] समाजुहाव। अयमहमरे सुतसोमः। इत एव निवर्तस्व। किमनेन कृपणजनकदनकरणप्रसङ्गेनेति।

तत्समाह्वानशब्दाकलितदर्पस्तु सौदासः सिंह इव ततो न्यव-

---

१ व्यायतं विस्तीर्णं यथा स्यात्तथा। २ विद्रवद्राजबलमनुपतन्तं सौदासं दृष्ट्वैवेति संबन्धः। ३ साध्यसमावेगः।

तेत। निरावरणप्रहरणाम्[१] एकाकिन प्रकृतिसौम्यदर्शनमभिवीक्ष्य च बोधिसत्त्वमहमपि त्वामेव मृगयामीत्युक्त्वा निर्विशङ्क सहसा सरम्भद्रुततरमभिसृत्यैन स्कन्धमारोप्य प्रदुद्राव। बोधिसत्त्वोऽपि चैन सरम्भदर्पोद्धतमानस ससम्भ्रमाकुलितमतिं राजबलविद्रावणा-दुपरूढप्रहर्षावलेपमवेत्य नायमस्यानुशिष्टि[२]काल इत्युपेक्षा चक्रे। सौदासोऽप्यभिमतार्थप्रसिद्धया परमिव लाभमधिगम्य प्रमुदितमना स्वमावासदुर्गं प्रविवेश।

हतपुरुषकलेवराकुल रुधिरसमुक्षितरौद्रभूतलम्।
परुषमिव रुषावभर्त्संयत्स्फुटदहनै[३]रशिवै शिवारुतै[४]॥

समवतार्य च तत्र बोधिसत्त्व तद्रूपसम्पदा विनिबध्यमाननयन प्रतत[५] वीक्षमाणो विशश्राम।

(३)

अथ बोधिसत्त्वस्य सुभाषितोपायनाभिगत ब्राह्मणमकृतसत्कार तदुद्यानविनिवर्तनप्रतीक्षिणाम् आशावबद्धहृदयमनुस्मृत्य चिन्ता प्रादुर-भूत्। कष्ट भो!

सुभाषितोपायनवानाशया दूरमागत।
स मा हृतमुपश्रुत्य विप्र कि नु करिष्यति॥

---

१ निरावरणप्रहरणाम्। आवरणेन कवचादिना प्रहरणेन च रहितम्।
२ अनुशिष्टिरनुशासनम्। ३ दहनैश्चिताग्निभिः।
४ शिवारुतैश्चेति संबन्धः। ५ प्रततं निर्निमेषमित्यर्थः।

इति विचिन्तयतस्तस्य महासत्त्वस्य तदीयदु:खाभितप्तमनस. कारुण्यपरिचयादश्रूणि प्रावर्तन्त ।

अथ सौदास साश्रुनयनमभिवीक्ष्य बोधिसत्त्व समभिप्रहसन्नुवाच । मा तावद् भो . !

धीर इत्यसि विख्यातस्तैस्तैश्च बहुभिर्गुणै ।
अथ चास्मद्वश प्राप्य त्वमप्यश्रूणि मुञ्चसि ॥

सुष्ठु खल्विदमुच्यते—

आपत्सु विफलं धैर्यं शोके श्रुतमपार्थकम् ।
नहि तद्विद्यते भूतमाहतं यन्न कम्पते ॥

इति । तत्सत्य तावद् ब्रूहि—

प्राणान्प्रियानथ धन सुखसाधन वा
बन्धून्नराधिपतितामथवानुशोचन् ।
पुत्रप्रिय पितरमश्रुमुखान् सुतान्वा
स्मृत्वेति साश्रुनयनत्वमुपागतोऽसि ॥

बोधिसत्त्व उवाच—

न प्राणान्पितरौ न चैव तनयान्बन्धून्न दारान्न च
नैवैश्वर्यसुखानि सस्मृतवतो बाष्पोद्गमोऽय मम ।
आशावास्तु सुभाषितैरभिगत. श्रुत्वा हृत मा द्विजो
नैराश्येन स दह्यते ध्रुवमिति स्मृत्वास्मि सास्रेक्षण ॥

तस्माद्विसर्जयितुमर्हसि तस्य याव-
दाशाविघातमथित हृदय द्विजस्य ।
समाननाम्बुपरिषेकनवीकरोमि
तस्मात्सुभाषितमधूनि च सम्बिभर्मि ॥

प्राप्यैवमानृण्यमह द्विजस्य गन्तास्मि भूयोऽनृणता तवापि ।
इहागमात् प्रीतिकृतक्षणा[1]भ्या निरीक्ष्यमाणो भवदीक्षणाभ्याम् ॥

सौदास उवाच—

इद त्वया ह्याहृतमुच्यमान श्रद्धेयता नैव कथञ्चिदेति ।
को नाम मृत्योर्वदनाद्विमुक्त स्वस्थ स्थितस्तत्पुनरभ्युपेयात् ॥
दुरुत्तरं मृत्युभय व्यतीत्य सुखे स्थित श्रीमति वेश्मनि स्वे ।
किं नाम तत्कारणमस्ति येन त्व मत्समीप पुनरभ्युपेया ॥

बोधिसत्त्व उवाच। कथमेव महदपि ममागमनकारणमत्रभवा-न्नावबुध्यते। ननु मया प्रतिपन्नम्[2] आगमिष्यामीति। तदल मा खलजनसमतयैव परिशङ्कितुम्। सुतसोम खल्वहम्।

लोभेन मृत्योश्च भयेन सत्यं सत्यं यदेके तृणवत्त्यजन्ति ।[3]
सतां तु सत्यं वसु जीवितं च कृच्छ्रेऽप्यतस्तन्न परित्यजन्ति ॥

---

१ क्षण उत्सव । २ प्रतिपन्नमङ्गीकृतम् । ३ एके लोभेन मृत्योर्भयेन च सत्य तृणवत् त्यजन्ति (इति) यत् (तत्) सत्यम्—इत्यन्वयः ।

त्वत्तो भय यदि च नाम ममाभविष्यत्
सङ्ग सुखेषु करुणाविकल मनो वा ।
विख्यातरौद्रचरित ननु वीरमानी
त्वामुद्यतप्रहरणावरणोऽभ्युपैष्यम् ॥

त्वत्सस्तवस्[1] त्वयमभीप्सित एव मे स्यात्
तस्य द्विजस्य सफलश्रमता विधाय ।
एष्याम्यह पुनरपि स्वयमन्तिक ते
नास्मद्विधा हि वितथा गिरमुद्गिरन्ति ॥

अथ सौदासस्तद् बोधिसत्त्ववचन विकल्पितमिवामृष्यमाणश्चिन्ताम्[2] आपेदे । सुष्ठु खल्वय सत्यवादितया च धार्मिकतया च विकत्थते । तत्पश्यामि तावदस्य सत्यानुराग धर्मप्रियता च । कि च तावन्ममानेन नष्टेनापि स्यात् । अस्ति हि मे स्वभुजवीर्यप्रतापाद्वशीकृत शतमात्र क्षत्रियकुमाराणाम् । तैर्यथोपयाचित भूतयज्ञ करिष्यामीति विचिन्त्य बोधिसत्त्वमुवाच । तेन हि गच्छ । द्रक्ष्यामस्ते सत्यप्रतिज्ञता धार्मिकता च ।

गत्वा कृत्वा च तस्य त्व द्विजस्य यदभीप्सितम् ।
शीघ्रमायाहि यावत्ते चिता सज्जीकरोम्यहम् ॥

---

१ सस्तव. परिचय. ।

२ विकल्पित सदेहसयुक्तम्, अमृष्यमाणोऽसहमान', चिन्ता चिन्तनम् ।

(४)

अथ बोधिसत्त्वस्तथेत्यस्मै प्रतिश्रुत्य स्वभवनमभिगत प्रतिनन्धमान स्वेन जनेन तमाहूय ब्राह्मण तस्माद् गाथाचतुष्टय शुश्राव। तच्छ्रुत्वा सुभाषिताभिप्रसादितमना स महासत्त्व मराधयन्[१] प्रियवचनसत्कारपुर सर साहस्रिकी गाथा कृत्वा समभिलषितेनार्थेन त ब्राह्मणं प्रतिपूजयामास।

अथैन तस्य पिताऽस्थानातिव्ययनिवारणोद्यतमतिः प्रस्तावक्रमागत सानुनयमित्युवाच। तात! सुभाषितप्रतिपूजने साधु मात्रा ज्ञातुमर्हसि। महाजन.[२] खलु ते भर्तव्य, कोशसम्पदपेक्षिणी च राजश्रीरतश्च त्वां ब्रवीमि।

शतेन सम्पूजयितु सुभाषित पर प्रमाण, न तत. परं क्षमम्।
अतिप्रदातुर्हि कियच्चिर भवेद्धनेश्वरस्यापि धनेश्वरद्युति॥

बोधिसत्त्व उवाच—

अर्घप्रमाण यदि नाम कर्तुं शक्य भवेद्देव! सुभाषितानाम्।
व्यक्त न ते वाक्यपथ व्रजेय तन्निष्क्रय राज्यमपि प्रयच्छन्॥
श्रुत्वैव यन्नाम मनः प्रसाद, श्रेयोऽनुराग स्थिरता च याति।
प्रज्ञा विवृद्धया वितमस्कता[३] च, क्रय्य ननु स्यादपि तत्स्वमासै॥

---

१ सरावयन् अभिनन्दयन्निति भावः। २ महाजनो बहवो जना इत्यर्थः। ३ वितमस्कता तमोराहित्य वैशद्यमिति यावत्।

दीपः श्रुतं[1] मोहतमःप्रमाथी, चौराद्यहार्यं परम धनं च।
संमोहशत्रुव्यथनाय शस्त्रं, नयोपदेष्टा परमश्च मन्त्री॥
आपद्गतस्याप्यविकारि मित्रमपीडनी शोकरुजश्चिकित्सा।
बलं महद् दोषबलावमर्दि, परं निधानं यशसः श्रियश्च॥

गुणैरनेकैरिति[2] विश्रुतानि प्राप्तान्यहं प्राभृत[3]वच्छ्रुतानि।
शक्त कथ नाम न पूजयेयमाज्ञा कथ वा तव लङ्घयेयम्॥
यास्यामि सौदाससमीपमस्मादर्थो न मे राज्यपरिश्रमेण।
निवृत्तसङ्केतगुणोपमर्दे लभ्यश्च यो दोषपथानुवृत्त्या[4]॥

अथैन पिता स्नेहात्समुत्पतितसम्भ्रम सादरमुवाच। तवैव खलु तात! हितावेक्षिणा मयैवमभिहितम्। तदलमत्र ते मन्युवशमनुभवितुम्। द्विषन्तस्ते सौदासवशं गमिष्यन्ति। अथापि प्रतिज्ञातं त्वया तत्समीपोपगमनमत· सत्यानुरक्षी तत्सम्पादयितुमिच्छसि, तदपि ते नाहमनुज्ञास्यामि। अपातक हि स्वप्राणपरिरक्षानिमित्त गुरुजनार्थं चानृतमार्गो वेदविहित इति। तत्परिहार-

---

१ श्रुतमिति कर्तृ। २ इति पूर्वोक्तरीत्येत्यर्थ.। ३ "प्राभृत तु प्रदेशनम्" इत्यमर। ४ यश्च (परिश्रम) निवृत्तसकेतगुणोपमर्द (सौदासेन सह कृतो यो निवर्त्तनस्य सकेतस्तस्य परिपालनरूपो यो गुणस्तस्योपमर्दे दोषपथानुवृत्त्या लभ्यस्तेन मे नार्थ इत्यर्थ.। इममेवार्थम् 'तत्परिहारश्रमेण तव कोऽर्थ' इत्यनुपदमेवानुवदति तस्य पिता। अथवा 'निर्वृत्त' इति पाठः कदाचिदत्र भवेत्।

अमेण तव कोऽर्थं । अर्थकामाभ्या च विरोधिदृष्टं धर्मसंश्रय-मनयमिति व्यसनमिति च राज्ञा प्रचक्षते नीतिकुशलाः। तदल-मनेनास्मन्मनस्तापिना स्वार्थनिरपेक्षेण ते निर्बन्धेन । अथाप्ययशस्य धर्मविरोधि चेति प्रतिज्ञाविसंवादनमनुचितत्वान्न व्यवस्यति ते मति, एवमपीद त्वद्विमोक्षणार्थं समुद्युक्त सज्जमेव नो हस्त्यश्वरथपत्तिकाय[1] सम्पन्नमनुरक्त महद् बलम्। तदनेन परिवृत समभिगम्यैन वशमानयान्तकवश वा प्रापय। एवमव्यर्थप्रतिज्ञता सम्पादिता स्यादात्मरक्षा चेति ।

बोधिसत्त्व उवाच । नोत्सहे देव ! अन्यथा प्रतिज्ञातुमन्यथा कर्तुम्, शोच्येषु वा व्यसनपङ्कनिमग्नेषु नरकाभिमुखेषु सुहृत्सु स्वजनपरित्यक्तेष्वनाथेषु च तद्विधेषु प्रहर्तुम् । अपि च

दुष्कर पुरुषादोऽसावुदार चाकरोन्मयि ।
मद्वच प्रत्ययाद्यो मा व्यसृजद्वशमागतम् ॥
लब्ध तत्कारणाच्चेद मया तात ! सुभाषितम् ।
उपकारी विशेषेण सोऽनुकम्प्यो मया यत ॥

अल चात्र देवस्य मदत्ययाशङ्कया[2]। का हि तस्य शक्तिरस्ति मामेवमभिगत विहिंसितुमिति ।

---

१ हस्त्यश्वरथपत्तिकाय हस्त्यश्वरथपदातिरूपम् ।

२ मदत्ययाशङ्कया ममाहितशङ्कया ।

एवमनुनीय स महात्मा पितर विनिवारणासोद्यमं च विनिवर्त्य प्रणयिजनमनुरक्त च बलकायमेकाकी विगतभयदैन्य सत्यानुरक्षी लोकहितार्थी सौदासमभिविनेष्यस्तन्निकेतमभिजगाम ।

(५)

दूरादेवावलोक्य सौदासस्त महासत्त्वमतिविस्मयादभिवृद्धबहुमानप्रसादश्चिराभ्यासविरूढक्रूरतामलिनमतिरपि व्यक्तमिति चिन्तामापेदे । अहहह !

आश्चर्याणा बताश्चर्यमद्भुताना तथाद्भुतम् ।
सत्यौदार्य नृपस्येदमतिमानुषदैवतम् ॥
मृत्युरौद्रस्वभाव मा विनीतभयसभ्रम ।
इति स्वयमुपेतोऽय, ही ! धैर्य, साधु सत्यता ॥

अथ बोधिसत्त्व समभिगम्यैन विस्मयबहुमानावर्जित[१]मानसमुवाच—

प्राप्त सुभाषितधन प्रतिपूजितोऽर्थी
प्रीतिं मनश्च गमित भवत प्रभावात् ।
प्राप्तस्तदस्म्ययमशान यथेप्सित मा
यज्ञाय वा मम पशुव्रतमादिश त्वम् ॥

सौदास उवाच—

नात्येति कालो मम खादितु त्वा धूमाकुला तावदिय चितापि ।

१ आवर्जितमानमित वशीकृत वा ।

विधूमपक्वं पिशितं च हृद्यं शृणमस्तदेतानि सुभाषितानि ॥

बोधिसत्त्व उवाच। कस्तवार्थ इत्थगतस्य सुभाषितश्रवणेन।

रक्षोविकृतवृत्तस्य सत्यक्तार्यपथस्य ते।
नास्ति सत्यं कुतो धर्मः किं श्रुतेन करिष्यसि ॥

अथ सौदासस्तामवसादनाम्[१] अमृष्यमाणः प्रत्युवाच। मा तावद् भो!

कोऽसौ नृपः कथय यो न समुद्यतास्त्र
क्रीडावने वनमृगीदयितान्निहन्ति?
तद्वन्निहन्मि मनुजान् यदि वृत्तिहेतो-
राधर्मिकः[२] किल ततोऽस्मि, न ते मृगघ्नाः ॥

बोधिसत्त्व उवाच—

धर्मे स्थिता न खलु तेऽपि नमन्ति येषां
भीतद्रुतेष्वपि मृगेषु शरासनानि।
तेभ्योऽपि निन्द्यतम एव नराशनस्तु
जात्युच्छ्रिता हि पुरुषा न च भक्षणीयाः ॥

अथ सौदासः परिकर्कशाक्षरमप्यभिधीयमानो बोधिसत्त्वेन तन्मैत्रीगुणप्रभावादभिभूतरौद्रस्वभावः सुखायमान एव तद्वचनमभि-प्रहसन्नुवाच। भो सुतसोम!

---

१ अवसादनाम् अवसादकारिणीमवमाननाम्।

२ अधर्मं चरतीत्याधर्मिकः। "अधर्माच्चेति वक्तव्यम्" इति ठक्।

मुक्तो मया नाम समेत्य गेह समन्ततो राज्यविभूतिरम्यम् ।
यन्मत्समीप पुनरागतस्त्व न नीतिमार्गे कुशलोऽसि तस्मात् ॥

बोधिसत्त्व उवाच । नैतदस्ति । अहमेव तु कुशलो नीतिमार्ग, यदेन[1] न प्रतिपत्तुमिच्छामि ।

अतश्च नीतौ कुशलोऽहमेव त्यक्त्वानृत योऽभिरतोऽस्मि सत्ये ।
न तत्सुनीत[2] हि वदन्ति तज्ज्ञा यन्नानुबध्नन्ति यश सुखार्था ॥

सौदास उवाच—

प्राणान्प्रियान्स्वजनमश्रुमुख च हित्वा
राज्याश्रयाणि च सुखानि मनोहराणि ।
कामर्थसिद्धिमनुपश्यसि सत्यवाक्ये
तद्रक्षणार्थमपि मा यदुपागतोऽसि ॥

बोधिसत्त्व उवाच । बहव सत्यवचनाश्रया गुणातिशया । संक्षेपतस्तु श्रूयताम्—

माल्यश्रियं हृद्यतयातिशेते सर्वान् रसान्स्वादुतया च सत्यम्
श्रमादृते पुण्यगुणप्रसिद्ध्या तपांसि तीर्थाभिगमश्रमांश्च ॥
कीर्तेर्जगद्व्याप्तिकृतक्षणाया[3] मार्गस्त्रिलोकाक्रमणाय सत्यम् ।
द्वारं प्रवेशाय सुरालयस्य ससारदुर्गोत्तरणाय सेतुः ॥

---

१ एन नीतिमार्गम् । यत उक्तम्—“ये नीतिमार्गप्रतिपत्तिधीरा प्रायेण ते प्रेत्य पतन्त्यपायान्” । २ सुनीतं नीत्या युक्तम् । ३ क्षणोऽवसरः ।

अथ सौदास साधु युक्तमित्यभिप्रणम्यैन सविस्मयमभिवीक्ष-माण· पुनरुवाच—

अन्ये नरा मद्वशगा भवन्ति दैन्यार्पणात् त्रासविलुप्तधैर्या ।
सन्त्यज्यसे त्व तु न धैर्यलक्ष्म्या मन्ये न ते मृत्युभय नरेन्द्र ! ॥

बोधिसत्त्व उवाच—

महतापि प्रयत्नेन यच्छक्य नातिवर्तितुम् ।
प्रतीकारासमर्थेन भयवलैब्येन तत्र किम् ।

इति परिगणितलोकस्थितयोऽपि तु कापुरुषा

पापप्रसङ्गादनुतप्यमाना शुभेषु कर्मस्त्रकृतश्रमाश्च ।
आशङ्कमाना· परलोकदु ख मर्तव्यसत्रासजडा भवन्ति ॥
चिर विचिन्त्यापि च नैव पापे मन पदन्यासमपि स्मरामि ।
विशोधितस्वर्गपथोऽहमेव मृत्यो किमर्थ भयमभ्युपेयाम् ॥

तदुपश्रुत्य सौदास प्रसादाश्रुव्याप्तनयन समुद्भिद्यमानरोमाञ्च-पिटको विस्मृतपापस्वभावतामिस्र· सबहुमानमवेक्ष्य बोधिसत्त्वमुवाच । शान्त पापम् !

अद्याद्विष स खलु हालहल प्रजान-
न्नाशीविष प्रकुपित ज्वलदायसं वा ।
मूर्धापि तस्य शतधा हृदय च यायाद् ।
यस्त्वद्विधस्य नृपपुङ्गव ! पापमिच्छेत् ॥

तदर्हति भवास्तान्यपि मे सुभाषितानि वक्तुम्। अनेन हि ते वचनकुसुमवर्षेणाभिप्रसादितमनस सुष्ठुतरमभिवृद्ध च तेषु मे कौतूहलम्। अपि च भो.

दृष्ट्वा मे चरितच्छायावैरूप्य धर्मदर्पणे।
अपि नामागतावेग स्यान्मे धर्मोत्सुक मन ॥

अथैन बोधिसत्त्व पात्रीकृताशय धर्मश्रवणप्रवणमानसमवेत्योवाच। तेन हि धर्मार्थिना तदनुरूपसमुदाचारसौष्ठवेन धर्म श्रोतु युक्त। पश्य—

नीचैस्तरासनस्थानाद् विबोध्य विनयश्रियम्।
प्रीत्यर्पिताभ्या चक्षुर्भ्यां वाङ्मध्वास्वादयन्निव ॥
गौरवावर्जितैकाग्रप्रसन्नामलमानस ।
सत्कृत्य धर्म शृणुयाद् भिषग्वाक्यमिवातुर ॥

अथ सौदास स्वेनोत्तरीयेण समास्तीर्योच्चैस्तर शिलातल तत्र चाधिरोप्य बोधिसत्त्व स्वयमनास्तरितायामुपविश्य भूमौ बोधिसत्त्वस्य पुरस्तादाननोद्वीक्षणव्यापृतनिरीक्षणस्त महासत्त्वमुवाच। ब्रूहीदानी मार्षे[1]ति।

अथ बोधिसत्त्वो नवाम्भोधरनिनदमधुरेण गम्भीरेणापूरयन्निव तद्वन व्यापिना स्वरेणोवाच—

---

१ मार्ष मारिष। "आर्यस्तु मारिष" इत्यमर.।

यदृच्छयाप्युपानीतं सकृत्सज्जनसंगतम् ।
भवत्यचलमत्यन्तं नाभ्यासक्रममीक्षते ॥ १ ॥

तदुपश्रुत्य सौदासः साधु साध्विति स्वशिरः प्रकम्प्य साङ्गुली-विक्षेप बोधिसत्त्वमुवाच । ततस्तत

अथ बोधिसत्त्वो द्वितीया गाथामुदाजहार—

न सज्जनाद् दूरचरः क्वचिद्भवेद्
भजेत साधून्विनयक्रमानुगः ।
स्पृशन्त्ययत्नेन हि तत्समीपगं
विसर्पिण[1]स्तद्गुणपुष्परेणवः ॥ २ ॥

सौदास उवाच—

सुभाषितान्यर्च्चयता साधो । सर्वात्मना त्वया ।
स्थाने खलु नियुक्तोऽर्थः स्थाने नावेक्षित श्रम ॥

ततस्तत

बोधिसत्त्व उवाच—

---

१ विसर्पणशीलाः ।

रथा नृपाणां मणिहेमभूषणा
व्रजन्ति देहाश्च जराविरूपताम् ।
सतां तु धर्मं न जराभिवर्तते
स्थिरानुरागा हि गुणेषु साधवः ॥ ३ ॥[1]

सौदास उवाच । अमृतवर्षं खल्विदम् । अहो सन्तर्पिताः स्म । ततस्तत

बोधिसत्त्व उवाच—

नभश्च दूरे वसुधातलाच्च
पारादवारं च महार्णवस्य ।
अस्ताचलेन्द्रादुदयस्ततोऽपि
धर्मः सतां दूरतरेऽसतां च ॥ ४ ॥

(६)

अथ सौदास प्रसादविस्मयाभ्यामावर्जितप्रेमबहुमानो बोधिसत्त्वमुवाच—

चित्राभिधानातिशयोज्ज्वलार्था गाथास्त्वदेता मधुरा निशम्य ।
आनन्दितस्तत्प्रतिपूजनार्थं वरानहं ते चतुरो ददामि ॥

तद् वृणीष्व यद्यन्मत्तोऽभिकाङ्क्षसीति ।

अथैनं बोधिसत्त्व सविस्मयबहुमान उवाच । कस्त्वं वरप्रदानस्य ।

---

१ दृश्यताम्—धम्मपदे जरावग्गो ६

यस्यास्ति नात्मन्यपि ते प्रभुत्वमकार्यसरागपराजितस्य ।
स त्व वर दास्यसि क परस्मै शुभप्रवृत्तेरपवृत्तभाव [१] ॥

अथ सौदास किञ्चिद्व्रीडावनतवदनो बोधिसत्त्वमुवाच । अलमत्रभवतो मामेव विशङ्कितुम् ।

प्राणानपि परित्यज्य दास्यामि तानह वरान् ।
विस्रब्ध तद् वृणीष्व त्व यद्यदिच्छसि भूमिप ! ॥

बोधिसत्त्व उवाच । तेन हि

सत्यव्रतो भव विसर्जय सत्त्वहिंसा
बन्दीकृत जनमशेषमिम विमुञ्च ।
अद्या न चैव नरवीर ! मनुष्यमास-
मेतान्वराननवराश्चतुर प्रयच्छ ॥

सौदास उवाच—

ददामि पूर्वान्भवते वरास्त्रीनन्य चतुर्थ तु वर वृणीष्व ।
अवैषि कि न त्वमिद यथाहमीशो [२] विरन्तु न मनुष्यमासात् ॥

बोधिसत्त्व उवाच । हन्त ! तवैतत्सुवृत्तम् । ननूक्त मया कस्त्व वरप्रदानस्येति । अपि च भो

---

१ अपवृत्तः परिवृत्त पराङ्मुख इति यावद् भावो यस्य स. । २ ईश समर्थ. ।

सत्यव्रतत्व च कथं स्यादहिंसकता च ते ।
अपरित्यजतो राजन्मनुष्यपिशिताशिताम् ॥
आह[1] । ननूक्त भवता पूर्वं दास्याम्येतानह वरान् ।
प्राणानपि परित्यज्य तदिद जायतेऽन्यथा ॥

सौदास उवाच—
त्यक्त्वा राज्यं वने क्लेशो यस्य हेतोर्धृतो मया ।
हतो धर्म क्षता कीर्तिस्त्यक्ष्यामि तदहं कथम् ॥

बोधिसत्व उवाच । अत एव तद्भवास्त्यक्तुमर्हति ।
धर्मादर्थात्सुखात्कीर्तेर्भ्रष्टो यस्य कृते भवान् ।
अनर्थायतन तादृक् कथ न त्यक्तुमर्हसि ॥
तदल ते पाप्मानमेवानुभ्रमितुम् । अवबोद्धुमर्हस्यात्मानम् । सौदास खल्वत्र भवान् ।
चित्तस्य नार्हसि नरेन्द्र वशेन गन्तु
धर्मार्थयोरनुपरोधपथ भजस्व ।
एको नृपान्युधि विजित्य समस्तसैन्यान्[2]
मा चित्तविग्रहविधौ परिकातरो भू ॥
लोक परोऽपि मनुजाधिप नन्ववेक्ष्यस्
तस्मात्प्रिय यदहित च न तन्निषेव्यम् ।

---

१ आहेति आक्षेपेऽव्ययम् । २ समस्तानि परिच्छिन्नानि पराजितानीति यावत् सैन्यानि येषा ते समस्तसैन्या नृपास्तान् ।

यत्स्यात्तु कीर्त्यनुपरोधि मनोज्ञमार्गं
तद्विप्रिय सदपि भेषजवद्भजस्व ॥

अथ सौदास प्रसादाश्रुव्याप्तनयनो गद्गदायमानकण्ठ समभिसृत्यैव बोधिसत्त्व पादयो सम्परिष्वज्योवाच—

गुणकुसुमरजोभि पुण्यगन्धै समन्ता-
ज्जगदिदमवकीर्णं कारणे[1] त्वद्यशोभि ।
इति विचरति पापे मृत्युदूतोग्रवृत्तौ
त्वमिव हि क इवान्य सानुकम्पो मयि स्यात् ॥

शास्ता गुरुश्च मम दैवतमेव च त्व
मूर्ध्ना वचास्यहममूनि तवार्चयामि ।
भोक्ष्ये न चैव सुतसोम मनुष्यमास
यन्मा यथा वदसि तच्च तथा करिष्ये ॥

नृपात्मजा यज्ञनिमित्तमाहृता
मया च ये बन्धनखेदपीडिता ।
हतत्विष शोकपरीतमानसास्
तदेहि मुञ्चाव सहैव तानपि ॥

(७)

अथ बोधिसत्त्वस्तथेत्यस्मै प्रतिश्रुत्य यत्र ते नृपसुतास्तेनावरुद्धा-स्तत्रैवाभिजगाम। दृष्ट्वैव च ते नृपसुता सुतसोम हन्त! मुक्ता

---

१ कारणे स्थाने।

वयमिति परं हर्षमुपजग्मुः। अथैनानभिगम्य बोधिसत्त्वः समाश्वासयन्प्रियवचनपुरःसरं च प्रतिसम्मोद्य सौदासस्याद्रोहाय शपथं कारयित्वा बन्धनाद्विमुच्य सार्धं सौदासेन तैश्च नृपतिपुत्रैरनुगम्यमानः स्वं राज्यमुपेत्य यथार्हकृतसत्कारास्तान् राजपुत्रान्सौदासं च स्वेषु स्वेषु राज्येषु प्रतिष्ठापयामास।

तदेवं श्रेयः समाधत्ते यथातथाप्युपनतः सत्सङ्गम इति श्रेयोर्थिना सज्जनसमाश्रयेण भवितव्यम् ॥

[आर्यशूरविरचितजातकमालायाः

—–

(२०)

इयमुदरदरी दुरन्तपूरा
यदि न भवेदभिमानभङ्गभूमिः।
कथमपि न सहे भवादृशानां
कुटिलकटाक्षनिरीक्षणं नृपाणाम् ॥

"माने भग्ने कुतः सुखम्" इत्यादर्शमनुसरतः,

अपहरति महत्त्वं प्रार्थना किं न जाने
जनयति गुरुलज्जामित्यहं किं न वेद्मि।
तदपि वद क्वान्यं तं सदा प्रत्यहं मां
जठरपिठरवर्ती वह्निरर्थीकरोति ॥

इत्युक्त्यनुसार दुर्भरोदरपूरणार्थमभिमानिना प्रभूणा सेवया जीवन-वृत्तेरुपार्जने कदर्थनामनुभवत, सर्वमेतदुदरहेतुकमिति चावगच्छत, कस्यचिन्मानधनस्य मनस्विन सोपालम्भमुदरमहिमवर्णनपरोक्तिरियम्—

इयमुदरदरी दुरन्तपूरेत्यादि।

तदत्रास्योदरस्य कीदृश महत्त्वम्, कियाश्च प्रभाव, कथ च तत्पूरणार्थं मनुजा. कर्तव्याकर्तव्यचिन्तामुत्सृज्य परवशा इव जगति नानाविधव्यापारेषु प्रवृत्ता भवन्तीत्येवाधस्तात्सविशद प्रतिपाद्यते। तथा हि—

एतत्खलु त्रिभुवनप्रभवेणानन्तलीलानिलयेन भगवता परमेष्ठिना सृष्ट विविधकुतूहलाकुलमद्भुत विशाल जगद् वीक्षमाणाना मनसि महान्त विस्मयमावहति। अत्र खलु ये गिरिसरिद्वनादयो नैकविधा. प्राकृतिकसौन्दर्यावहा मनोरमा लोकोपकारिणश्च पदार्थास्तेषामेकस्यापि याथार्थ्येन स्वरूपमवगन्तु को ब्रह्मर्षिकल्पोऽपि कल्पते। अहो! क्षणमेव तावद्विचारबुद्ध्यावधार्यता यद्ब्रह्मादेरेकस्यापि पदार्थस्य तत्त्वबुभुत्सयाऽऽजीवन तपासि तपन्तो ब्रह्मचर्यमाचरन्तो विसृज्य भोगसम्पदोऽरण्येषु विश्राम्यन्तोऽपि मनीषिणस्तत्तत्त्वज्ञानेऽवसीदन्ति।

तत्रैव तेन भगवतातिविस्मयास्पदीभूतेषु सृष्टेषु वस्तुषु विशेषतो नितरामतिप्रभाववदेतदुदरम्। व्याप्त ह्यनेन जगदखिलम्। सर्वत्रैवानवरुद्धमकण्टकमेतच्छासनम्। न केवलमाबालवृद्धमाराज-

रङ्कमापामरप्राज्ञ, किन्तु आकृमिकीटमपि, सर्व एव हि प्राणिन एतद्वश्या· ।

एष खलु निजमहिम्ना स्वप्रभावेण च महामहिम्नो देवानप्यतिशेते। सन्तु देवानामङ्गुलिनिर्देश्या केचित्समुपासका, तेऽपि मानवा एव। मानवेष्वपि केचिदेव नानाविधविपज्जालज्वालावलीसुदु सह मोहसलिलप्रचलदूर्मिमालाकुल क्रोधादिमहाग्राहसङ्कुलमिम ससृतिपाथोनिधिं दृष्ट्वा, तथा

वाताभ्रविभ्रममिद वसुधाधिपत्य-
मापातमात्रमधुरो विषयोपभोग ।
प्राणास्तृणाग्रजलबिन्दुसमा नराणा
धर्म सखा परमहो परलोकयाने ।।

इति विमृशन्तो देवानुपासते। पर कस्तादृशो यो जन्मासाद्य जठरवश्यो न भवेत् ।

जन्मारभ्य मरणपर्यन्त न केवल प्रतिदिन किन्तु प्रतिक्षणमस्य प्रभाव केन नानुभूयते, महिमा वा, यदि न शब्दद्वारा, तर्हि व्यवहारद्वारा केन न गीयते। वस्तुत एतदभावे ससारस्थितिरेव सुदुर्लभा।

ततश्च विचित्रा हि वाङ्मनसयोरगोचरीभूता मायेतस्य, जिह्वासाहस्र्यपि या वर्णयितुमशक्ता। एवं च सति सिन्धुरानना[1]दीना

---

१ सिन्धुराननो गजाननो गणेश. ।

देवाना माहात्म्यवर्णनपरेषु पर शतेषु स्तोत्रकदम्बकेषु विद्यमानेष्वपि, महामहिम्नो लोकानखिलानवाप्नवतो जठरस्य स्तोत्राणामभावो नूनमेतस्य गुणगौरवपरम्परामपारयतो वर्णयितु कविमण्डलस्यैव धीमान्द्यप्रख्यापक इति मन्यामहे ।

एव चातिप्रभाववदतिमहत्त्वयुक्त चैतदुदरम् । एतद्धेतुका एव हि सर्वे लौकिका व्यवहारा । तथा च लौकिकानामाभाणक—"सर्वारम्भास्तण्डुलप्रस्थमूलाः" इति । किं बहुना, सम्पत्तिशास्त्रस्य मूलभित्तिरुदरपूरणचिन्तैव । धर्मादिपुरुषार्थचतुष्टयावाप्तेर्मुख्य-साधनस्य शरीरस्य च धारणकारणमुदरमेव ।

परमेष महान्प्रभावो महिमा चोदरस्य न केवलं गुणपक्ष एव किन्तु तदितरपक्षेऽपि दृश्यते । स्वभाव एवैष परमेश्वरसृष्टौ प्राय सर्वेषा पदार्थाना, विशेषतश्चातिमहत्त्वयुक्ताना, यत्तेषां प्रभावो न केवल प्राणिनामभिमताना प्रियाणा चार्थाना साधनत्वेनैन दृश्यते, किन्तु नैककारणवशात्प्रायस्तत्प्रतिकूल-रूपत्वेनाप्यनुभूयते । एतन्नियमानुसारेणैव ससारस्थिते प्रधान-कारणस्यैतस्योदरस्य रौद्रमप्रिय च रूपमपि सर्वत्र दृष्टिगोचरता यात्येव ।

तथा च । हा हन्त ! कस्यैतदविदित यद् दुर्भिक्षकाले प्राणेभ्योऽपि वल्लभतर निजनयनचकोरचन्द्रम् "आत्मा वै पुत्रनामासि" इत्यादिश्रुतिशिरोवाग्भिरसकृद् गीयमानमात्मस्वरूपमात्मज पितरावेतस्यैव पापीयसो दग्धजठरस्य कृते विक्रीणाते ! ऐहिकामुष्मिकसुखदं

सखाय धर्म च परित्यज्य विधर्मिणा शरण यान्ति मानवा ! निखिलमेतदेतस्यैव विलसितम् ।

उदरव्याधिना खिन्नो हि मर्त्य. कि किन्नानुतिष्ठति ? गिरिगुरु-गर्त्तदुर्गमे कान्तारे वा, विविधव्यालकुलसमाकुले पाताले वा, अगाध-जलसञ्चारे सागरेऽपि वा नहि गम्यागम्य विमृशति। नेयम-त्युक्ति । ट्रासवाल, फीजी इत्यादिषु सुदूरेषु प्रदेशेषूपनि-वेशेषु च जीविकाया उपार्जनार्थमेव गतवता नानाविधप्रतिकूल-परिस्थितिषु च कालमतियापयता या खल्वस्मद्देशीयानामवस्था दुरवस्था वा सा कस्याविदिता। आ ! निखिलमेतज्जठरहतक-स्यैव क्रीडितम् ।

क्षुद्व्याधिना हि खिन्नस्य नहि धर्माधर्मविमर्शोऽपि किञ्चित्का-र्यावरोधहेतु । तथा चाहुरभियुक्ता "बुभुक्षित किं न करोति पापम्" इति। यत्खलु प्रायशः सर्वेष्वेव देशेषु

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।

इत्यनुसार जननीसमानाया मातृभूमेरनिष्ट मानवापसदैर्देश-द्रोहिभिराचर्यते तदेतत्कारणादेव। केन हि न श्रुतानि यूरोपीय-महायुद्धावसरे फ्रासादिदेशेष्वनेकेषा देशद्रोहिणामेतादृशा-न्युदाहरणानि ।

अहो क्षुधातुराणा मानावमानविचारोऽपि दूरत एव धावति । य खलु मान "सता माने म्लाने मरणमथवा दूरगम-नम्"—तथा हि

न्यक्कारमुदरभरणे लब्ध्वा राहुर्जहावुदरमेव ।
इच्छति मानी मरणं न च गच्छति वैरिण शरणम् ॥

—इत्येव बहुधाभिष्टुवन्ति सन्त·, तमपि मान विसृज्य क्षुत्क्षामकण्ठो मानमहतामग्रेसरोऽपि मानधन इमामुदरदरी

कष्टात्कष्टतर किं परगृहवास परान्न च ।

इत्याद्युक्त्यनुसारं नितरामवज्ञाहेतुपरान्नयाचनरूपभिक्षाकारणत्वेन मानभङ्ग भूमि पूरयितु क्षुद्राणामविवेकमूढमनसामीश्वराणा वित्तव्याव्यविवेकसकुलगिर· शृण्वन् द्वार द्वारमटन्

परसदननिविष्ट· को लघुत्व न याति ।

इत्यादिवचोऽनुरूपमवज्ञाभाजन भवति । सर्वमेतदेतस्य पापीयसो जठरस्य लीलायितम् । तथा च महामतेर्भर्तृहरे किञ्चित्परिवर्तित पद्यम्—

दीनादीनमुखैः सदैव शिशुकैराकृष्टजीर्णाम्बरा
क्रोशद्भि क्षुधितैर्निरन्नविधुरा दृष्ट्वा निजा गेहिनीम् ।
याञ्चाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षर
को देहीति वदेन्न दग्धजठरस्यार्थे प्रभूणा पुरः ॥

ततश्च महाप्रभावोऽय रौद्रमूर्त्तिर्दग्धो जठरहतक· । नास्त्यस्माक वाग्विभवस्त वर्णयितुम् । एनेन तथा ग्रस्त समस्त भूतल यदेतद्वश्यो मनुज प्रियात् प्रियतरमपि पुत्रकलत्रादिक परित्यजति, अनन्यसहाय धर्ममपि परिहरति, अधर्म देशद्रोहमथाचरति ।

किमधिकम्, यो हि मान प्राणेभ्योऽपि प्रेयान्, येन विना मनुष्य-स्तृणकल्प.—तथा हि

पादाहत यदुत्थाय मूर्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद्वर रज ॥

—तमपि मान विसृज्य परान् याचमानो भिक्षा तेषामवज्ञा लभते । तत्रैतौ श्लोकौ भवत —

अस्य दग्धोदरस्यार्थे कि न कुर्वन्ति पण्डिताः ।
वानरीमिव वाग्देवी नर्तयन्ति गृहे गृहे ॥
किमकारि न कार्पण्य कस्यालङ्घि न देहली ।
अस्य पापोदरस्यार्थे किमनाटि न नाटकम् ॥

अत एव च "सकललघिमकारणमुदरम्", "दुर्भरमुदरम्",

विपुलविलसल्लज्जावल्लीवितानकुठारिका ।
जठरपिठरी दुष्पूरेय करोति विडम्बनम् ॥

इत्यादयः कवीना सोपालम्भ हृदयोद्गारास्तद्विषये ।

तस्मादवितथमेवेद स्वर्णाक्षरलेख्य सुभाषित वचोऽभिभाषित केनापि विपश्चितामपाश्चात्येन—

इयमुदरदरी दुरन्तपूरेत्यादि ॥

---

(२१)

धर्मः

इह ससारे समस्तदेहिवर्गाणामेवेयं नैसर्गिकी लालसावलोक्यते यत्कथमपि सुखाधिगतिर्भवेत्। तथा हि तेषा सर्वेऽपि यत्ना साक्षादसाक्षाद्वा तस्यैव लाभाय भवन्ति। सुखाभिलाषेणैव केचिन्मानवा धनोपार्जनमेव तत्साधन मन्यमानास्तदासादनार्थं प्रयतन्ते। सर्वप्रकारकैर्न्याय्यैरन्याय्यैर्वा साधनै सुखमासिसादयिषवो हि ते परधनहरणाद्यपि नानुचित मन्यन्ते। अन्ये पुनरपत्यमेव सुखसाधन मन्यमाना सर्वथा धनैरापूर्णेऽपि गृहे तदभावाद् दु खं दु खमित्येवाक्रन्दन्ति सुबहुशो दिवानिशम्। अपरे पुन सत्यामपि पुत्रादिसन्ततौ प्रतिष्ठाकामुका धनिनो धनधान्य तदधिगत्यै तृणाय मन्यन्ते। एव नानाविधप्रयत्नपरा मनुजा प्राप्तेष्वपि तत्तद्वस्तुषु शान्तिमप्राप्य "अशान्तस्य कुतः सुखम्' इति न्यायेन स्थिर सुखमनधिगत्यैव तिष्ठन्ति। तत्र किं परमार्थत सुखसाधनमिति विचिकित्सायामेवमेव समाहित मनीषिभिर्यद्धर्म एव तत्साधनमिति।

धर्मो हि नाम तत्तदिन्द्रियविषयप्राप्तिजन्या क्षणिका सन्तुष्टिमनपेक्ष्य वस्तुत आत्मकल्याणसाधनस्याचरणमिति।

एष एव पशुमनुष्ययोर्भेदो यत्पशवस्तत्तदिन्द्रियवशानुगा हि प्रतिक्षण व्यवहरन्ति। मनुष्यः पुनस्तात्कालिकसुखाभि-

लाषमनादृत्य आत्मकल्याणरूप स्थायि सुखमपेक्ष्यापि कर्मपरो भवितु शक्नोति। सत्यप्येवं साधारणा पामरा मानवा पशुनिर्विशिष्टा एव निजव्यवहारेषु। केचिदेव बुद्धिमन्त

वाताभ्रविभ्रममिद वसुधाधिपत्य-
मापातमात्रमधुरो विषयोपभोगः।
प्राणास्तृणाग्रजलबिन्दुसमा नराणा
धर्म सखा परमहो परलोकयाने॥

इत्यादि स्मरन्तोऽस्थिर तत्तदिन्द्रियतृप्तिजन्य सुखमनपेक्ष्य स्थिरमात्मकल्याणरूप सुखमपेक्षन्ते। तादृशमेव सुख शान्तिरानन्द श्रेय इत्यादिशब्दैर्व्यवह्रियते।

स खलु धर्मो द्विविध—वास्तविकस्तत्साधनरूपश्च। तत्र वास्तविक सर्वकालेषु सर्वदेशेषु च समान। द्वितीय पुनस्तत्तद्देशकालाद्युपाधिभेदेन भिद्यते। तत्र धृति क्षमा शमो दानमहिसा सत्यमित्यादिरूपो धर्म प्रथमकक्षामवगाहते। द्वितीयस्तु तत्तत्सम्प्रदायगत. परम्परागत कर्मकाण्डरूप। यथा तत्तत्प्रकारै सन्ध्याविधि, तत्तत्तीर्थयात्रा इत्यादि।

प्रायश सासारिकक्षणिकसुखानुरक्तानामेव प्रतीयते यद्धर्माचरणमतीव क्लेशसाध्य भवति। "यत्तदग्रे विषमिव परिणामेऽमृतोपमम्' इति न्यायेन धर्माचरणे ह्यादावतीव कष्टमनुभूयते। अधर्माचरणे त्वेतत्प्रतिकूलैव वार्ता। स्वाभाविक चैतत्। उच्चप्रदेशाधि-

रोहणमिव नानाजन्मागतनीचप्रवृत्तीरुत्सृज्य स्वाराज्यरूपोच्चप्रदेशाधिरोहणं दुःखकरमेव प्रतीयते ।

तत्र दूरदर्शिनः सन्तः क्षणिकं तात्कालिकं तत्तदिन्द्रियतृप्तिजन्यं सुखं तिरस्कृत्य पारमार्थिकं सुखमेवासन्तस्तदधिगत्यै एव प्रयत्नपरा भवन्ति । "परोक्षप्रिया हि देवाः प्रत्यक्षद्विषः" इत्यादर्शमनुसरन्तस्ते परोक्षं सुखमेव स्वलक्ष्यं मन्यन्ते । मन्दाः पुनः प्रत्यक्षमेव क्षणिकं सुखमाद्रियन्ते । तदत्रैषा श्रुतिर्भवति—

अन्यच्छ्रेयोऽन्यदुतैव प्रेय-
स्ते उभे नानार्थे पुरुषँ सिनीतः[1] ।
तयोः श्रेय आददानस्य साधु भवति
हीयतेऽर्थाद्[2] य उ प्रेयो वृणीते ॥
श्रेयश्च प्रेयश्च मनुष्यमेत-
स्तौ सम्परीत्य[3] विविनक्ति धीरः ।
श्रेयो हि धीरोऽभि प्रेयसो वृणीते
प्रेयो मन्दो योगक्षेमाद्[4] वृणीते ॥

(कठोपनिषद् २।१-२)

विदुषां हि दृष्टौ नहि सांसारिकवस्तुषु वास्तविकं महत्त्वम् ।

---

१ नानार्थे भिन्नप्रयोजने । सिनीतो बध्नीतः । २ अर्थात् पारमार्थिकपुरुषार्थात् । ३ संपरीत्य सम्यक् परिगम्य । ४ योगक्षेमाद् योगक्षेमनिमित्तम् ।

किन्तु आत्मकल्याणसाधने धर्माचरण एव। तथा च एव हि दृश्यते। लोके ये धनसम्पन्नास्ते सन्तत्यभावेन दु खिन, ये सन्ततिमन्तो धनविरहेण ते दु खिता। सतोरप्येनयोः प्रतिष्ठाविहीना केचित्सतप्ता। सद्भावेऽप्येतेषा यदि नास्त्यारोग्य तदापि दु खमेव। एवमेव लोके जना भ्रान्त्या अन्यान्यपि सुखसाधनानि मन्यन्ते। वास्तविक तु सुखसाधन धर्म एव।

धर्मेणैव सुखमेधते। धर्म एवेहामुत्र चाभ्युदयनि श्रेयससिद्ध्यै प्रभवति। तथा च काणाद सूत्रम्—"यतोऽभ्युदयनि श्रेयससिद्धिः स धर्म" इति। नैवास्त्यन्यत्किञ्चिज् जीवलोके यदेतादृश सुखसाधन भवेत्। उक्तप्रमाणादेवैतदर्थादापद्यते यद्धर्माचरण नावश्यं सासारिकैश्वर्यविरोधि एव। आपातत समीक्षण एवाधर्माचरण तत्साधन प्रतीयते। वस्तुतस्तु "नाधर्मश्चिरमृद्धये"

नाधर्मश्चरितो लोके सद्य फलति गौरिव।
शनैरावर्तमानस्तु कर्तुर्मूलानि कृन्तति॥
अधर्मेणैधते तावत्ततो भद्राणि पश्यति।
तत सपत्नाञ्जयति समूलस्तु विनश्यति॥

(मनुस्मृति ४।१७२, १७४)

इत्यादिप्रमाणानुरूप किञ्चित्कालपर्यन्त सुखसाधनत्वेन प्रतीयमानमपि तदन्ततो महते दु खाय कल्पते। ततश्चैहलौकिकपारलौकिक सुखस्य नि श्रेयसस्य च वास्तविक कारण धर्म एव।

नहि धार्मिका अवश्यमेव सासारिकैश्वर्यविमुखा भवन्ति। किन्तु ते सासारिकैश्वर्यं केवल धर्माचरणस्यैव साधनमिति मन्यमाना सतत धर्माविरुद्धाचरणेनैव तदधिगत्यै प्रयतन्ते। अत एव धर्मार्थ-काममोक्षाख्येषु चतुर्विधपुरुषार्थेषु धर्मस्य प्राथम्यमभ्युपगम्यते।

ततश्चैहिकामुष्मिकसुखसाधन मनुष्यस्य च परम सखा यत्खलु धर्मानुष्ठानम्॥

---

(२२)

क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्॥

इह खलु विविधचरित्रविचित्रिते जगति दृष्टिपथमायान्ति द्विविधा मानवा —सशयात्मानो निश्चयात्मानश्च। आद्यास्तावद-खिलेष्वासाद्यस्वीयमनोरथेष्वनिश्चितान्त करणा भवन्ति। ततश्च "सशयात्मा विनश्यति" इत्याद्यभियुक्तोक्त्यनुसारं नैव ते स्ववाञ्छितमर्थमधिगन्तु शक्ता। प्रथम तु तेषामप्रवृत्तिरेव स्व-मनोरथसाधनाय। कथञ्चित्प्रवर्तमाना वा स्वल्पेनैवावरोधेन निरुद्धा स्वाभीप्सितसाधनव्यापारान्निवर्तन्ते। ततश्च तेषा मनोरथा 'उत्पद्यन्ते विलीयन्ते दरिद्राणा मनोरथा." इति न्यायेन केवल मनोमोदकसदृशा एव भवन्ति।

द्वितीयास्तु स्वाभीष्टेष्वर्थेषु स्थिरनिश्चया साहसोत्साहमूर्त्तयो यदपि वाञ्छन्ति बद्धपरिकरास्तदर्थं प्रयतमाना भवन्ति। नैवेह त्रिलोक्या महान्ति कष्टानि, कृच्छ्राणि तपासि, अन्यानि वा कारागारपातनप्रभृतीनि दु खानि स्वीयव्यापारान्निवर्तयितु तान् प्रभवन्ति। तानेनान् द्वितीयविधानेव मानवोत्तमानभिलक्ष्य कवि-कुलगुरो कालिदासस्य सुभाषितमिदम्—

क ईप्सितार्थस्थिरनिश्चयमित्यादि।

अस्यार्थ। वाञ्छितार्थसम्पादने दृढनिश्चय मन, निम्न-स्थलप्रवृत्त च सलिल क. प्रतीपयेदिति। अय भाव। यथाध-प्रदेशगमनोन्मुख निम्नगादीना पयो महान्ति कान्ताराणि स्थलानि वा प्रतीपयितु नहि पारयन्ति। अन्यद् वा किञ्चिन्नैव जातु तत्सर्वथा निरोद्धु क्षमम्। तद्धि समुत्खाय समूलमभ्रङ्कषानपि तरून् कान्तारपरम्परा अपि नाशयति। गुरुग्रावपरम्परादुर्गमेषु गिरिगर्भेषु च स्वमार्ग सम्पादयति। (एवमेव ये निश्चयात्मान सत्यसन्धा साधवो महीयासोऽतिमानमहिमानो धीरास्तेऽपि स्वाभीप्सितार्थमासादयितु प्रवृत्ता विघ्नैरतिमात्र ताड्यमाना अपि नहि स्वनिश्चितव्यापाराद्विरमन्ति।

कस्यैतदविदित यत् "मनोरथानामगतिर्न विद्यते" इत्यनुसार नानाविधमनोरथरतमानवकुलसकुलेऽस्मिन् भुवने नैजवाञ्छिता-नुरूप तत्तत्कार्यसम्पादनपरा विविधव्यापारव्यापृता समा-यान्ति दृष्टिपथमशेषा मानुषा.। पर स्वस्वव्यापारपराणा तेषा

नियतिवशान्नियतमेव प्रायशो जायते प्रचुरविघ्नसन्ततिसमुद्भूति । तत्र ये लघीयासोऽधीरभीरवस्तेऽसहमाना विपत्परम्परास्त्यजन्त्येव स्वाभीष्टाधिगते प्रत्याशाम् । ये तु सत्यसन्धा अप्रतिहतप्रतापा महानुभावा प्राणोपहारेणापि प्रतिश्रुतादर्थादविरमणशीला धैर्यकञ्चुका मानवास्त एव स्वाभीप्सितार्थेषु साफल्य लभन्ते । सोत्साहघने हि वीरहृदये न जातु खेदोऽधैर्य वावकाश लभते । तादृशानेव दृढसङ्कल्पान् मानवकुलतिलकानुद्दिश्य गीयते—

उदयति यदि भानु पश्चिमे दिग्विभागे
प्रचलति यदि मेरु शीतता याति वह्नि ।
विकसति यदि पद्म पर्वताग्रे शिलाया
न भवति पुनरुक्त भाषित सज्जनानाम् ॥

कञ्च । अङ्गनवेदी वसुधा कुल्या जलधि स्थली च पातालम् ।
वल्मीकश्च सुमेरु कृतप्रतिज्ञस्य वीरस्य ॥

सत्यमेवविधा एव महासत्त्वा विपत्परम्पराः समापतन्तु, सपदि राज्यलक्ष्मीर्विलयमेतु, शिरस उपरि कृपाणधारा. पतन्तु, किं बहुना, प्राणात्ययेऽप्यभीप्सितमर्थमसाधयित्वा न निवर्तन्ते । ते हि विपत्समागम स्वपरीक्षणार्थमेवोदित मन्यन्ते । कनकस्य निकषोपल इव तेषा परीक्षणार्थमेव व्यसननिकषोपलोदय । तदत्र स्मृतिपथमायाति तत्रभवतो भर्तृहरे. पद्यमेतत्—

आरभ्यते न खलु विघ्नभयेन नीचै
प्रारभ्य विघ्नविहता विरमन्ति मध्या ।
विघ्नै सहस्रगुणितैरपि हन्यमाना
प्रारभ्य चोत्तमजना न परित्यजन्ति ॥

सार्वकालिक सार्वत्रिक चैतद् वृत्त मानवकुलावतसानाम् । इतिहासपुराणेषु तावत् शतशो गाथा एतदर्थनिदर्शनीभूता श्रूयमाणा आह्लादयन्ति नश्चेतासि ।

यथा हि भगवति कैलासाधिपतौ तपस्यति, समाधिभङ्गार्थमतिमात्र मन्मथेन प्रयत्ने कृतेऽपि, नहि समाधिभेदाय कोऽप्यन्तराय प्रभुर्बभूव । तथा चाकर्ण्यते—

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्हर प्रसख्यानपरो बभूव ।
आत्मेश्वराणा नहि जातु विघ्ना समाधिभेदप्रभवो भवन्ति ॥

यथा वा भगवत्युमा सर्वेश्वरेण हरेण साक विवाहार्थं कृताध्यवसाया, तदर्थं कृच्छ्र तपश्चरन्ती, त्वग्वासासि धारयन्ती, मात्रा मेनया च बहुविध स्वाभीप्सितादर्थान्निवार्यमाणा पि, व्रतभङ्गमकुर्वती तत्परैवासीत् ।

एवमेव पृथ्वीराजप्रभृतिभि साक तद्गुणोत्कर्षाकर्णनजनितप्रेमातिशयगृहीतपाणिग्रहणव्रताना सयोगिताप्रभृतीना महिलावतसानाम्, क्लिष्टातिक्लिष्टप्रतिज्ञापालनपराणा भीष्महरिश्चन्द्ररामचन्द्रादीना च राजर्षीणां बह्वयो गाथाः ।

अद्यत्वेऽपि बाष्पयानविद्युद्यन्त्रव्योमयानप्रभृतिविषयिका यापि चेतोविस्मापन्यवर्णनीया समन्तत समुन्नतिः समालोक्यते सापि चारुचरित्रचर्चिताना स्वाभीष्टार्थादविरमणशीलाना मानवकुलतिलकानामेव कृति । अहरहो वा स्वाभीप्सितार्थस्थिरनिश्चयानामनेकेषा व्योमयानादिविद्यासमुन्नत्यै कृतप्राणपरित्यागाना सवादा कस्य सहृदयस्य हृदये विस्मयादिभावान् नोद्भावयन्ति ।

तस्मादवितथमेवेदमुच्यते—

क ईप्सितार्थ स्थिरनिश्चयमित्यादि ॥

---

(२३)

भिद्यते हृदयग्रन्थिच्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥

कथ नु खलु नानाविधविपज्जालज्वालावलीसुदुसहस्य ससारसागरस्यैतस्य पार गन्तु सान्द्रानन्दसदन परमेश्वर च प्राप्तु प्रभवति मनुष्य इति मीमासाया श्रुतिशिरोवागिय समुल्लसति—

भिद्यते हृदयग्रन्थिरित्यादि ।

एष एवार्थोऽधोवर्णितया हृदयङ्गमया कल्पिताख्यायिकया विशदीक्रियते ।

कदाचिदेको महीपतिर्मृगयाप्रसङ्गेन सुदूरमटन् सर्वानुचरगणैर्वियुक्त एकाकी शुभभाग्यवशात्कस्यचिन्महर्षेराश्रमपद प्राप । तत्र तेन मुनिना दत्तै फलजलैहृतक्लम पर्यटन्नाश्रमादनतिदूरे बृहतीमेका गुहामद्राक्षीत् । गुहा प्रविश्य तस्यामेकमुत्तम मन्दिरं दृष्ट्वा सजातकौतुको यावज्जालगवाक्षैस्तदभ्यन्तरमवलोकयितु प्रवृत्तस्तावत्पश्यति यत्तत्र कापि योषित् सभृङ्गक चक्रमेक भ्रामयन्ती तिष्ठति । तदनन्तर ते भृङ्गास्तत्र स्थितौ वृषमेक गर्दभञ्च समाश्रिता । ताभ्या च वृषगर्दभाभ्या मुक्तौ क्षीरासृक्फेनौ पीत्वा ते भृङ्गा सिता असिताश्च भूत्वा स्वविष्ठाभिर्जालकारका जाता । ततस्तैर्द्विविधैर्विविधा सुपुष्पैर्विषपुष्पैश्च सयुता जालपाशा कृता । ते च जालकारकास्तेषु पुष्पेषु यथासुख सस्थिता ।

अथ ते श्वेतकृष्णोभयमुखेन सर्पेणैकेन समेत्य दष्टा पुनस्तथैव तान् पाशाश्छित्त्वा यथायथ स्थिता । अथ विषज्वालया तत्पुष्पजालस्थेष्वारटत्सु अन्येऽप्यजालस्था क्रन्दितु प्रवृत्ता । तेन तेषा रोदनध्वनिना भग्नसमाधिस्तत्रस्थ कोऽपि दयालुस्तापसस्तान् जालादमोचयत् । ततो निर्दग्धपाशास्ते कस्यापि द्रुमस्य विवर प्रविष्टा सूर्यतेजसि विलीना अभवन् । तावच्च सा योषित्सचक्रवृषगर्दभा क्वापि गता ।

एतदालोक्य स महीपतिराश्रमपद गत्वा तन्महदाश्चर्य तस्मै महर्षयेऽवर्णयत् । स च तद्रहस्यमेवमुदघाटयत् ।

सौम्य ! या त्वया तत्र स्त्री दृष्टा सा माया । तद्भ्रामित

च यच्चक्र तत्ससारचक्रम्। ये भृङ्गास्ते तत्र जन्तव। यौ च वृषगर्दभौ दृष्टौ तौ धर्माधर्मौ विद्धि। ताभ्या वान्त च यद् दुग्धमसृक् च ते उभे सुकृतदुष्कृते। ये च जालपाशा निर्मितास्ते सुतादय। सुपुष्पाणि विषपुष्पाणि च यानि तानि सुखदु खानि। कालेन यथास्व तेषु तेषु ते ससक्ता·। वत्स! इत्थ शुभाशुभफलसुखेनाहिरूपेण कालेन हता. प्राणिनस्तया स्त्रीरूपया मायया नानायोनिषु क्षिप्ता। ते च तुल्यासु पतिता श्वेता, अतुल्यासु कृष्णा। इत्थ द्विविधा ·पुत्रादिजालपाशेषु सुखदु खानुबन्धिषु ससक्ता जायन्ते। ततो निजैर्जालै कृष्टा बद्धाश्च दु खविषार्दिता नितरामुद्विग्ना क्रन्दितु प्रवृत्ता शरण्य परमेश्वरमाह्वयन्ति। तत प्रबुध्य तेन तापसरूपिणा देवेन ज्ञानाग्निज्वालया सर्वे दग्धपाशा कृता। ततश्च ते द्रुमरूपादित्यमण्डल प्रविष्टा परम धाम ययु। सा च माया चक्राकारेण ससारेण वृषगर्दभाकारधर्माधर्माभ्या च सहिता क्वापि प्रणष्टा। एवमेव वत्स! स्वकर्मभि. शुक्ला कृष्णाश्च जन्तवोऽस्मिन् ससारे भ्रमन्ति। ईश्वराराधनसजातज्ञानाग्निना च दग्धपाशा मुच्यन्ते ससारसङ्कटात्। तद् गीयते—"ज्ञानाग्नि सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन" इति। अयमेवार्थस्तव मोहनिवृत्तये परमेश्वरेण सन्दर्शितस्योक्तेन्द्रजालस्य। तथा च श्रुति —

भिद्यते हृदयग्रन्थिरित्यादि ॥

——

(२४)

ध्यानमयदृष्टिपातप्रमुषितकालाध्वविप्रकर्षेषु ।
विषयेषु नैष्ठिकानां सवपथीना मति· क्रमते ॥

इह खलु मोहसलिलप्रचलदूर्मिमालाकुले विषयवासनामहाग्राह-समाकुले ससृतिपयोनिधौ केचिदेव विषयवासनाग्राहान् वशमानीय ब्रह्मज्योति प्रभासितान्त करणास्तपोनिष्ठा· पारेगन्तार समालोच्यन्ते। अन्यथा प्राय सर्वेऽपि ग्रस्ता विषयवासनाग्राहैरज्ञानविमोहित-धियोऽन्धा इव सत्यासत्यमनवेक्षमाणा इहैव निमज्जन्ति। नैव ते कस्यापि वस्तुनस्तत्त्वमवगन्तु पारयन्ति। ये तु वशिनो ब्रह्मनिष्ठास्त-पोधनास्त एव सर्वमतीतमनागत वर्तमान चावगन्तु समर्था। इममेवार्थमभिप्रेत्य कस्यापि कविशिखामणेर्भणितिरियम्—

ध्यानमयदृष्टिपातेत्यादि।

स्थिरप्रज्ञाना निष्ठावता मुनीना सर्वमार्गप्रवर्तिनी बुद्धिर्ध्यानमय-दृष्टिपातेन कालाध्वनोर्विप्रकर्षं दूरीकृत्य विषयमात्रे स्फुरतीत्यर्थ·।

अय भाव ।

इह भुवने "पराञ्चि खानि व्यतृणात्स्वयम्भूस्तस्मात् पराङ् पश्यति नान्तरात्मन्[1]" (कठोपनिषद् ४।१) इति श्रुत्यनुसार

१ पराञ्चि। परागञ्चन्ति गच्छन्तीति बहिर्मुखानि। खानि इन्द्रियाणि। व्यतृणत्। हिंसितवान्। पराङ्। पराग्रूपान् अनात्मभूतान् शब्दादीन्। . अन्तरात्मन्। अन्तरात्मानम्। अय भाव —परमेश्वरेण इन्द्रियाणि स्वभावेन बहिर्मुखान्येव निर्मितानि। अत एव प्रायेण सर्वोऽपि बाह्यविषयानेव पश्यति, न त्वन्तरात्मानम्।

विषयविमोहितधिय सामान्या इन्द्रियवश गता प्रायश इहैव मोहपूरवाहिनि ससारसागरे निमज्जन्तोऽन्धा इव किमपि वस्तु-तत्त्वमवगन्तुमसमर्था । तेषा विषये कालाध्वविप्रकृष्टवस्तुनस्तु का वार्ता, सन्निहिताना प्रत्यक्षाणामप्यर्थाना याथार्थ्यतो ज्ञाने तेषा बुद्धि स्खलति। तादृशानामेव विषये भगवदुक्तिरिय समुल्लसति—

भोगैश्वर्यप्रसक्ताना तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धि समाधौ न विधीयते ॥
(भ० गी० २।४४)।

ये पुन. "कश्चिद्धीर· प्रत्यगात्मानमैक्षदा[१]वृत्तचक्षुरमृतत्वमिच्छन्" (कठोपनि० ४।१) इति श्रुतेरनुशासनमनुसरन्त,

यदा सहरते चाय कूर्मोऽङ्गानीव सर्वश ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥
(भ० गी० २।५८)।

एषा ब्राह्मी स्थिति पार्थ नैना प्राप्य विमुह्यति ।
(भ० गी० २।७२)।

इति भगवदादेश च मनसि कृत्वा निश्चला या स्थितिस्तत्रासक्ता ब्रह्मज्योतिर्भासितान्त करणा विषयवासनाग्राहान्वशमानीय ससृति-सागरस्य पारगन्तारो ब्रह्मनिष्ठा नैष्ठिकास्त एव कालतो देशतश्च

---

१ प्रत्यगात्मानम् । अन्तरात्मानम् । ऐक्षत् । अपश्यत् । पश्यतीत्यर्थ., छन्दसि कालानियमात् ।

व्यवहिताव्यवहितविषयाणामशेषतोऽवगन्तारो भवन्ति। बाह्य-विषयेभ्य प्रत्यावर्त्य चेतो ये परब्रह्मणि तत्परा भवन्ति नैव तेषाम-विदित किमपि त्रिलोक्या भवितुमर्हति।

तदाह कविशिखामणिर्भवभूतिरुत्तररामचरिते—"साक्षात्कृत-ब्रह्माणो महर्षयस्तेषामृतम्भराणि भगवता परोरजासि प्रज्ञानानि न क्वचिद्व्याहन्यन्त इत्यनभिशङ्कनीयानि" इति।

युक्तियुक्त चैतत्। यतस्तस्य ज्योतिषा परमज्योतिष परब्रह्मणो भासा भासितेऽन्त करणे कुतस्तत्त्वज्ञानविरोधिमोहावकाशो ब्रह्म-निष्ठस्य, येन किमपि वस्तु तस्याविदितमवशिष्येत। तद्धि खलु परम ज्योति। तथा च श्रुतिशिरोवागिय समुज्जृम्भते—

न तत्र सूर्यो भाति न चन्द्रतारक
नेमा विद्युतो भान्ति कुतोऽयमग्नि.।
तमेव भान्तमनुभाति सर्व
तस्य भासा सर्वमिद विभाति॥
(कठोपनि० ५।१५)।

किञ्च तस्मिन् परब्रह्मणि ब्रह्माण्डव्यापिनि साक्षात्कृते तद्व्याप्यमिद जगत्कथङ्कारमशेषतो विदित न स्यात्? तद्धि धाम तेजसा सकलमिद विश्व सर्वत आविश्य वर्तते। तथा चेद श्रुतिवाक्यम्—

ब्रह्मैवेदममृत पुरस्ताद् ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण।
अधश्चोर्ध्व च प्रसृत ब्रह्मैवेद विश्वमिद वरिष्ठम्॥
(मुण्डकोपनिषद् २।२।११)।

ततश्च ब्रह्मनिष्ठस्य ज्ञानस्य सर्वत्र सर्वदाऽप्रतिहता गति । तस्मिन् ब्रह्मणि साक्षात्कृते तस्य भासा सर्वमिद भूतजात दृष्टि-गोचर भवति । तथा चाह महामुनि· पतञ्जलिर्योगसूत्रेषु "बहि-रकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षय (३।४३)। सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्व सर्वज्ञातृत्वं च (३। ४६)। प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम् (३।२५)।" इति ।

स्मर्यता चात्र कविवरस्य मुरारेर्भणितिरियम्—

अविद्याबीजविध्वसाद्यमार्षेण चक्षुषा ।
कालौ भूतभविष्यन्तौ वर्त्तमानमवीविशत् ॥

अन्यच्च ।

आविर्भूतप्रकाशानामनुपप्लुतचेतसाम् ।
अतीतानागतज्ञान प्रत्यक्षान्न विशिष्यते ॥

(वाक्यपदीये ब्रह्मकाण्डे ३७)

तस्मात्सत्यमेतद् यत् स्थिरप्रज्ञाना ब्रह्मनिष्ठाना नैष्ठिकाना-मतीतानागतवर्तमानेषु कालेषु व्यवहिताव्यवहितेषु च प्रदेशेषु ज्ञानमनिरुद्धमेव। सर्वष्वेव विषयेषु चाप्रतिहता तेषा बुद्धि स्फुरति । तस्मात्सर्वथा शोभनमुक्तम्—

ध्यानमयदृष्टिपातेत्यादि ॥

(२५)

व्रतपालनम्

वङ्गेषु नवद्वीपमण्डलान्तर्गते सुप्रथितनामधेये कृष्णनगरे वर्ष-मेकमतीत प्रमथनाथो नाम कश्चिद् ब्राह्मण स्वयमनिच्छन्नपि केवल बहुतनयवियोगविधुराया सहधर्मिण्या प्रियवदाया निर्बन्धातिशयेन विवाहोचिते वयस्यवर्त्तमानेनापि निजात्मजेन चन्द्रनाथेन इन्दुमती-त्याभिधानाया कस्याश्चिदष्टवर्षीयाया कन्यकाया पाणिग्रहणम-कारयत्। लब्ध यल्लब्धव्यम्, दृष्ट च यद् द्रष्टव्यमिति नववधू विलोकयन्ती प्रियवदा प्रकाम प्रमोदस्रोतस्विन्या प्लवमानेव सानन्द वर्षमेकमतिवाहितवती।

निदाघसमये दिधक्षन्निव भुवनमण्डल दहनशलाकिकासमूहैरिव दुर्विषहैस्तीक्ष्णतरै किरणकलापै समुद्भ्रामयमानो मध्यमम्बरमधिरोहन् सहस्रकिरण काञ्चिदभिनवामेव मूर्त्ति दधाति। समग्रमपि भुवन निष्प्राणमिव स्तिमितगम्भीर कथ कथमिव प्रतिभाति। कानि-चिद्दिनानि कृष्णनगर सुविषमेण विसूचिकामयेनाक्रान्तमिति सर्वोऽपि नागरिकजनो भीतभीतो गृहमध्य एवावतिष्ठते। ते खलु नियत पौरजनसङ्घातसम्मर्दसकुला कृष्णनगरस्य पन्थानो जन-शून्या निरुद्वेग निद्राणा इव विद्यन्ते। अन्तरान्तरा भीति-विधुरहृदयाना शववाहकाना गद्गदकण्ठास्फुटो "हरि हरि" इति कातरो ध्वनिरुद्भवति। काकनिकराश्च शुष्कपादपशिर.सु कर्णकटु

रटन्तो भीतानपि पौरान् पुनरुक्त भीषयन्ति। मारुतोऽपि च कथ कथमिव कठोरस्पर्शो जनाना शुष्क हृदय पुनरपि शोषयति।

अस्मिन्नेव समये प्रमथनाथगेहाद् हाहाध्वनिरुदतिष्ठत्। चन्द्रनाथो विसूचिकयाक्रान्त। प्रतिहता शक्तिश्चिकित्सकानाम्। प्रतिबद्ध प्रभावो मणिमन्त्रौषधीनाम्। पश्यत एव चन्द्रनाथो विषमामवस्थामापन्न। भस्मीभूत सुखभोग प्रियवदाया। गतश्चन्द्रनाथ. स्वस्थान सफलयितुमिव स्व दैवलेखम्। पूर्णश्च काम कुलिशकठोरस्य विधातृहतकस्य।

अहो इन्दुमति! अनाथासि, मुषितासि हताशे! शून्य जीर्णारण्य खल्वय ते जीवलोक। चिराय हन्तास्तमितस्ते सुखादित्य। साम्प्रतमन्धतमसाच्छन्न ते जीवनम्। इय दु खवेदनैव तेऽद्यप्रभृति प्रियसहचरी। फलितमिदानी दैवेन। अहो प्रसादवैमुख्य देवानाम्। कष्टमतिदारुणो ग्रहकोप। मृतश्चन्द्रनाथ। मूढे इन्दुमति, त्वमपि किं न मृतासि। अनात्मज्ञे, कथमिदानीं कठोरमतिकठोर दु ख सहेथा?

अहो सुखमय शैशवम्। सर्वथैवालौकिकीयं सृष्टिर्भगवतो विश्वसृज। यत्र न दशाविपर्य्यासो लेशतो जनान् पीडयति। यत्र च न द्वेषादयो हृदयमाक्रम्य जनान् पशूकर्तुं क्षमन्ते।

न जानातीन्दुमती स्मर्तुमपि शोच्यमात्मनोऽवस्थान्तरम्। न सा क्षणमप्यचिन्तयद् यद् दैवचौरो जीवनमपि तस्या हृदयादचोरय-

दिति। न वा सावबोदूधुमचेष्टतापि यत् किं नु खल्वेते हाहाकारेण सोरस्ताड रुदन्तीति। कथमिमे 'हा चन्द्रनाथ, हा इन्दुमति' इत्यसकृदाक्रुश्यानुशोचन्तीति ज्ञातुमसमर्थापीय केवल तेषा तादृशीमवस्थामवलोक्य तद्वदेव रोदितुमारभत।

क्षणेनैवेन्दुमत्या सह भागधेयेन वेशोऽपि पर्यवर्तत। मृष्ट. सीमन्तमूलादचिरारोपितो बिन्दु सिन्दूरस्य। उन्मुक्तानि सह शङ्खायसवलयाभ्या* सर्वाण्यपि समुल्लसन्ति अचिरार्पितान्याभरणानि। दूरीकृतो रक्तपट। परिधापितन्तु नयनविषादावहमरक्त वास.।

सा त्वनात्मज्ञा अनेनापि चिरवहनीयेन दौर्भाग्यपिशुनेन सुदुर्दर्शेन वेशविपर्यासेन नाबिभेत्, न व्यषीदत्, न वा लेशतोऽप्यकम्पत।

प्रियवदा तु 'हा चन्द्रनाथ, हा स्नेहसर्वस्व, हा मातृवत्सल, हा पुत्र' इति रात्रिन्दिवमाक्रन्दन्ती मूर्तिरिव करुणस्य दीनाद् दीनतरामवस्था प्रतिपद्यमाना मुहुर्मुहुर्विलपन्ती प्रतिपदिन्दुलेखेवातिक्षीणा कथञ्चिदुच्छ्वसिति।

नगर्य्या विसूचिकाया प्रकोप उत्तरोत्तर प्रवर्द्धते। प्रतिगृहमेव स्वजनवियोगव्याकुलाना मर्मच्छेदोचितो हाहाध्वनिराकर्ण्यते।

---

* वङ्गेषु एतत् सर्व सभर्तृकात्वलक्षणम्।

सर्वथा अवितथमिद यद् विपद् विपदमनुसरतीति। यद् हन्त ईदृशमपि दशाभोग भुञ्जानेषु प्रमथनाथपरिवारेष्वपरापि विपत्तिरुद्पद्यत। कष्टम्, इन्दुमत्यपि विसूचिकयाक्रान्ता।

ज्ञात्वैवेद सर्वे पर व्यषीदन्। व्याधिर्वर्द्धितुमारभत। निमेषादिव द्वित्रा अगदङ्कारा समायाता। व्यवस्थापित तैर्भेषजम्। परन्त्वहो कष्टम्, कि नाम तेन क्रियताम्? का खलु भेषज पिबेत्? अभितो ध्वनिरुदतिष्ठत्—“अद्य हि तिथिरेकादशी नाम। इन्दुमती च विधवा। न साद्य भेषज पातुमर्हतीति”। विषमावस्था। परिपृष्टे पण्डितैस्तदेव प्रत्युक्तम्—“न खलु धर्म्मशास्त्रमीदृशेष्वपि समयेषु विधवाना जलबिन्दुमात्रस्यापि पान विदधातीति”। “ननु विषमोऽयमामय। दुर्लभा ह्यनेनाक्रान्ताना प्राणा। तन्न तदर्थ भेषज पिबन्ती विधवाप्येषा दूष्येदिति” बहुश प्रत्युक्तोऽपि कैश्चित् सहृदयै, कस्तच्छृणुयात्? नहि नश्वराणा प्राणाना कृतेऽविनश्वरो धर्म परित्यक्तु शक्यते। रोगो द्विगुणमवर्द्धत। पिपासा च ता बलवदबाधत। जलम्, जलम्, जलम्, इत्य सकृन् सकरुण सविनय च जल याचमानस्तस्या क्षीण॰ शुष्कश्च कण्ठ॰ शृण्वत्स्वपि पश्यत्स्वपि च बहुषु न केनाप्यन्वकम्प्यत। न बिन्दुरपि सलिलस्य पातित केनापि तस्या ओष्ठाधरयोरुपरि। को नु जनस्तया तदर्थ नाभ्यर्थित? न क करुणार्थिना तरलतरलेन लोचनयुगलेन॰ निरीक्षित॰? कोऽथवा उत्थितपतितेनातिदुर्बलेन करपल्लवेन नाहूत॰? अहो न तथापि

व्यचलत् कस्यचिद् हृदयम्। नालभतेन्दुमती बिन्दुमपि जलस्य। न वा पायिता सा भेषजम्।

"वत्से, सहस्व कथञ्चित् काश्चित् क्षणान्। किं कुर्या? निरीक्षस्व भगवन्त धर्म्मम्। समाह्वय देव मधुसूदनम्। स ते सर्वा बाधा निराकरिष्यति। वत्से, विधवासि। कथमेकादश्या जल प्रार्थयसे? तन्मैव विक्लवा भू। अचिरादेव गच्छति रात्रि, तूर्णमेवोदयति देवो विभावसु। प्रभूत ते जल दास्यामि। तन्नयने निमील्य तूष्णीमास्स्व। धर्मस्त्वा रक्षिष्यति" इत्यादि विविध प्रबोधवचनमन्तरा नान्यत् किञ्चित् तदानीमिन्दुमतीभाग्य तस्या उपहर्तु प्राभवत्।

अहो प्रशस्यो धर्म्मरक्षणप्रकार! नून तथापतिता तामालोक्य ग्रावाप्यभेत्स्यत्, लौहमपि व्यद्रोष्यत्, वज्रमपि च शतधा व्यदरीष्यत्। न तु तत्रत्यैमनागपि विचलितम्। न विभाता विभावरी, न वा समुदितो भगवान् सहस्रकिरण। इन्दुमती सुष्ठु खलु बान्धवानामुपदेशवचनमनुसृतवती। निरीक्षितस्तया भगवान् धर्म्म, आहूतो देवो मधुसूदन। निमीलित चिराय लोचनयुगलम्। अवलम्बित च सुमहन्मौनम्। किञ्च जल जलमिति न पुनस्तया बान्धवो जन उद्वेजित॥

कश्चिद्वङ्गीय

प्रकाशानन्दशर्मा *

---

*मित्रगोष्ठीपत्रिका, द्वितीयवर्षे (शक० १८२७) पृ० १३-१६।

(२६)

कन्यापितृत्वं खलु नाम कष्टम् !

श्रीप्रभावतीदेव्या लेखः ।

भद्र सम्पादक, अहमस्मि काचिदन्त पुरिका। नगरतो दूरवर्तिन्या कस्याञ्चित् पल्ल्या मे निवास—यत्र नाद्यापि नागरिकप्रभावो जनाना चेत सु सम्यक् स्फुरणावकाशमलभत। अतो मादृश्या कुलीनाङ्गनाया वृत्तान्तपत्रिकासु किञ्चिल्लेखन नामातितमा साहसमिति न खलु नाहमपि विजानामि। तथाप्यद्य कारणगौरवादिह प्रवृत्तास्मि। मन्ये नेद जातु भवत उद्वेगाय भवेत्। अस्ति खलु तपस्विनीषु स्त्रीषु तत्रभवता कश्चित् पक्षपात इति भवत्सम्पादिता पत्रिकां गृहकोणावस्थानेन पठन्त्या मया नाविदितम्। अन्यच्च कन्यकाना विषये किञ्चिदद्य मया कथनीयम्। तत्र च पाषाणकर्कशहृदयाना व पुरुषाणामेकान्तेनैवानुत्साहमालोक्य श्रीमता करुणाकरा कामयमानै स्त्रीजनैरस्माभिरगतिकगतित्वेन यावच्छक्य स्वयमेव किञ्चिदनुक्त्वा कि नामापर क्रियतामिति भवन्त एव विचारयन्तु।

भद्र सम्पादक, यूय खलु पुरुषा अस्माकमाश्रया:, स्त्रियो वयमाश्रिता। यूयमुपजीव्या, वयमुपजीविन्य। किं बहुना, सर्वथा युष्माकमेव करतलायत्तमस्माक जीवनमपि। तथा सति यदेते यूयमस्मास्वनुचितमाचरथ, अवज्ञानदृष्ट्यास्मान् पश्यथ,

अकथनीयमपि च कथयथ, तत् किमेतद् धर्मस्य वा, शिक्षाया वा, विद्याया वा, ज्ञानस्य वा, सभ्यत्वस्य वा विलसितमिति न ज्ञायते।

किमस्माभि स्त्रीभि पुरुषाणा वो वदनविवरादोदनकवलमाच्छिद्य गृह्यते, आहोस्वित् पाकोन्मुखाना शालिकलमाना क्षेत्रेषु पुनरप्यकाण्डे हलसञ्चार क्रियते यद् हन्त आश्रिता अपि वय युष्माक दहनदृष्टौ निपतिता। जीवाना पुरुषत्वेन स्त्रीत्वेन वा जन्मग्रहण नाम न जातु तदायत्तम्,, कर्म वा ईश्वरो वात्र प्रभवति। एवञ्च कोऽयमस्माकमपराधो येनापत्यत्वे समानेऽपि तनय एव पितु स्नेहसर्वस्वमधिकरोति, न तु कन्यका। पुत्रजन्मनि पितुर्हर्षातिशय शरीरेऽपि न मीयते, कन्योत्पत्तौ तु वज्रेणेव तस्य मस्तक पीड्यते, दिश शून्या प्रतिभान्ति, जगच्च सर्वं विषादपरिपूरितमिव दृश्यते। पृथिव्यपि कन्यकाया भारेण सार्द्धत्रिहस्तमधोगच्छतीति वदन्ति। किमुच्यते, कन्यकाया मृत्युरपि पितुर्हर्षायैव सम्पद्यत इत्यपि पश्याम। अहो कष्टम्, गृहपालितस्य कस्यचिद् विहङ्गस्यापि कुक्कुरस्यापि च मरणे गृहाधिपते. कातर्य्यं दृश्यते, न तु कन्यकाना मरणे! तिर्यग्भ्योऽपि कन्यकाना जीवित हेयतरम्!

सम्पादक महाशय, अस्मान् प्रति पुरुषाणा यदतितमा विद्वेषो न तत्र प्रमाणाभाव.।· शास्त्रमिद सर्वं तेषामेव वशवदम्। तस्य कस्याप्येकस्य ग्रन्थस्य यत् किमप्येक पत्रमुद्घाट्य दृश्यताम्,

तत्रैवास्माकं हृदयमर्मभेदिनो निन्दावादा उपलभ्येरन्। आवेदमासाहित्य च सर्वत्रैवास्माक विगानम्।

क्षण नेत्रमुन्मील्य दृश्यताम्—ऐतरेयब्राह्मणे महता प्रबन्धेन पुत्राणा गुणराशिमुपवर्ण्य व्यर्थमेवास्माक कन्यकाना हृदये सपदि निशित शूल प्रवेशितम्। तद्यथा, महर्षिर्नारदो हरिश्चन्द्रेण "किस्वित् पुत्रेण विदन्ते" इत्याद्येकया गाथया पृष्टो दशभिर्गाथाभि. पुत्रगुणान् कथयन् अकाण्डेऽवोचत्—

"अन्न ह प्राण, शरण ह वासो,
रूप हिरण्य, पशवो विवाहा।
सखा ह जाया, कृपण ह दुहिता,
ज्योतिर्ह पुत्रः परमे व्योमन्॥"*

दृष्ट महाशय सम्पादक, "कृपण ह दुहिता' इति। दुहिता हि केवल दु.खकारित्वाद् दैन्यहेतुर्भवति। इत्थमेव तद्वाक्यस्यार्थ इति श्रीसायणाचार्योऽभिप्रैति। दुहितॄणा दौर्भाग्येऽन्यदपि स्मर्य्यते—

"सम्भवे स्वजनदु खकारिका,
सम्प्रदानसमयेऽर्थहारिका।
यौवनेऽपि बहुदोषकारिका
दारिका हृदयदारिका पितु.॥" इति॥†

---

* ऐतरेयब्राह्मणे सप्तमपञ्चिकायास्तृतीयेऽध्याये प्रथमं खण्डम्।

† अत्रैव सायणेन धृतोऽयं श्लोक.।

दुहितॄणा पितृधनाधिकारोऽपहृतो युष्माभि शास्त्रानुशासनव्याजेन। तावतापि श्रीमता न सन्तोष। यदस्माभिरन्तरान्तरा पितृसकाशे किञ्चित् प्रार्थ्यते, तत्रापि युष्माकमक्षमा। तदिदमवलम्ब्य उपहासादपि यूय न विरमथ। तेन हि "दुहितृ" पदस्यापि युष्माभिरभिनवोऽर्थ कल्पित। उक्त यास्केन—"दुहिता दुर्हिता, दूरे हिता, दोग्धेर्वेति"[१]। तदिह दोग्धेरिति सूत्रमवलम्ब्य युष्माभिरुच्यते—"सा हि (दुहिता) नित्यमेव पितु सकाशाद् द्रव्य दोग्धि, प्रार्थनापरत्वात्"[२] अतो दुहितेति। अहो ये खलु पितु सर्व धनमधिकुर्वन्ति, न ते पितुर्दोग्धार, परन्तु ता एव तपस्विन्य, या हि सर्वधनवञ्चिता अन्तरान्तरा छिन्न वसनखण्डादिक प्रार्थयन्ते।

जन्ममात्र एवास्माक पिता गुरुणेव भारेण दूयमानो, महाननर्थं प्राप्त इति शङ्कमानो, यथाकथमप्यस्तु, गेहतोऽस्मान् बहिष्कर्तुमिच्छति। तेनैव हि तस्य चेतस. प्रसाद। तथा च जन्मदिनप्रभृत्येव कुत्रै ना नयामीति पिता न खिद्यते। तेन चास्माक 'कन्येति' अपरमेकमभिधानमुत्पन्नम्। "कन्या—क्वेय नेतव्या भवतीति"[३] युष्माभिरेवेद कृत निर्वचनम्।

---

१ निरुक्तम् ३ अ० ४ ख०।

२ निरुक्तम् ३ अ० ४ ख०, दुर्गाचार्यव्याख्या।

३ निरुक्तम् ४ अ० १५ ख०—"कन्या कमनीया भवति, क्वेय नेतव्येति वा, कनतेर्वा स्यात् क्रान्तिकर्मण।"

अपरोऽपि कश्चिद् युष्मासु कथयति—

जातेति कन्या महती हि चिन्ता
कस्मै प्रदेयेति महान् वितर्कः।
दत्ता सुख यास्यति वा न वेति
कन्यापितृत्व खलु नाम कष्टम्॥

पार्वतीपरिणायकारेणाप्यस्यैव प्रतिध्वनिरुत्थापित—"कन्यापितृत्वं खलु गृहमेधिनामधिकतर दु खमावहतीति"।

भद्र सम्पादक, विवाह एवास्माक सर्वानर्थमूलम्। कन्यकाना वरलाभार्थमेव पितरो दूयन्ते। तेनैव चैषामस्मासु वैमनस्य दृश्यते। किन्तु पृच्छामि—कि नु खलु कन्यका ह्येवात्रापराध्यन्ति? जानीषे यत्र क्वापि धनिकाय वा, निर्धनाय वा, विज्ञाय वा, मूढाय वा, सुरूपाय वा, कुरूपाय वा, कुलीनाय वा, अकुलीनाय वा, अनुमताय वा, अननुमताय वा यस्मै कस्मैचिदपि प्रदीयमानापि न जातु युष्माक कन्यका प्रकाश किञ्चिदन्यथा ब्रवीति, न सा विवाहसमये इयद्धन देयमिति निर्बन्धेनापि पितुर्धनमधिकर्त्तुमिच्छति। सा खलु युष्मन्नियोगेन आबाल्य परिचितानि आत्मीयत्वेनाभिमतानि सर्वाण्यपि वस्तूनि सपदि परिहाय कस्मिंश्चिदचिन्तितपूर्वे प्रदेशे सर्वथापरिचितैरभिनवैर्जनै चिर स्थातुमपि गच्छति। किं बहुना, यदेव किञ्चिज्जनक इच्छति, तदेव कन्यका करोति। एवमपि न प्रसीदति वो हृदयमिति सर्वथा दु खसवेदनायैवास्माक जीवनम्। पतिगृहे सुख भवेन्नवेति दूर-

भास्ताम्, हन्त पितुर्गृहेऽप्यवस्थाने नास्माकं सुखम्। अस्मद्विवाह-सम्पादनभारखिन्नाना विषादकवलितवदनाना पित्रादीना चित्त-ग्लानिमालोक्य कस्य नाम चेतसि सुखमुदेतु। सम्पादक महा-शय, ईदृश एव युष्माकमस्मासु अनुग्रहप्रकार। अथवा अल विस्तरेणेति शिवम्॥

[मित्रगोष्ठीपत्रिका, द्वितीयवर्षे पृ० १००—१०३]

---

(२७)

*गीर्वाणवाण्या अभ्युदयोपायाः

तापत्रयावलिविमूर्च्छितचेतनाना-
मात्मस्वरूपमवमत्य सदा स्थितानाम्।
अज्ञाननाशनपटूनवबोधहेतून्
वेदान्विकासयति यस्तमह नतोऽस्मि॥
विनयभाववशेन नतेन तं
त्रिभुवनाधिपति शिरसा ततम्।
अमितमोदयुत करुणानिधि-
मविदित परितोषयितु यते॥

---

* २८।११।१९१३ ईस्वीतिथ्या "काशीसस्कृतसमितौ" पठितोऽय निबन्धो ग्रन्थकर्त्रा।

अयि भो! अशेषशास्त्रतत्त्वानुशीलनसञ्जातनिर्मलशेमुषीका सामाजिका! श्रीमता समक्ष देववाण्या समुन्नतेरुपायानधिकृत्योपन्यसितु प्रवृत्तस्य यत्सत्य वेपत इव मे हृदयम्। तथा हि—

नानाशास्त्रविचक्षणोऽपि प्रथम प्राप्त सभा मानव.
सम्यक्पार्यते न भावकथने सङ्कोचवश्य सदा।
चित्र नो यदि वेपन मम हृद. सञ्जायते सम्प्रति
यस्मान्नास्मि विचक्षण, पुनरियं ससत्सता नूतना॥

अथापि श्रीमतामादेशरूपं महान्तमनुग्रह शिरसा बिभ्राण.

चन्द्रोदये तु सत्यप्युडु[1]वृन्द किन्न भासते गगने ?
एव विदुषा मध्येऽप्रौढोऽपि न दोषभाक् कथने॥

इत्यस्मिन्नर्थे च श्रद्दधान

नीरसमपि मम वचन कृत्वा करुणा सुशीलसभूताम्।
आकर्णयन्तु भव्या सन्तस्तुष्यन्ति परभणितौ॥

इत्येव तत्रभवतामवधान दीयमानमभ्यर्थये।

सभ्या!

अद्य खलु कथ नु देववाण्याः समुन्नतिर्भवेदित्यस्मिन्विषये किञ्चिदावेदयितु समादिष्टोऽहं श्रीमद्भि.। महानेष गभीरो विषय.—विशेषतो मादृशा विषये—नेकशास्त्रनैकभाषापरिशीलनापेक्षी च। उन्नत्यवनतिव्यवहारस्य सापेक्षत्वेन कस्या अपि भाषाया उन्नत्य-

---

१ "नक्षत्रमृक्षं भ तारा तारकाप्युडु वा स्त्रियाम्" इत्यमर.।

वनत्योरवधारणाय नैकभाषाणां तारतम्यपरीक्षणस्यावश्यकत्वात् तद्विषयकज्ञानस्यास्मिन्विषये नितरामावश्यकत्वम्। कस्या अपि भाषाया वस्तुस्थितेरवगत्यै च तदन्तर्गतनानाशास्त्राणामवस्थितेरपि ज्ञानमपरिहार्यमिति नैकशास्त्रपरिशीलनस्याप्यावश्यकत्व स्फुटमेव। तथापि यथामति विषयेऽस्मिन् भवता पुर किञ्चिद्वक्तुमुपक्रमे।

इह खलु परिवृत्तिशालिनि जगति, तत्रापि जाग्रत्यतिमानमहिम्नि काले, कस्यापि सर्वदैकरसेनैवावस्थितिर्नितरामसम्भवा। सर्वमपि वस्तु परवश चक्रनेमिक्रमेण नानावस्था समुपभुङ्क्ते। यत्र दिन तत्र रात्रि, यत्र च रात्रिस्तत्र दिन पर्यायानुसारमाविर्भवति।

एतन्नियमानुरूपमेव चिराज्जगदिदमुन्नतिपथानुग सम्प्रति समालोक्यते। उदयाचलमारूढो भगवान् ज्ञानभास्वान् भुवनमाभासयितु प्रवृत्त। सर्वोऽप्यविद्यातमिस्रापगमे मोहनिद्रामुन्मुच्य स्वीयस्वीयपदार्थजातपरीक्षणपरो दृष्टिपथमायाति।

अनुसरन्त एवैतन्नियमं चिरादस्मद्देशीया देववाण्या. स्वरूपमालोचयितुमुद्यतास्तदुन्नत्युपायपरिमार्गणपरा. सन्ति।

देववाण्या अद्यत्वेऽवनतिः

न च उन्नतेरुपायचिन्तनमवनतिमादौ स्थापयति। तत्र "सति कुड्ये चित्रम्" इति न्यायेन देववाण्या अवनतेरेवाभावात्तदुन्नत्युपायचिन्तनस्यामूलकत्व वैयर्थ्यापत्तिश्चेति वाच्यम्। तदवनते. साम्प्रत साक्षात्त्वात्, सर्वैः स्वीकृतत्वाच्च। तत्रैते श्लोका भवन्ति—

देववाणी पुरा येयमुन्नतेर्मूध्नि संस्थिता।
दौर्भाग्येणास्य देशस्य दुर्दशामद्य सा गता॥
या प्राचीननिबन्धेषु लोकभाषेति वर्णिता।
अपि बाह्येषु देशेषु कम्बोजादिषु भाषिता॥
सैकस्यापि जनस्याद्य न भाषात्वेन गण्यते।
अथापि मृतभाषेति लोकैर्हा! सावमन्यते॥
विस्तरः क्वान्यभाषाणां प्रभावश्चापि सम्प्रति।
क चैषा देववाणी, हा! महान् भेदो हि दृश्यते॥
भोजविक्रमतुल्यास्तु न तस्या रक्षकाः क्वचित्।
प्रष्टारः सन्ति सर्वत्र ह्यन्यासां कोऽत्र संशयः?॥
कूपोदकसमं तस्या रुद्धं बद्धं च वाङ्मयम्।
शास्त्रतत्त्वावगन्तारो विज्ञास्ते विलयं गताः॥

भव्या! नेयमत्युक्तिः। यत्रास्मात्कालात् प्रायेण वत्सराणां चतुर्दशशत्याः प्रागपि—

पुरा विद्वत्तासीदुपशमवतां क्लेशहतये
गता कालेनासौ विषयसुखसिद्ध्यै विषयिणाम्।
इदानीं तु प्रेक्ष्य क्षितितलभृतः शास्त्रविमुखान्
अहो कष्टं! सापि प्रतिदिनमधोऽधः प्रविशति॥

इत्येवं राजर्षिणा भर्तृहरिणा तस्या अवनतिः प्रदर्शिता, तत्राद्य सम्यक् प्रवृत्ते सर्वथा प्रतिकूले वर्तमाने काले, सम्प्रतिष्ठिते चान्यभाषाणां साम्राज्ये, तस्या अवनतिं प्रति नहि भवितुमर्हति

सशयलेशावकाश । तदेव पूर्वमेवोन्नतिसद्भावात्तदुन्नतेर्नापेक्षि-
तत्वमिति वदन्त· परास्ता ।

ततश्च दृष्ट्वाप्येता सर्वलोकविदिता देववाण्या अवनतिम्, स्मृत्वापि तस्या नाम्नैव समाख्यातं त्रिलोक्यामसाधारण पौर्वकालिक परम यश, को नाम भारतबन्धुर्धर्मधुरीणो धीमास्तदुन्नत्युपायसमालोचने मन्दप्रयत्नो भविष्यति ?

भाषाणामुन्नतेः स्वरूपम्

तत्र "प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते" इति न्यायानुसारेणैतत्तावद्विचारणीय यत् किन्नु खल्वस्मिन् प्रसङ्ग उन्नतिशब्देनाभिप्रेयते, कथ च तत्स्वरूपविनिर्णय· कर्तुं शक्यत इति। एतद्विचारानन्तरमेव तस्या उन्नत्युपायचिन्तनमवसरप्राप्तत्वेन समुपयुज्यते। तत्साधनार्थं च प्रयतितु शक्यते। तदत्र प्रथममेतदेवाधस्ताद्विचार्यते।

अद्यत्वे तावत्कस्याश्चिद्भाषाया उन्नतेर्विकासस्य वा स्वरूपविनिर्णये प्रवृत्तेनानेकविषयेषु दृष्टेरनुधावनमाकाङ्क्ष्यते। शब्दान्तरेष्वयमेवार्थ एवं वक्तु शक्यते यत्कस्याश्चिद् भाषाया उन्नतिस्वरूपपरीक्षणायैते तावदधोनिर्दिष्टा विषया समालोचनीया —

(१) प्रथम तावत्तस्या भाषाया भाषिणा सख्या।

(२) द्वितीयं, देशापेक्षया तस्या विस्तृति । अर्थात् कियान् देश, के देश., कति देशा वा ता भाषा भाषन्ते।

तद्यथा 'इंग्लिश'भाषाभाषिणां सख्या सामान्येन पञ्चविंशति-कोटिपरिमितास्ति। स्थूलदृष्ट्या सप्तसु अष्टसु वा देशेषु, अगणितेषु प्रदेशेषु द्वीपेषु च सा भाष्यते।

परमर्थद्वयमप्येतदद्यत्वे भाष्यमाणानां भाषाणां विचारप्रसङ्ग एव समीक्षितुं शक्यते। प्राचीनभाषाणामथवा तासां भाषाणां विषये तु, या सम्प्रति कुत्रापि न भाष्यन्ते, अपि तु पुराकाल एव या कस्मिन्नपि देशे भाषिता आसन्, नैतद्विचारणीयं भवति। यतो नाद्यत्वे एकोऽप्येतादृशो मानवो यस्यैकापि तासां स्वभावतो मातृभाषा भवेत्। दौर्भाग्येणास्माकं देववाण्यप्येतद्द्वितीयकोट्या-मेव पतिता भवति। साप्यद्यत्वे न क्वापि केनापि स्वभावतो मातृभाषात्वेन भाष्यते।

(३) तृतीयं, तदीयसाहित्यस्य विस्तर उपयोगिता (उपादेयता) वर्त्तमानकालप्रवाहस्तदध्ययनाध्यापनसौलभ्यं च।

अस्यार्थस्य हि समीक्षणं प्राचीनोत्कृष्टभाषाणामाधुनिकभाषाणां च उन्नतेर्विकासस्य वा स्वरूपावधारणे समानत्वेनोपयोगि। अत एव च प्रधानम्। युक्तं चैतत्। साहित्येनैव हि कस्याश्चिद् भाषाया गौरवं महिमा च वस्तुतः प्रतीयते। साहित्यमेव भाषायाः स्थिरा सम्पत्तिरनन्तः शेवधिश्च। सभ्यताया उत्कर्षा-पकर्षौ, दर्पणे रूपमिव, सद्यः साहित्य एव प्रतिबिम्बीभावमा-पद्येते। साहित्यद्वारैव पूर्वपूर्वैर्ऋषिभिर्महर्षिभिर्मुनिभिराचार्यैः कविभिश्च—

"साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्सम्प्रादुरुपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थ समाम्नासिषुर्वेद च वेदाङ्गानि च" (निरुक्ते १ । २०) इति,

"किं पुनराप्तानां प्रामाण्यम् ? साक्षात्कृतधर्मता भूतदया यथाभूतार्थचिख्यापयिषेति । आप्ताः खलु साक्षात्कृतधर्माण इदं हातव्यमिदमस्य हानिहेतुरिदमस्याधिगन्तव्यमिदमस्याधिगमहेतुरिति भूतान्यनुकम्पन्ते । तेषां खलु वै प्राणभृतां स्वयमनवबुध्यमानानां नान्यदुपदेशादवबोधकारणमस्ति । न चानवबोधे समीहा वर्जन वा । न वाकृत्वा स्वस्तिभाव, नाप्यस्यान्य उपकारकोऽप्यस्ति । हन्त वयमेभ्यो यथादर्शनं यथाभूतमुपदिशाम, त इमे श्रुत्वा प्रतिपद्यमाना हेय हास्यन्त्यधिगन्तव्यमेवाधिगमिष्यन्तीति । एवमाप्तोपदेश ।" (न्यायसूत्रभाष्ये २ । १ । ६८)

—इत्याद्यनुसारमनुकम्पापरै प्रज्वालित ज्ञानज्योति स्थूलसूक्ष्माद्यनेकविधपदार्थजातविषयक तेषामनुभव विचार च प्रख्यापयत् सहस्रशो वर्षेष्वतीतेष्वपि उत्तरोत्तर विवर्धमानमद्यापि समुद्भासमान सदृश्यते । यद्विषये हि

ब्रह्मादयो विश्वहिताय तप्त्वा पर.सहस्रा शरदस्तपासि ।
एतान्यपश्यन्मुनय पुराणा स्त्रान्येव तेजासि तपोमयानि ॥

इति किञ्चित्परिवर्तिता महाकविभवभूतेरुक्तिर्वक्तुरभिप्रेतप्रसङ्गभङ्गेऽपि सम्यक् सङ्गच्छते ।

ततश्च कस्या अपि भाषाया उन्नतेर्विकासस्य वा स्वरूपविनिर्णय एतदेव मुख्यतो विचारणीय भवति यदस्ति किञ्चित्सर्वमनोहारि निखिलपुरुषार्थसाधकमखिलदुरितापहारक च स्वसर्वस्वभूत साहित्य तस्या भाषायाम्। सत्यपि च तस्मिन्, विषयाणा व्यष्टिसमष्टिदृष्ट्या कियास्तस्य विस्तर कियच्च गाम्भीर्यम्? अथवा भिन्नभिन्नदेशकालेषु वर्तमानाभिर्मनुष्यजातिभि प्रचारितेषु समुन्नति-पद च नीतेषु नानापुरुषार्थोपयोगिषु दर्शनविज्ञानधर्मशास्त्रकाव्य-सङ्गीतादिविषयकेषु शास्त्रेषु तदवस्थायास्तारतम्यदृष्ट्या कस्य कस्य शास्त्रस्य केन केन परिमाणेन प्रचारणं समुन्नतिश्च सम्पादिते तस्या भाषायाम्? सत्स्वपि च नानाविषयकगूढगम्भीरनिब-न्धेषु, कियती तेषामुपयोगिता उपादेयता च? उपादेयतासद्भा-वेऽपि, एतदपि समीक्षणीय यदद्यत्वे कीदृशी तस्य साहित्यस्य गति.—उन्नतिमुखी कि वा अवनतिमुखी? अथवा नानादेशीय-शास्त्राणामुन्नतेरपेक्षया तस्य गति सन्तोषावहा न वा? अन्तत एतदपि विचारणीय यत्तत्साहित्यज्योति प्रकाशोऽन्तरायमन्तरेण साधारणजनता यावदधिगन्तु शक्नोति न वा। शब्दान्तरेषु तदध्ययनाध्यापनसौलभ्यमपि वर्तते न वा।

देववाण्या महत्त्वमुपयोगिता च

देववाण्या साहित्यस्य तावदतिविस्तृतत्वे परमोत्कृष्टत्व उपादेयताया च दिष्ट्या नहि कस्यचिद्विवाद.। ससारे नहि काचिदेतादृशी भाषा यस्या साहित्य प्राचीनतादृष्ट्यास्या

साहित्यस्य समतामासादयेत्। विस्तृत्यपेक्षयापि 'ग्रीक' 'लैटिन' इत्यादिपरमप्रसिद्धप्राचीनोत्कृष्टभाषाणां कयोरपि द्वयो साहित्यमेकत्रीकृतमपि न तावद्विस्तृत यावद्देववाण्या। न चापि देववाणीसाहित्य साकल्येनाद्य यावत् समुपलभ्यते। पर.सहस्राणा ग्रन्थाना ग्रन्थकाराणा च केवल नाममात्रेणैवोल्लेखो नानाग्रन्थेषु दृश्यते। निरन्तर च प्रकाश्यन्ते नूतननूतनग्रन्थरत्नानि प्राचीनसस्कृतग्रन्थोद्धारतत्पराभिर्नैकसस्थाभि'। तदेतत्सर्वं देववाण्या साहित्यस्य निरुपमा विस्तृतिमेव ख्यापयति। द्योतयति च "कला नार्हन्ति षोडशीम्" इत्यस्य चरितार्थता सस्कृतापेक्षया उपर्युक्त 'लैटिन' आदिभाषाव्यतिरिक्तप्राचीनभाषाणा विषये।

अर्थगाम्भीर्यभावसौन्दर्याद्यपेक्षयापि ससारभाषाणा—न केवल प्राचीनाना किन्तु आधुनिकीनामपि—शिरोमणीभूतैव नो देववाणी। उपनिषदो, भगवद्गीता, दर्शनशास्त्राणि, भागवतम्, शाकुन्तलम्, उत्तररामचरितम् इत्याद्यलौकिकसाहित्यरत्नैरलकृता सा सहसैवान्या भाषा अतिक्रामति। एकैकमपि हि एतादृश साहित्यरत्न कस्या अपि भाषाया सौभाग्यसम्पादनायाल गौरवास्पद च। धर्मार्थकाममोक्षाख्यानखिलानेव पुरुषार्थान् पुनर्लक्ष्यीकृत्य प्रवृत्त तस्या साहित्यम्। अत एव च सर्वाङ्गसम्पूर्णम्।

न केवलमेतावतैव तस्या. प्राधान्यम्। अतिप्राचीनत्वेनास्या वेदादिरूपसाहित्यभागस्य नानाविषयाणा तुलनात्मकदृष्ट्याध्य-

यनेऽप्यतीवोपयोगिनी देववाणी। अस्या शब्दरचनायाश्चाति-स्पष्टतया चिरकालादेव च लोकोत्तरप्रतिभानवद्भिराचार्यैर्व्याकृत-त्वेन निरुक्तत्वेन च स्वपरिवारसम्बन्धिनीना 'इग्लिश', 'जर्मन', 'ग्रीक', 'लैटिन' प्रभृतीना भाषाणामध्ययने चास्या परमो-पयोगित्व भाषाशास्त्रवेदिन कस्य न विदितम्। अत एव 'जर्मनी', 'अमरीका' इत्यादिसुदूरनानादेशेषु शतशोऽध्यापकाश्छा-त्राश्च तदध्ययनाध्यापनतत्परा साप्रत श्रूयन्ते।

भारतवर्षीयान् प्रति तु तस्या उपयोगित्वप्रतिपादन केवल पुनरुक्तिरेव। न केवल तेषामतिप्राचीनेतिहासो नितान्त देव-वाण्या अध्ययनादेवावगम्यते, तेषा सभ्यताया सस्कृतेर्धार्मिक-विश्वासाना च प्रासादस्य मूलभित्तिरपि सस्कृतसाहित्य एवावतिष्ठते। आधुनिक 'हिन्दी', 'बङ्गाली' प्रभृतिभाषाणामप्यन्तत सस्कृत-मेवोत्पत्तिभूमि। किं बहुना, जन्मप्रभृति मरणपर्यन्त तेषा-मभ्युदयनिःश्रेयससाधनतत्परा सतत स्वसाहित्यसरोरसामृतेन नानाप्याययन्ती सर्वथा मङ्गलमयी मातृकल्पैव भारतीयाना देववाणी।

देववाण्याः सांप्रतिकः समाचारः

सत्यपि वास्तविके उपरिष्टादुपवर्णिते देववाण्या वृत्तान्ते, महानेष परितापविषयो यत् तस्या साप्रतिक प्रवाहो न सन्तोषावहः। सत्यं प्राचीनग्रन्थोद्धारः प्रतिदिनं क्रियमाणः श्रुतिपथमायाति। सत्यं

यत्तस्या अध्ययनाध्यापन सुदूरदेशदेशान्तरेषु क्रियते। तस्या गौरवं यशश्च प्रतिदिनमुत्तरोत्तर विवर्धमान सान्त्वयति नो भारतीयाना चेतासि। तथापि सर्वमेतत्प्राचीनसाहित्यमात्रविषयकम्। अद्यत्वे तस्या साहित्यस्य गतिरवनतिमुखी एवेत्यत्र नहि कस्यचिद्विवाद। चिरादेव नानाशास्त्रेषु नूतनविचाराणा सृष्टिस्तद्द्वारा तस्या साहित्यस्य समुन्नतिश्चावरुद्धा दृश्यते। सन्तु केचिदङ्गुलिनिर्देश्याश्चर्वितचर्वणपिष्टपेषणकारिणष्टीकाटिप्पणीकर्तार, परन्तु वस्तुत स्वोपज्ञविचारविचारकाणा नूतनग्रन्थनिर्मातॄणा सर्वथाऽभाव एव। ज्यौतिषदर्शनवैद्यकप्रभृतिशास्त्राणा प्रायश सर्वेषामेव विषये समानेयमवस्था।

न चापि तस्या अध्ययनाध्यापनसौलभ्य प्रचारबाहुल्य च यथाभीष्ट विद्यते। पुरा खलु—

"महान् हि शब्दस्य प्रयोगविषय। सप्तद्वीपा वसुमती त्रयो लोका .।",

किञ्च, "शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति। विकार एनमार्या भाषन्ते शव इति।", (महाभाष्ये पस्पशाह्निके),

इत्यादिप्रमाणेभ्यो न केवल भारतवर्ष एव किन्त्वस्माद् बहिरपि तस्या. प्रचार आसीदित्यवगम्यते।

"तत्रायमप्यर्थ। इदमपि सिद्ध भवति प्राजितेति। किञ्च भो इष्यत एतद्रूपम्? बाढमिष्यते। एव हि कश्चिद्वैयाकरण आह।

कोऽस्य रथस्य प्रवेतेति। सूत आह। आयुष्मन्नह प्राजितेति। वैयाकरण आह। अपशब्द इति। सूत आह। प्राप्तिज्ञो देवानाप्रियो न त्विष्टिज्ञ, इष्यत एतद्रूपमिति। वैयाकरण आह। आहो खल्वेनेन दुरुतेन बाध्यामह इति। सूत आह। न खलु वेञ सूत, सुवतेरेव सूत.। यदि सुवते· कुत्सा प्रयोक्तव्या, दु सूतेनेति वक्तव्यम्'' (महाभाष्ये २।४।५६)

"उदहारि भगिनि या त्व कुम्भ हरसि शिरसानड्वाह साचीनमभिधावन्तमद्राक्षीरिति'' (महाभाष्ये १ । १।५८),

किञ्च।

विप्रोऽपि यो भवेन्मूर्ख स पुराद् बहिरस्तु मे।
कुम्भकारोऽपि यो विद्वान् स तिष्ठतु पुरे मम ॥

(भोजप्रबन्धे)

काव्य करोमि न हि चारुतर करोमि
यत्नात्करोमि यदि चारुतर करोमि।
भूपालमौलिमणिमण्डितपादपीठ!
हे साहसाङ्क! कवयामि वयामि यामि ॥

(भोजप्रबन्धे भोज प्रति कुविन्दस्यैकस्य वचनम्)

इत्यादिसाक्ष्यानुसार न केवल मनुस्मृत्यादिधर्मशास्त्राणामादेश-मनुसृत्य द्विजेष्वेव तस्या प्रचार आसीत्, किन्तु द्विजातिव्यतिरिक्तै सूतकुविन्दकुम्भकारादिभिरपि सा अधीयते स्म।

"प्रत्यभिवादेऽशूद्रे" (पा० सू० ८ । २ । ८३) इति पाणिनि-सूत्रेऽशूद्रग्रहणेन, निरुक्तेऽष्टाध्याय्या[1] च तस्या भाषात्वव्यवहारेण च तस्या प्राचीनकाले सार्वजनीन· प्रचार एव द्योत्यते।

किञ्च

मुनीना दशसाहस्र योऽन्नदानादिपोषणात्।
अध्यापयति विप्रर्षिरसौ कुलपति स्मृत. ॥

इत्यनेन कुलपतिलक्षणेन, इतिहासप्रसिद्धाना नालन्दातक्षशिलादि-विश्वविद्यालयानामद्यतनीयानामपि विदुषा विस्मयोत्पादकेन वृत्तान्तेन च देववाण्याः पुरा प्रचारातिशय एवानुमीयते। भारतवर्षेऽप्यनुपलब्धानामनेकेषा संस्कृतग्रन्थाना चीनतिब्बत-प्रभृतिदेशीयभाषासूपलब्धैरनुवादग्रन्थैरपि देववाण्या सैव गुणगाथा गीयते।

एव सति, अद्यत्वे विस्तरदृष्ट्या अन्यथा वा सर्वथा सकुचितगात्रा हीना दीना च दृश्यमाना सा कथ न कदर्थयेदस्माक चेतासि। न केवल द्विजातिव्यतिरिक्तै· कुविन्दादिभिर्ब्राह्मणव्यतिरिक्तै. क्षत्रि-

---

१ तथा हि "नेति प्रतिषेधार्थीयो भाषायाम्" (नि० १ । ४) इति निरुक्ते, "भाषया सदवसश्रुवः" (अ० ३ । २ । १०२) इति चाष्टाध्याय्या दृश्यते।

यादिभिरेव वा तस्या अध्ययनाध्यापन परित्यक्तम्, किन्तु ब्राह्मणेष्वपि अत्यल्पा सख्यैव तस्या अध्ययनाध्यापनपरा दृश्यते।

देववाण्या अवनतेः कारणानि

तत्रैतस्या. प्रत्यक्षाया देववाण्या अवनते कानि कारणानि, कथ च तस्या पुनरपि प्रचारबाहुल्यं सम्भवतीति विचारणीयम्। प्रथम तावदवनतिकारणानि सगृह्यन्ते।

अवनतिकारणनिर्देशप्रसङ्ग एतत्तावदवधारणीय यदुक्तावनते कारणाना द्वैविध्य वर्तते। प्रथम खलु तानि कारणानि सन्ति येषा विषये सस्कृतभाषाभ्युन्नति चिकीर्षवोऽपि वय चिरकालादेव निरुपाया विवशाश्च सवृत्ता स्म.। तद्यथा विदेशीयराजशासनम्, विदेशीयसभ्यताप्रचार, आधुनिकभारतवर्षे विभिन्नाना नूतनधर्माणामुदयो विभिन्नधर्मिणा सङ्घर्षश्च। नियतमेव सत्स्वेतेषु सर्वथा नूतनकारणेषु सस्कृतभाषाया. पुनरपि प्राक्कालिकी समुन्नतिरसाध्या। परमुक्तकारणभिन्नानि यानि तदवनतिकारणानि तेषा प्रतीकारविषये सर्वथैव स्वाधीना परमुखानपेक्षिणश्च वयम्। अत एवात्र प्रसङ्गे तेषामेव निर्देश. समुचित.। तादृशकारणानि चैतानि—

(१) लेखशैल्या. काठिन्यम्। प्राचीनग्रन्थाना विषये सर्वविदितमेवैतद् वृत्त यत्तेषा लेखशैली स्वाभाविकी अत एव सरला प्रसादगुणबहुला च विद्यते। नूतनग्रन्थाना पुनरन्यथैव गाथा।

मूलग्रन्थानामपेक्षया टीकाग्रन्थानामधिकतर काठिन्यं कस्याविदितम्। न चैतादृश वृत्तमन्यासामुन्नतानामाधुनिकीना भाषाणा विषये।

(२) **अर्थगौरवमन्तरेण शब्दाडम्बरेऽत्यादर.।** गद्यपद्यात्मकेषु काव्यग्रन्थेषु प्रायेण प्रसिद्धमेवैतत्। प्राचीनाना कवीनामर्थालङ्कारेषु यादृश समादरो न तादृश शब्दालङ्कारेषु। उत्तरकालवर्त्तिना कवीना तु विषय एतद्विपरीतमेव। एतादृश्येव दशान्यविषयकग्रन्थेष्वपि विद्यते।

(३) **विचाराणामनुदारता सङ्कीर्णता च।** प्राचीनदर्शनादिग्रन्थानामनुशीलनेन स्पष्टमेतत्प्रतीयते यत्तेषा कर्तार स्वविरुद्धमतानामपि सम्यगध्ययन मनन च कृत्वैव तेषा खण्डनाय प्रवृत्ता आसन्। ज्यौतिषादिविषयेषु यवनाद्याचार्याणामपि सिद्धान्तान् सम्यगधीत्य तद्विषये स्वभाषाया निबन्धान् निबध्य तेषा प्रचार कृतवन्त.। जैनादिनिर्मितानाममरकोशादिग्रन्थरत्नाना सादरमध्ययनाध्यापन प्राचीनकाले क्रियते स्म। या च परिपाटी अद्यापि दिष्ट्या न सर्वथा समुच्छिन्ना।

समुचितमेव चैतदाचरणमासीत्। विरुद्धविचाराणा सङ्घर्षत एव, द्वयोर्मल्लयो परस्परमल्लयुद्धेन तयोर्बलस्येव, ज्ञानस्योन्नतिरुत्कर्षश्च जायते। अन्यथा कूपमण्डूकवदाचरन्तोऽनुदारविचारा सङ्कीर्णहृदयाश्च मानवा अवनतेर्मुखमवश्य पश्यन्ति। अद्यत्वे चिरकालादेव सर्वथानु-

दारा एतस्मिन् विषये सस्कृतभाषाध्ययनाध्यापनकर्तारो दृश्यन्ते । न केवल नूतनपाश्चात्यविचाराणामेव विषये तेषामेतादृशी सङ्कीर्णा सकुचिता च मति , किंतु स्वदेशीयविरुद्धमतानामपि विषये ।

(४) तस्याः शिक्षणेऽनुदारता । उपरि निर्दिष्टमेव यत्पुराकाले भारते सर्वसाधारणजनताया देववाण्या प्रचार आसीत् । परमद्यत्वे प्रायेण सस्कृताध्यापकानामतीवानुदारा मतिरस्मिन् विषये । आस्ता तावद् द्विजातिव्यतिरिक्ताना शूद्राणामध्यापनम् । द्विजानामपि सर्वेषामध्यापने महान्त सङ्कोचमनुभवन्त्यद्यतनीया सस्कृतविद्वास । हिन्दूजात्यन्तर्गतानामपि जैनादीना त्वध्यापनवार्तैव प्रायस्तेषा शिर सु पीडा समुत्पादयति ।

(५) असहिष्णुता । प्राय सदृश्यते यत्संस्कृतविद्वासोऽतीवासहिष्णवो न हि तथा परस्पर सौहार्देन सामनस्येन च वर्त्तितु समर्था भवन्ति यथेंग्लिशादिभाषाणामध्येतार । एकस्मिन्नेव विद्यालयेऽध्यापनकार्यमाचरत्सु तेषु परस्परमीर्ष्यादिबाहुल्यमालोक्यते ।

देववाण्या उन्नतेरुपायाः

अथैतस्या हृदयविदारिकायामवस्थाया समुपस्थिताया कथ पुनरपि तस्याः प्रचारबाहुल्य सम्भाव्यते किं च तामुन्निनीषुभिस्तदर्थं कर्त्तव्यमित्यधस्तात् सक्षेपेणैव द्योत्यते । यद्यप्यवनतिकारणविचा-

:णायैव सामान्यतोऽर्थादापद्यते के क उपायास्तस्या उन्नतेरिति, तथापि वेस्पष्टार्थमन्येऽपि केचिदुपाया निर्दिश्यन्ते। एतेषामुपायाना वेचारेण केषाञ्चित्पूर्वमनुक्तानामवनतिकारणानामपि भानमर्थापत्त्या भविष्यति। उन्नतेरुपायाश्चैते—

(१) **पठनपाठनशैल्या॰ सस्कार**। अद्यत्वे छात्राणा तत्तद्विषयेषु तत्तद्ग्रन्थेषु चाधिकारित्वानधिकारित्वनिर्णय योग्य-वायोग्यत्वविचार चान्तरेणैव तत्तद्ग्रन्थास्तानध्यापयितु प्रवर्त्तन्ते ायश सस्कृताध्यापका। उदाहरणार्थम्, अनेके छात्रा सस्कृत-ाक्यरचनामप्यजानन्तो लघुकौमुदी वैयाकरणसिद्धान्तकौमुदी ा रघुवशादिकाव्यानि च पठितु प्रवृत्ता जायन्ते। एव च तेषा ारिश्रमस्य समयस्य च व्यर्थमेव नाशो भवति। ततश्चैतस्य दोषस्य वारणाय सर्वत प्रथम सस्कृतस्य पठनपाठनशैल्या सस्कारोऽपेक्षित।

(२) **उपयोगिग्रन्थसञ्चार॰**। उक्तहेतोरेव सस्कृतभाषाया तत्तद्-वेषयेषु प्रविविदूणा हितदृष्ट्योपयोगिबालपाठावल्यादीना तत्त-द्विषयेषु च बालोचितपाठ्यपुस्तकाना निर्माणमावश्यकम्।

(३) **आकरग्रन्थानामुद्धार॰**। प्राचीनग्रन्थाना विशेषत आकर-ग्रन्थानामुद्धाराय तेषा पठनपाठनप्रचारोऽत्यावश्यक। नवीनग्रन्थानां वस्तुतोऽर्थावगमाय तत्तच्छास्त्राणामितिहासस्य ज्ञानार्थं चापि उक्तार्थस्यावश्यकता। अन्यथा "मूले शुष्के नैव पत्र न पुष्पम्" इति न्यायेन आकरग्रन्थानामध्ययनाध्यापनविलोपे नवीनग्रन्थानामपि ह्रासोऽनिवार्य।

(४) **शिक्षणविधौ दक्षाणामध्यापकानामावश्यकता।** अध्यापनकार्ये विशेषतश्च बालानामध्यापने दक्षाणामध्यापकानामतीवोपयोगिता। एवमेव सुलभोपायेन अल्पसमयेन अनायासेन च बालाना तत्तच्छास्त्रेषु प्रवेश कारयितु शक्यते। ततश्च यथाऽऽवश्यकमध्ययनाध्यापनविधौ परिनिष्ठिता दक्षाश्च अध्यापका यथा सम्पद्येरंस्तथा विधेयम्।

(५) **सौहार्दबुद्धेर्विचारशक्तेश्चाभिवृद्धि।** सस्कृतज्ञेषु परस्पर सौहार्दबुद्धेर्विचारशक्तेश्चाभिवृद्ध्यर्थं तत्तद्विद्यालयेषु पाठशालासु च विद्यापरिषदामावश्यकता यत्र विभिन्नविषयानुद्दिश्य प्रेमपुर सर लेखद्वारान्यथा वा वादविवादव्यवस्था भवेत्। एवमेव च सभासञ्चालनकुशला वक्तृताशक्तिसम्पन्नाश्च सस्कृतभाषाध्येतारो भवितु प्रभवन्ति। तदत्र स्मृतिपथमायाति चरकसहिताया अधोनिर्दिष्टः सदर्भ —

"तद्विद्यसंभाषा हि ज्ञानाभियोगसहर्षकरी भवति। वैशारद्यमपि चाभिनिर्वर्तयति। वचनशक्तिमपि चाधत्ते। यशश्चाभिदीपयति। पूर्वश्रुते च सदेहवतः पुन. श्रवणात् श्रुतसशयमपकर्षति। श्रुते चासदेहवतो भूयोऽध्यवसायमभिनिर्वर्तयति। अश्रुतमपि च कञ्चिदर्थं श्रोत्रविषयमापादयति।" इति।

(६) **अन्येषामुपयोगिविषयाणामध्ययनम्।** सस्कृतभाषया सहोपयोगिनामन्येषा विषयाणामप्यध्ययन विधेयम्। तद्यथा सामान्यविज्ञानस्य गणितस्येतिहासस्य भूगोलविद्यायाश्च।

अनेनैवोपायेन सस्कृताध्येतृषु सामान्यव्यवहारबुद्धेर्विकास· सम्पादयितु शक्यते। अन्यथा

अपि शास्त्रेषु कुशला लोकाचारविवर्जिता।
सर्वे ते हास्यता यान्ति यथा ते मूर्खपण्डिता॥

इत्युक्त्यनुसार व्यवहारबुद्धिशून्या सस्कृताध्येतार प्रायेणोपहास्यतामेव यास्यन्ति।

(७) **समालोचनाबुद्धे· प्रादुर्भाव परिमार्जन च।** नूतनपाश्चात्यविद्याना स्वदेशीयप्राचीनविद्याना च समन्वयार्थ याथार्थ्येन तासा गुणदोषविवेचनार्थ च समालोचनाबुद्धे· प्रादुर्भाव परिमार्जन च सस्कृतज्ञेष्वतीवावश्यके। एवमेव ते प्राचीनाचार्या इव तत्तद्विद्यासु नूतनविचाराणा सृष्टौ समर्था भवितुमर्हन्ति। नान्यथा।

त एते समासत एव गीर्वाणवाण्या अभ्युदयोपाया निर्दिष्टाः। आशास्यते गुणदोषविवेचका माननीयास्तत्रभवन्त सामाजिकास्तदेतत्सर्व विचार्य यदत्रानुपयोगि सदोष वा तदपहाय यदुपयोगि गुणयुक्त च तदङ्गीकरिष्यन्ति। यतो हि "गुणगृह्या वचने विपश्चित"। ततश्चान्ते सविनय ममैषाभ्यर्थना—

सार ततो ग्राह्यमपास्य फल्गु
हसैर्यथा क्षीरमिवाम्बुमध्यात्॥

॥ इति॥

---

(२८)

कोकिल तावद्विरसान्
यापय दिवसान्वनान्तरे निवसन् ।
यावन्मिलदलिमालः
कोऽपि रसालः समुल्लसति ॥

इह खल्वव्याहतपरिवृत्तिशालिनि जगति जाग्रति निखिलभूतजातजरयितरि समाक्रान्ताखिलभुवने काले नहि खलु कस्यचन सर्वदा एकावस्थायामेवावस्थिति सभवति। ततश्चानेन नितरामतिनृशसतमेन कालेन ह्युपस्थापितायामापदि किं नु विधेयम् आपन्निम्नगानिमग्नैरिति मीमासाव्यतिकरे समाधित्सु कश्चिद्धीरधुरीण शेमुषीमद्वरिष्ठ कविकुलमूर्धन्य कोकिलान्योक्त्या समुपदिशन्नाह—

कोकिल तावद्विरसानित्यादि ।

अथ भाव ।

इह खलु नानाविधविपज्जालज्वालावलीसुदु सहे भुवनतले काल. खल्वेषोऽतिप्रबल.। विचित्रा ह्येतस्य कृतिः। नहि कश्चिदेतादृशो दृग्गोचरो यो गृहीतजन्मा नैनेन कवलीकृत स्यात्। एष हि स्वर्भानोरपि[1] क्रूरतरो महीयाश्च येन कोटिशो भूभृदिन्दवो

१ स्वर्भानु = राहु. ।

विकरालदंष्ट्रया चर्विता विलय गता । समेषा खल्वेष जरयिता । योऽद्य महत्पदमधितिष्ठति, अतिशयसुखसौभाग्यसम्पदमनुभवति, स एवान्येद्यु कालमहिम्ना तामनुकम्पनीया दशामापद्यते। एष खलु— य एकदा महास्तेजस्वी त्रिभुवनभूषण प्रख्यातकीर्तिरमितबलश्चासीत्, यस्मात्प्रोत्खातारातिकुलकाननाद्वित्रस्ता भीतिचकिता विपन्ना नान्यं स्त्रमाश्रय त्राण वामन्यन्त—तमपि महीयास राजराजपदमुपभुञ्जान सहसारण्यादरण्यानी[१] भ्रामयति।

तदेता कालविहिता भीषणामवस्थामवेक्षमाण को नु प्रज्ञावान् सर्वदा कस्याप्येकैवावस्था स्थास्यतीति वक्तु शक्नोति? नैव खल्वेवमेनेन समाक्रान्ते भुवने कस्याप्येकरसेनैवावस्थितेश्चिराय सभव। नून योऽद्य मोदमानस्तिष्ठति, अन्येद्युस्तस्योपरि महद् दु ख समापतति।

ततश्चैकरसेनावस्थिते सततमसम्भवाद् आपदापगाप्रवाहपतितेन किमवलम्ब्य दु खोदधे. स्वात्मा परित्रातव्य इति विचारणायामय-मेवार्थं प्रमितित्वेन वक्तव्यो यद् धैर्यमवलम्ब्य निजदु खसन्ततेर-नित्यतामवगच्छता भाविन्या सुखसम्पत्तिसन्ततिसम्भूते प्रत्याशयैव तेन निजप्राणत्राण विधेयमिति। महाजनपरिगृहीतो ह्येष मार्ग । एनमनुसरन्त एव सन्त ससारयात्राया सफला भवन्ति।

इह लोके ये निराशावादिनोऽश्रद्दधाना अधीरास्ते हि विपत्पाते

१ "महारण्यमरण्यानी" इत्यमर ।

न केवल स्वाभीप्सितकार्यसाधनादेव भ्रष्टा जायन्ते, किन्तु प्रायो निजजीवनधारणमपि दुर्वह भारमिव मन्यमाना स्वप्राणत्यागोन्मुखा अपि भवन्ति। अथवा महता दैन्येनैव तमापत्समयमतिवाहयन्ति।

ये पुनराशावादिन श्रद्दधाना धैर्यधनास्ते हि कदर्यसेवितमकीर्तिकरमस्वर्ग्यं च पूर्वोक्त पन्थानमुत्सृज्य।

"आशावतामय लोक",
"श्रद्धावान् लभते सिद्धिम्",
सपदो महतामेव महतामेव चापद।
वर्धते क्षीयते चन्द्रो न तु तारागण क्वचित्॥
अचिन्तितानि दु खानि यथैवायान्ति देहिनाम्।
सुखान्यपि तथा मन्ये दैन्यमत्रातिरिच्यते॥

इत्येव चिन्तयन्त, इह ससारयात्रायामपरिहार्य खल्वापदा समागम, आगमापायिनोऽनित्याश्चैते कष्टापाता इति च विश्वसन्तोऽनायासेनैव त समयमतिवाह्य स्वाभीष्टमासादयन्ति।

किञ्चात्रैतदपि विचारणीय यत् काल खल्वेष चक्रनेमिक्रमेणैव जगदखिल शास्ति। तथा च, अस्थिरे हि सुखिदु:खिनो: सुखदु खे। क्षणेनैव जनो दु खसागरे प्रक्षिप्यते, क्षणेन च सुखसम्पत्तिमासाद्य सुखी सञ्जायते। नितरा मोदमाना क्षणेनैवानुकम्पनीयदशामासादयन्ति। बहवश्च चिराय महता दु खेन कालमतिवाहयन्त सहसैव महती सुखसम्पदमधिगच्छन्ति। नैवैकान्तत कस्यचिद् दु खाधिगति सुखसमागमो वाकर्ण्यते। सर्वेषामपि

तयोरन्यतरेण समागमोऽस्थिर क्षणभङ्गुरश्च । ततश्चैवं चक्रनेमिक्रमेण जगच्छासति काले नियतमेव सर्वोऽपि कदाचन कष्टमापद्यते, कष्टमधिगत्य च सुखी भवति इति नियमानुरोधेनोपस्थितास्वपि कदाचिदापत्सु—येनेयमवस्थोपस्थापिता नून तेन कालेन मुहुरपि प्रथमावस्था प्रापयिष्यते—इति प्रत्याशया

त्याज्य न धैर्यं विधुरेऽपि काले
धैर्यात्कदाचित्सुखमाप्नुयात्स ॥

इत्यादेशानुरूप बुद्धिमता धैर्यं सरक्षणीयम् । यत सन्तो हि—

अपि स्फुटति विन्ध्याद्रौ वाति वा प्रलयानिले ।
नापदि ग्लानिमायान्ति हेमपद्म यथा निशि ॥

केन खलु मनीषिणास्य सिद्धान्तस्य सत्यतोपयोगिता च न प्रत्यक्षीकृता स्वानुभवेन । केन वा महात्मचरितामृतपानरसिकेनेतिहासविदा एतत्पोषकाण्यनेकानेकवृत्तानि नाधीतानि ।

तथा हि, कस्य खलु भगवत्या प्रात स्मरणीयाया सीतायाश्चरितं तिरोहितम् । सा हि जनकनन्दिनी दशवदनेन नीता, हन्त ! तुहिनाविलेव पद्मिनी, मरुमध्यगतेव मराली, निदाघतप्तेव वल्ली, यूथभ्रष्टेव हरिणी, पाशबद्धेव च सारिका, कष्टा दशामागता भर्तृगतमानसा दु खोदधौ भर्तृविरहानलेन दह्यमाना

आशाबन्ध कुसुमसदृश प्रायशो ह्यङ्गनाना
सद्य पाति प्रणयि हृदय विप्रयोगे रुणद्धि ॥

इतिवचोऽनुरूपमात्मान रक्षन्ती, अनेकवार निजप्राणत्यागार्थं कृताध्यवसायापि

विनाशे बहवो दोषा जीवन् प्राप्नोति भद्रकम् ।
तस्मात्प्राणान् धरिष्यामि ध्रुवो जीवति सङ्गम. ।।

तथा "जीवन्नरो भद्रशतानि भुङ्क्ते" इत्यनुसार च धारयन्ती प्राणान्, भगवत आञ्जनेयादवगम्य भर्तु रुदन्त—मुहुरप्यचिरादेव प्राणनाथ सम्प्रेक्ष्य भविताऽहमधन्या धन्या—इत्यवधारयन्ती सहसा कथितवती—

कल्याणी बत गाथेय लौकिकी प्रतिभाति मे ।
एति जीवन्तमानन्दो नर वर्षशतादपि ।।

यथा वा, महाभागो राजराजो नलश्च स्ववर्तिराज्यार्द्धिच्यावित कालपासनेनारण्यादरण्यानी भ्रमन्नपि महत्कष्टजात सहमानोऽपि

विपदि धैर्यमथाभ्युदये क्षमा

•

प्रकृतिसिद्धमिद हि महात्मनाम् ।।
न मृतो जयति शत्रून् जीवन् भद्राणि पश्यति ।
मृतस्य भद्राणि कुत । °
काल समविषमकर परिभवसम्मानकारक काल. ।

इत्यादिवचोऽनुकूल कालविहितमापत्समय भाविन्या सुखसम्भूते प्रत्याशया निनाय।

एवमेवान्येऽपि सहस्रशो दृष्टान्ता आबालप्रसिद्धा ।

तस्मादवितथमेवेद यदापदापगाप्रवाहपतितेन धैर्यमवलम्ब्य निज-दु खसन्ततेरनित्यतामवगच्छता भाविन्या सुखसम्पत्तिसन्तति-सम्भूते प्रत्याशया निजप्राणत्राण विधेयमिति। तदत्र स्मर्यतामेत-दखिलमालोचयत कस्यचिद्विपश्चितामपाश्चात्यस्येद सुभाषितम्—

कोकिल तावद्दिरसानित्यादि ।

---

(२९)

अयि दलदरविन्द स्यन्दमानं मरन्दं
तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गाः।
दिशि दिशि निरपेक्षस्तावकीनं विवृण्वन्
परिमलमयमन्यो बान्धवो गन्धवाहः ॥

इम खलु मोहसलिलप्रचलदूर्मिमालाकुल बहुविधविपज्जाल-ज्वालावलीसुदु सह सस्तृतिपाथोनिधिम्[1], जाग्रत्यपि निखिलभूत-

---

१ पाथोनिधि· समुद्र ।

जातजरयितरि सततमखिलजगद्ग्रसनसमुन्मुखेऽतिदारुणे कराल-कालग्राहपासने, सुधीरधुरन्धरोऽपि बलिना बलिष्ठोऽपि इतरसाहाय्य-निरपेक्ष कोऽन्वेकाकी समुत्तितीर्षु पार गन्तु पारयति। नहि जातु कश्चित्सुधीरपरसाहाय्यनिरपेक्ष क्षणमपि तदुत्तितीर्षासङ्कल्पं मनाङ् मनस्याकलयिष्यति। सत्यप्येव, कोऽपि मेषमुग्धस्तत्सरल विभाव्य तद्व्यापारव्यापृतो वर्त्तते चेत्, नून स्वात्मा तस्य न प्रिय, यदेव जानन्नप्यसौ स्वयमेव पादौ कुठारघात हन्ति। ध्रुवमसावेव-मेव वक्तव्यो यदेनेनाबोधान्धान्धौ[१] निमग्नेन "कृपाणेन स्वेन प्रहृत-मिदमात्मन्यकरुणम्" इति। तदेव को नु प्रेक्षावानवगच्छन्नप्येन-मतिदुस्तर ससारार्णवम्, जगति लघिष्ठान्यपि कार्यजातानि पर-साहाय्यमन्तरेण कर्त्तुमपार्यमाणानि चावलोकयन्, एकाकिना परसाहाय्यमन्तरेण तरणीयमभिधातुमुत्सहिष्यते।

ततश्चाभिहितगुणमेन नितान्तदुस्तर ससारार्णवं समुत्तितीर्षुणा यात्रिणा किन्नु वस्तु समाश्रयणीय यदवलम्ब्यासौ समुत्तरन्नमु ससारसागर नानाविधविपज्जालञ्जालाभ्य स्वात्मान त्रायमाण, करालकालग्राहादात्मान रक्षन्, मोहसलिलप्रचलदूर्मिमालास्वपि कुशलो ससारयात्रामतियापयितुमल भवेदिति मीमासाया विचारपथमवतीर्णायामयमेवार्थ प्रमितित्वेन वक्तव्यो यत् **संसारार्णवं समुत्तरीतु वाञ्छावता निरुपधिसुहृत्सौहार्दपोतमारुह्या-कुतोभयेन संसृतियात्रापरेण भवितव्यम्।**

---

१ अन्धु कूप ।

स्वल्पपरिणाहमप्येतद्वचो रत्नमिवार्थसारवत्, तथ्योपदेशधारि परमोपकारि च । तथा च, यथा हि कश्चिदध्वनीनो महान्तमति-तरलतरङ्गभङ्गसमाकुलम् अध्युषितविकरालनक्रचक्रवाल व्याप्तवाड-वानलं पारावारम[1]वेक्षमाण, एकाकी गन्तु पारमपारयन्, कश्चित् सततमितरहितार्थबद्धपरिकरं सम्पदापत्सहायं कर्णधारमाश्रितस्तत्पो-तमारुह्य निखिलापद्भ्यो निर्विशङ्क सकुशल यात्रामतिवाह्य पारेसागर याति । तादृशो हि कर्णधार उपस्थितायामप्यापदि नहि जातु यात्रिणा सङ्गत्याग विधाय तत्साहाय्यसम्पादनाद्विरमति, पर परप्राणत्राणाय प्राणानप्युपहारीकरोति । यस्तु अभिसन्धाय स्वार्थं द्रव्यादिलाभरूप कञ्चिन् यात्रिणस्तारयति, नहि तत्पोतमारुह्यापि कश्चिन्निर्विशङ्क पार गन्तु पारयति । यावत्सम्पत्तिकालमसौ भवतु तेषा सहाय । विपद पुनर्नामापि श्रुत्वा दूरतस्तत्सङ्ग त्यक्त्वा स्वात्मत्राणार्थं व्रजति ।

एवमेवेह ससारपारावारे बहलापत्परम्परापरिपूर्णे नैकाकी कश्चिज्जातु पारगमनाय प्रभवति, यावन्नासौ परसाहाय्यमादत्ते । तत्रापि यदि स स्वार्थमभिसधाय

कार्यापेक्षी जन प्राय· प्रीतिमाविष्करोत्यलम् ।
लाभार्थी शौण्डिक शष्पैर्मेष पुष्यति पेशलै ॥

---

१ पारावार, समुद्र. ।

इत्याद्यनुरूप यावन् समृद्धिमनुकूल प्रियमधुरभाषिण च कञ्चित् स्वीयसाहाय्यार्थमाश्रयति, नैव तत् तस्य श्रेयसे प्रभवति । नूनमेतादृश सहायो नहि विपत्परम्परापाते सहाय । सम्पत्तावपि यावत् स्वार्थसिद्धिमेवासौ प्रिय मधुर च मुहुर्मुहुर्भाषमाणोऽपि

सुलभा पुरुषा राजन् सतत प्रियवादिन ।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥

इत्याद्यनुरूप नैव हित ब्रवीति ।

ततश्च

निरुपधिपरोपकार कोऽप्युच्चै स्थायिना भार ।
जगदमृतैरभिषिञ्चन्नञ्चति केनाभिसन्धिना चन्द्र. ॥
सन्तो नहि समीक्षन्ते स्वार्थं परहिते रता. ।
उपकर्तुं प्रिय वक्तु कर्तुं स्नेहमकृत्रिमम् ।
सज्जनाना स्वभावोऽय केनेन्दु शिशिरीकृत ॥
एके सत्पुरुषा परार्थघटका स्वार्थं परित्यज्य ये ।

इत्यादिवचोऽनुकूल निरपेक्षपरहितपालनपरायणमेव सम्पदापत्सहाय सखायमकृत्रिम समाश्रित्य स तत्सौहार्दपोतमारुह्य सक्षेमं ससारयात्रामतिवाह्य तमुत्तरीतुं प्रभवति । एतादृशनिरुपधिसुहृत्सौहार्दपोतमारूढो नून सम्पत्ताविव विपत्स्वपि निर्विशङ्क स्थातुमुत्सहते । यत एतादृशो हि सखा

पापान्निवारयति योजयते हिताय
गुह्यं च गूहति गुणान् प्रकटीकरोति ।

आपद्गत न च जहाति ददाति काले
सन्मित्रलक्षणमिद प्रवदन्ति सन्त ॥
सम्पत्तौ च विपत्तौ च यस्तिष्ठति स बान्धव ।
तन्मित्रमापदि सुखे च समक्रिय यत् ।

इत्यादिवचसामनुरूप सम्पत्ताविव विपत्स्वपि सहाय प्राणपणैरपि परप्राणत्राण विदधाति। नासौ मुधैव स्वीयमनोरथसंसाधनायाहितमपि हितमिव वर्णयन् सततं मधुरैर्वचोभिरेव स्वमित्रं रञ्जयितु चेष्टते, प्रत्युत—"अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभ" इत्यनुसारमप्रियमपि हित ब्रवीति। न पुनर्जातु प्रियमहितम्। एतादृशमेव सुहृदमाश्रित तत्सौहार्दपोतमारुह्य मर्त्य सुखेन ससारपारावारमुत्तरीतु प्रभवति। अत एवोच्यते—

आपन्नाशाय विबुधै कर्त्तव्या सुहृदोऽमला ।
न तरत्यापद कश्चिद्योऽत्र मित्रविवर्जित ॥

नैवात्र सशयलेशावकाश । मन्ये एतमेवार्थमनुवदितु विस्तृतोऽसौ भुवि भारतीयेतिहासतन्त्रगिरा सन्दर्भ, यत समस्तेष्वपि सूक्ष्मेक्षिकया समालोच्यमानेष्वितिवृत्ततन्त्रेषु अयमेवार्थो घनीभावमापन्नो नवनीतायते ।

तथा हि, कस्य तावद् दुर्योधनेतिवृत्तमविदितम्, यदसौ भीष्मविदुरौ निरुपधिसुहृदावनादृत्य कर्णादीन् समाश्रितोऽन्तकान्तिक प्रस्थित.। केन वा राक्षसराजो लोकरावणो रावणो न श्रुत, योऽसौ निरुपधिमित्रम्

अय च राजा व्यसनाभिभूतो
मित्रैरमित्रप्रतिमैर्भवद्भि ।
अन्वास्यते राक्षसनाशनार्थे
तीक्ष्णः प्रकृत्या ह्यसमीक्ष्यकारी ॥
सुनीत हितकामेन वाक्यमुक्त दशानन ।
न गृह्णान्त्यकृतात्मान कालस्य वशमागता ॥

इत्येवमवबोधयन्तमपि विभीषण तिरस्कृत्य प्रहस्तादीनि कपटमित्राणि स्वार्थपराणि समाश्रित्य प्रणाश गत ।

यस्तु पुनर्निरुपधिसुहृत्सौहार्दमाश्रित ससारयात्रापरो भवति नूनमसौ विपत्स्वपि कुशली स्वाभीष्ट याति। यथा हि भगवान् श्रीरामचन्द्रो हनुमन्त लक्ष्मण सुग्रीव च समाश्रित समस्ता दुस्तरा अप्यापद समुत्तीर्य मुहु. स्वाभिलषित लेभे। यथा वा धर्मसूनुरजातशत्रुर्भगवन्त श्रीदेवकीनन्दन समाश्रित्य सर्वापद समुत्तीर्णवान् ।

ततश्चावितथमेवैतद्यन्निरुपधिसुहृत्सौहार्दमाश्रित्यैव मानवोऽशेषापद. सकुशल समुत्तीर्य, सुखेन च ससारयात्रामतिवाह्य स्वाभीष्ट लभते।

ततेतदखिलमालोचयत. कस्यचिद्विपश्चिच्छिरोमणेरिदमरविन्दान्योक्तिरूप सुभाषित वच स्मर्यमाणमतितरामभिराम मनो हरति—

अयि दलदरविन्द स्यन्दमान मरन्दमित्यादि ॥

(३०)

पुराणेषु विकासवादः

विदितमेवैतत्प्रायेण सर्वेषामपि समयविदा विदुषा यत्पाश्चात्या विद्वासो विकासवादमाददते। सर्वेषामपि प्राणिनामप्राणिना वा क्रमेणोन्नतिरिति तन्मतम्। तेन खलु वर्षशतात्पूर्वमासीद्यादृश जगत्, तदपेक्षयाद्य वर्तते बहुतरमुन्नतम्। अद्य च यादृशम्, तदपेक्षयेद भाविनि समयान्तरे भविष्यत्युन्नतमेव। सेय क्रमिकोन्नतिधारेति फलति। वयन्तु (भारतीया) तद्विपरीतवादिन इवेति प्रसिद्धि। अस्त्यय सस्कार आबालवृद्धमस्मद्देशे, यज्जडचेतनोभयात्मकमपीद जगद् यथाभवद्वर्षशतात्पूर्वम्, तदपेक्षया अद्य अवनतम्। न वृक्षास्तादृशा, न वा तथा प्रसवित्री सस्याना विश्वम्भरा। न वान्नादिष्वेव तादृशी शक्ति। का तु कथा मनुष्याणाम्, ते खलु नक्तदिवमायुषा वीर्येण धर्मेण बुद्धया समृद्धया वा ह्रसन्त्येव। सोऽयमास्माकीनो ह्रासवाद। फलमपि किलानुभूयते स्वस्ववादानुकूलमेव, ते खलु प्रत्यहमुन्नमन्त्येव, वयन्तु प्रत्यह वा प्रतिक्षणमवनतिमेवाश्लिष्याम। आस्तामिदम्, विकासवादोऽयमस्मच्छास्त्रेष्वपि सुस्फुटमुपलभ्यते—इत्येवाद्य दर्शनीयम।

क्रमिकोन्नतिवादापरपर्यायोऽयं विकासवाद प्राणिविषये सक्षेपत खलु द्वेधा विभज्य द्रष्टव्य—जगति प्राणिनामुत्पत्तिविषये च, मनुष्याणा सामाजिकव्यवस्थाविषये च। पूर्वत्र तावदेष विकासवादसिद्धान्तः—न खलु भूम्या परिदृश्यमाना इमे सर्वेऽपि प्राणिनो

युगपदेवोदपद्यन्त, अपि तु क्रमेणैषामुत्पत्ति । सा चाप्युत्तरोत्तर-मुन्नतैव । तथा च पूर्वं तिरश्चां तत्रापि प्रथममेकेन्द्रियाणां ततो द्वीन्द्रियाणामनन्तरं त्रिचतुरेन्द्रियाणां पञ्चेन्द्रियाणां च तदनु क्रमेण समनस्कानां मनुष्याणामुत्पत्तिरिति तत्सिद्धान्त· फलति[1] ।

सोऽयं सिद्धान्त. कथञ्चित् पौराणिकं सृष्टिक्रममनुसरतीव । तथा हि—सर्वेष्वपि पुराणेषु नवविधसृष्टिप्रतिपादनावसरे पूर्वं वृक्षाणां तदनु तिरश्चां ततो देवानां ततश्च मनुष्याणां सृष्टिरभिहिता । यथा विष्णुपुराणे (१ अंशस्य ५ अध्याये)—

सृष्टिं चिन्तयतस्तस्य कल्पादिषु यथा पुरा ।
अबुद्धिपूर्वक सर्ग प्रादुर्भूतस्तमोमय ॥ ४ ॥
तमो मोहो महामोहस्तामिस्रो ह्यन्धसञ्ज्ञित ।
अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मन ॥५॥
पञ्चधावस्थित सर्गो ध्यायतोऽप्रतिबोधवान् ।
[2]बहिरन्तोऽप्रकाशश्च संवृतात्मा नगात्मक[3]॥६॥
मुख्या नगा यत प्रोक्ता मुख्यसर्गस्ततस्त्वयम् ।
त दृष्ट्वाऽसाधक[4] सर्गममन्यदपर पुन ॥७॥

---

१ वानरा एव पुच्छघर्षणेन मनुष्यतया परिणता इति डार्विन्-मतमप्येतत्सिद्धान्तमनुसृत्यैव प्रवृत्तम् ।

२ बहि· शब्दादिषु, अन्त. सुखादिषु च प्रकृष्टज्ञानरहित ।

३ वृक्षरूप ।

४ ससाराप्रवर्तकम् ।

तस्याभिध्यायतः सर्गस्तिर्यक्स्रोतोऽभ्यवर्तत ।
यस्मात्तिर्यक्प्रवृत्ति स तिर्यक्स्रोतास्तत स्मृत ॥८॥
पश्वादयस्ते विख्यातास्तम प्राया ह्यवेदिन. ।
उत्पथग्राहिणश्चैव तेऽज्ञाने ज्ञानमानिन. ॥९॥
अहकृता अहंमाना अष्टाविंशद्वधात्मका[१] ।
[२]अन्त.प्रकाशास्ते सर्वे [३]आवृताश्च परस्परम् ॥१०॥
तमप्यसाधक मत्वा ध्यायतोऽन्यस्ततोऽभवन् ।
ऊर्ध्वस्रोतास्तृतीयस्तु सात्त्विकोर्दुध्वमवर्तत ॥११॥
ते सुखप्रीतिबहुला बहिरन्तश्च नावृता ।
प्रकाशा बहिरन्तश्च ऊर्ध्वस्रोतोद्भवा स्मृता ॥१२॥
तुष्टात्मानस्तृतीयस्तु देवसर्गस्तु स स्मृत ।
तस्मिन् सर्गेऽभवत्प्रीतिर्निष्पन्ने ब्रह्मणस्तदा ॥१३॥
ततोऽन्यं स तदा दध्यौ साधक सर्गमुत्तमम् ।
[४]असाधकास्तु तान् ज्ञात्वा मुख्यसर्गादिसभवान् ॥१४॥
तथाभिध्यायतस्तस्य सत्याभिध्यायिनस्तत. ।
प्रादुर्बभूव चाव्यक्तादर्वाक्स्रोतास्तु साधक ॥१५॥

---

१ ज्ञान-तुष्टि-विपर्ययात्मका एते वधा. साख्यदर्शने प्रसिद्धा. ।

२ सुखदु खाद्यनुभववन्त ।

३ पितृ-पुत्रादिसम्बन्धज्ञानशून्या ।

४ केवल भोगप्रसक्ता इति कर्मणामनारम्भेण ससारस्याप्रवर्तका देवा अपि ।

यस्मादर्वाग्व्यवर्तन्त ततोऽर्वाक्स्रोतसस्तु ते ।
ते च प्रकाशबहुलास्तमोद्रिक्ता रजोऽधिका ॥१६॥
तस्मात्ते दु खबहुला भूयो भूयश्च कारिण ।
प्रकाशा बहिरन्तश्च मनुष्या [1]साधकास्तु ते ॥१७॥

तदत्र सृष्टिक्रमे सक्षेपतो विकासवादसिद्धान्त एव प्रख्यापित —इति स्फुटमेव समीक्षादक्षाणाम् । इयास्तु विशेष , नास्माकमय विकासवादोऽन्येषा (युरोपीयादीना) विकासवाद इव निरीश्वरवाद , क्रमिके विकासेऽप्यत्र तत्तच्छक्त्याविर्भावस्य कारणसामग्र्याः सनिधापयिता कश्चिदीश्वरपदवाच्योऽभ्युपगम्यत एव । किं वा सन्निधापयिता, ईश्वर एव तत्तच्छक्त्यावेशेन भिन्नभिन्नै. स्वरूपैरवभासत इति

"इन्द्रो मायाभि पुरुरूप ईयते ।"
"एक सद्विप्रा बहुधा वदन्ति ।"

इत्यादि पदे पदे समुदुघोषयतामार्याणा स्फुटोऽभिमानः । तत एवात्र ईश्वरस्यैव क्रमेण सर्वविधप्राणिजनकत्वमाख्यातम् ।

निखिलसिद्धितुष्टिविशिष्टाना देवाना सर्गो यद्यपि विकासवादे मानुषसर्गादनन्तर प्रतिपादयितुमुचितस्तथापि कर्मभिः सर्गप्रवर्तकत्वमत्र सृष्टिप्रकरणे मुख्य विवक्षितम् । सा च यज्ञादिकर्मणा शक्तिरुत्तरोत्तर सर्गप्रतननशक्तिश्च मानुषेष्वेव मुख्यतया प्रादुर्भवतीति त

---

१ कर्मस्वधिकृता ससारप्रवर्तकाः ।

एव सर्वानन्तरजाता' सर्वेभ्यो मुख्यतया विवक्षिता इहाख्याताः। क्वचित्तु ज्ञानोन्नतिक्रमविवक्षया देवाना मुख्यत्वमाख्यायते।

सृष्टिविषयोऽयमतिगभीरार्थगर्भित इति निबन्धान्तरे स्वातन्त्र्येण विस्तरशो व्याख्यायेत, इह तु दिङ्मात्रमेवास्योपदर्श्य विकासवादस्य द्वितीय सिद्धान्त विवरीतुमिच्छाम[1]।

सोऽय द्वितीयो विकासवादस्य सिद्धान्त—यद् न मनुष्यजातिरुत्पत्तिदशायामेव सर्वशक्तिविशिष्टा सर्वकार्यकुशला वाऽभूत्, उत्पन्नमात्रेयमासीत्पशुप्राया। पशव इवादिमा मनुष्या अपि वन्यै फलादिभिराहार वर्तयन्ति स्म, अरण्ये वृक्षाणामधो गिरिगुहादिषु च वसतिमाश्रयन्ति स्म। पूर्वमिमेऽभवन्नग्ना, तदुत्तर तु वल्कलधारका। विद्यायाः सभ्यताया वा नासीत्कथापि। अथ क्रमेणोन्नतमस्या जातेर्ज्ञानम्। कृषिपद्धति., गृहग्रामनगरादिनिर्माणम्, वस्त्रादिविरचनम्, शस्त्रादिधारण च क्रमेणैव बुद्धौ मनु-

---

१ केचित्तु मत्स्य-कूर्म-वराह-नृसिंह-वामन-परशुराम-राम-कृष्ण-बुद्ध-कल्कीते दशावतारक्रमेणापे पूर्व जलचरा जीवा, ततो जल-स्थलोभयचरा, ततोऽरण्यचरा, ततोऽर्धग्राम्या, ततो लघव' पुरुषा, तत केवलबलशालिन, ततश्च राज्यादिप्रबन्धकुशला बलवन्त, ततश्च राजनीतौ ज्ञाने बले च सर्वत्र मानुष्यस्य पूर्णतानुपगता, ततोऽनन्तर विरक्ता, ततश्च समाजोद्धारका' पुरुषा उत्पद्यन्त इत्येव विकासवाद स्फोरयन्ति, न तु तच्छास्त्रे क्वचिदेवं परिष्कृत मित्युनेच्यते।

ष्याणामुपारूढम् । सर्वाऽपि विद्या क्रमेणैव विकासमलभत, लभते, लप्स्यते च । तेनाद्यावधि अनाविष्कृता अपि बह्वय कला काले प्रादुर्भवेयुरेव । अद्य पर्यन्तमननुशीलिता अपि बह्वयः शक्तय क्रमेणा-नुशीलन प्राप्नुयु । अननुशीलितास्तु काश्चन शक्तयो विनाशमप्यु-पगच्छन्ति, तेन सभाव्यते कस्मिश्चिद् विषयेऽवनतिरपीत्यादि ।

सोऽय सिद्धान्त कस्मिश्चिदशे प्रकारभेदेन पुराणेष्वपि स्फुट निबद्ध । तथा हि—**मार्कण्डेयपुराणे सृष्टिप्रकरणे** (४५-४६ अध्यायचो॰) नवविधभूतसर्गादिविवरणानन्तर मानुषसर्गविस्तरे प्रकृते ब्रह्मणो ब्राह्मणादीना बहुविधाना मनुष्याणामुत्पत्तिमभि-धाय तदनन्तर स्त्रीष्वार्तवप्रवृत्त्या स्त्रीपुससयोगादायुषोऽन्ते सन्ता नप्रवृत्तिरित्युपवर्ण्य तस्मिन् काले प्रजाना का स्थितिरित्युपनि-बद्धमारब्धम् (४६ अध्याये १० श्लोकानन्तरम्) (विस्तरभिया सर्वान् श्लोकाननुपन्यस्य तदाशय एवानूद्यते विशेषेण) —

(कृतयुगे) तासा प्रजाना ध्यानेनैव शब्दाद्या इन्द्रियविषया उपनमन्ति स्म । ते जना सरित्सर समुद्रपर्वतानुपसेवन्ते स्म । शीतोष्णभयमल्पमभूत् । इच्छा-द्वेष, सुख-दु ख, प्रियाप्रियादि-द्वन्द्वरहिता अमत्सरास्ते स्वाभाविकी तृप्तिमधिगच्छन्ति[१] स्म ।

---

१ "पृथ्वी रसवती नाम आहार व्याहरन्ति च" इति तु ब्रह्माण्ड-पुराणे (७ अ०, ४२ श्लो०) । "तुल्यमायु सुखं रूपम्", "धर्माधर्मौ तदा न स्त", "समूलफलपुष्पाणि वर्तनाय त्वशेषत:", "उत्तिष्ठन्ति पृथिव्या वै तेषा ध्यानै रसातलात् । बलवर्णकरी तेषा जरारोगप्रणाशिनी", "असस्कार्यै. शरीरैस्तु प्रजास्ता· स्थिरयौवना" इत्याद्यपि तत्र ।

अनिकेता (गृहादिरहिता) पर्वतसमुद्रादिषु तत्र विचेरु:। पिशाचोरगरक्ष पशु पक्षिसरीसृपनक्रमत्स्याद्यास्तस्कराद्याश्च तेभ्यो भय न प्रायच्छन्। ऋतुजन्यानि मूलफलपुष्पाणि तदा न बभूवु । सर्वदैव नात्युष्णशीत. सुख कालोऽभूत्। कालपरिवर्तन नित्य-तृप्ताना तेषा पूर्वाह्णे मध्याह्ने च वितृप्तता आविर्भवति स्म, परमि-च्छतामेवानायासेन तृप्तिरुदभूत्।

"इच्छता च तथायासो मनस समजायत।
अपा सौक्ष्म्य ततस्तासा सिद्धिर्नाम्ना रसोल्लसा ॥२०॥
[1]समजायत चैवान्या सर्वकामप्रदायिनी।
असस्कार्यै: शरीरैश्च प्रजास्ता' स्थिरयौवना ॥२१॥
तासा विना तु संकल्प जायन्ते मिथुना प्रजा ।
समं जन्म च रूप च म्रियन्ते चैव ता समम् ॥२२॥
अनिच्छाद्वेषसंयुक्ता वर्तन्ते तु परस्परम्।
तुल्यरूपायुष: सर्वा अधमोत्तमता विना ॥२३॥
कचित्क्वचित्पुन साभूत् क्षितिर्भाग्येन सर्वश ।"

---

१ ब्रह्माण्डे—"कल्पादौ मानसी ह्येका सिद्धिर्भवति सा कृते" "तस्या सिद्धौ प्रणष्टायामन्या सिद्धिरजायत। अपा सौक्ष्म्ये प्रति-गते तदा मेघात्मना तु वै। मेघेभ्य. स्तनयित्नुभ्य. प्रवृत्त वृष्टि-सर्जनम्। सकृदेव तया वृष्ट्या ससिद्धे पृथिवीतले। प्रजा आसस्त-तस्तासा वृक्षाश्च गृहसज्ञिता." इत्यादि।

अथ क्रमेण कालपर्य्ययात्तासा सिद्धीना नाशे आकाशात्प्रच्युता रसाः (पयस) कल्पवृक्षा भूत्वा तद्गृहस्थिता अभूवन्। त्रेतायुगमुखे च तेभ्य एव वृक्षेभ्यस्तासा प्रजाना सर्वविधा प्रत्युपयोगाः (आहार-परिधान-शीतोष्णनिवारणाद्या) समजायन्त। ते वृक्षा एव तज्जीवनान्यभूवन्। सर्वेषा साधारण्येन भोग्यास्ते वृक्षा आसन्। कालपर्ययेण तु तेषा जनाना मनसि राग उद्बभूव। स्त्रीषु च मासि मास्यार्त्तव भूयो भूयश्च गर्भोत्पत्ति प्रवृत्ता। तदैव ते वृक्षा विलय गता ।

अथापरे चतु शाखा वृक्षा पृथिव्या प्रादुरभूवन्—

"वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च ॥३०॥
तेष्वेव जायते तेषा गन्धवर्णरसान्वितम्।
अमाक्षिक महावीर्य पुटके पुटके मधु ॥३१॥
तेन ता वर्तयन्ति स्म मुखे त्रेतायुगस्य वै।"

एव साधारण्येन वृक्षैर्वर्तयता तेषा मनसि रागो लोभात्मना परिणत.। ततश्च ममेद ममेदमिति वृक्षान् परिगृहीतवन्तः (स्वत्वमभिमन्यन्ते स्म)। तेनापचारेण तेऽपि वृक्षा नष्टप्राया [१]। ततश्च शीतोष्णक्षुत्पिपासादीनि द्वन्द्वानि प्रजा पीडयामासु। ततो द्वन्द्वोपघाताय पुराणि तै क्रियन्ते स्म।

---

१ "प्रणष्टा प्रभुणा सार्द्ध कल्पवृक्षा क्वचित् क्वचित्।" इति ब्रह्माण्डादिषु।

"मरुधन्वसु दुर्गेषु पर्वतेषु दरीषु च ।
सश्रयन्ति च दुर्गाणि वार्क्षं पार्वतमौदकम् ।।३५।।
कृत्रिम च तथा दुर्गं मित्वा मित्वात्मनोऽङ्गलै ।
मानार्थानि प्रमाणानि तास्तु पूर्वं प्रचक्रिरे ।।३६।।

(अत्र वितस्ति-हस्तादीनि भूम्यादिमानानि सर्वाण्याख्यातानि, पुराणा च पुर-खेटक-द्रोणीमुख शाखानगर-खर्वटक-ग्राम घोषादिभेदा-स्तत्प्रमाणानि लक्षणानि च विस्तरेणाभिहितानि, तानि प्रकृतानुपयो-गादुपेक्ष्यन्ते ।)

एव ता प्रजा पुरग्रामादि कृत्वा अथ शीतोष्णादिशान्तये गृहाणि निर्ममु । पूर्वं हि ता वृक्षाश्रया पर्वताश्रया वा आसन्, तत्र वृक्षशाखाना पर्वतदरीणा वा यादृशा आकारा हृदयगमा बभूवुस्तत्सादृश्येनैव गृहाणि विरचयितुमारब्धानि। (जायन्ते किलाद्यापि बहुत्र वृक्षाणा गृहाकारा. प्राकृता सन्निवेशा , पर्वतदरीषु तु स्फुटमेव भवति बहुत्र प्रासादादिसाम्यम् । "तद्धि जानन्ति तद्विद ")

"वृक्षस्यैव गता. शाखास्तथैव चापरा गताः ।
नताश्चैवोन्नताश्चैव तद्वच्छाखा प्रचक्रिरे ।।४३।।
या· शाखा· कल्पवृक्षाणा पूर्वमासन् द्विजोत्तम ।
ता एव शाखा गेहाना शालात्व तेन तासु तत् ।।४४।।"

(शाखासादृश्याद् गृहभागा अपि शालेत्याख्याता इति भाव.) ।

एव द्वन्द्वोपघात (शीतोष्णादिनिवारण) कृत्वा ततस्ते जना

वृत्तमधूना नष्टत्वाद् वार्तोपाय (जीवननिर्वाहयत्न) चिन्तयामासु'। तेषु क्षुत्तृडाद्यर्दितेषु विषादव्याकुलेषु (त्रेतायुगमुखे) वृष्टिरुदभूत्। वृष्टेरुदकानि च यानि निम्नगतानि तान्यवरोधात् स्रोत खातादिरूपेण परिणतानि, (नद्यश्च प्रवृत्ता) ततो भूमेरपा च सयोगादफालकृष्टा ग्राम्यारण्याश्चतुर्दशौषधय प्राद्ुर्भूता ।

"ऋतुपुष्पफलाश्चैव वृक्षा गुल्माश्च जज्ञिरे ।
प्रादुर्भावस्तु त्रेतायामाद्योऽयमौषधस्य तु ॥६०॥
तेनौषधेन वर्तन्ते प्रजास्त्रेतायुगे मुने ।"

अथ रागलोभाभिभूतैर्जनैर्नदीक्षेत्रपर्वतादीना वृक्षगुल्मौषधादीना च ममत्वेन परिग्रह आरब्ध । तेनापचारेण भूमिस्तान्यौषधान्यप्यग्रसत्। नष्टास्वोषधीषु विभ्रान्ता क्षुधाकुला, प्रजा ब्रह्माण शरण प्रापु । स च तासा पीडानिवारणाय सुमेरु वत्स कृत्वा वसुधा दुदोह, तदा सस्यान्युत्पन्नानि।

"जज्ञिरे तानि बीजानि ग्राम्यारण्यास्तु ताः पुन ॥६६॥
ओषध्यः फलपाकान्ता गणाः सप्तदश स्मृता,
व्रीहयश्च यवाश्चैव गोधूमा अणवस्तिला, ॥६७॥
प्रियङ्गव कोविदारा कोरदूषा सतीनका ।
माषा मुद्गा मसूराश्च निष्पावा सकुलत्थकाः ॥६८॥
आढक्यश्चणकाश्चैव गणा सप्तदश स्मृता'।"
(अग्रे आरण्या यज्ञियाश्चौषधय आख्याताः)।

यदा ताः पुनर्न प्रारोहन्त तदा ब्रह्मा कर्मजा हस्तसिद्धिमाविर्भावयत्। ततः प्रभृति कृष्टपच्या ओषधयो जज्ञिरे। एवं वार्ताया सिद्धाया चातुर्वर्ण्यमर्यादा स्थापिताऽभूत्। धर्मानुवर्तिनां तत्तद्वर्णाना-माश्रमाणां च ऐन्द्रमारुतप्राजापत्यादीनि स्थानानि ब्रह्मणा नियमितानि। (ततो[1] दण्डनिर्माणं राजप्रजाव्यवस्था च प्रावर्तत। सरीसृपादिभ्यो भयं चापि प्रजासु प्रवृत्तम्)।

इत्येवमेषा युगाख्यायिका मार्कण्डेयेनाभिहिता।

वायुप्रोक्ते ब्रह्माण्डपुराणे द्वितीयेऽनुषङ्गपादे सप्तमाध्याये चाप्येतत्प्रायेणैवमेवोक्तम्। वायुपुराणे चादितोऽष्टमेऽध्याय इत्थमेव सर्वमभिहितम्। अग्रे वायवीयेऽष्टपञ्चाशेऽध्यायेऽपि विस्तरेण युगाख्यानमित्थंप्रायमेव। त्रेताया त्रयीविद्यालाभ यज्ञादिकर्मप्रवृत्तिश्च बहुधा तत्र तत्राभिहिता। अथास्य विस्तृतमभिप्राय तत्र स्वाभिप्रायमाधुनिकाद्विकासवादादत्र विशेष च समयान्तरे पाठकेभ्य उपहरिष्याम।

[महामहोपाध्याय श्री प० गिरिधरशर्मचतुर्वेदस्य।

---

१ "वर्णधर्मैश्च जीवन्त्यो व्यरुद्ध्यन्त परस्परम्। ब्रह्मा बुद्ध्वा तु तत्सर्वं याथातथ्येन स प्रभु। क्षत्रियाणां बलं दण्डं युद्धमाजीव्यमादिशत्।" इत्यादि ब्रह्माण्डे वायौ च।

(३१)

वाराणसीवैभवम्

सकलभुवनललामभूतेय समस्तपुण्यपुरीसम्राज्ञी वाराणसी, न केवल भूतल एव, अपि तु लोकत्रयेऽपि, पवित्रतातिरेकसम्पादिकेतिप्रथितकीर्ति, भगवतो नवचन्द्रमौलेस्त्रिशूलोपरि विराजमाना, मुक्तिप्रदायिनीति प्रथितयशोऽवदाना, सकलतीर्थानामेकमायतनम्, विद्याश्रियोर्मातृसदनम्, भवन वैभवस्य, आस्पद साधुताया, कुलभवन तपस्याया, आकरो ज्ञानस्य, निधान वैचित्र्यस्य कस्य वा न विदिता सचेतस ।

(१)

अस्या महिमानमुपवर्णयन्तो न विरमन्ति परमपूरुषनिश्वसितात्मका अबाधिता अक्षयाश्चत्वारो वेदा पुराणानि सेतिहासानि च ।

इयमेव हि पुरा कृतयुगे राजर्षेर्दिवोदासस्य राजधानीत्वमासेदुषी सौभाग्यसम्पत्समृद्धिभिर्दिवौकसामपि स्पृहणीया बभूव । अथानेकप्रकारै कपटै कूटनीतिपाटवैश्च निर्वासिते ऋजुस्वभावे भूपतौ दिवोदासे देवगणै सम्भूय समभ्यर्थितो भगवान् महादेवो विश्वनाथस्त्रिलोकीकल्याणकामना चेतसाकलयन् विहाय कैलासमस्यामेव वसतिं चक्रे। प्रार्थनापूर्तिमुदितान्तरा निर्जरा अपि परमोत्सवपुर सर मुक्तिसाम्राज्यसिंहासने भगवन्त विश्वनाथ-

मभिषिच्य साम्राज्यसुव्यवस्थासम्पादनाय कालभैरवढुण्ढिदण्ड-पाणिप्रभृतीन् नियोजयामासुः। आदिकेशवकेदारादिखण्डानि साम्राज्यान्तर्गतस्वायत्तशासनानि पृथगवतस्थिरे।

मुमुक्षुभ्यो मुक्तहस्तं पायसान्नं वितरन्ती मूर्तिमती माङ्गल्यदेवता शैलाधिराजदुहिता श्रीविश्वनाथदयिता भगवत्यन्नपूर्णाऽपि साकं स्वपरिवारेणात्रैव समागत्य मुक्तिसाम्राज्यसम्राज्ञीपदं समलञ्चकार। सर्वे देवाः सवाहनाः सायुधाः समागत्य स्वस्वाधिकारानुरूपां भगवतो विश्वनाथस्य सेवां विदधाना विस्मृतस्वर्गा अत्रैव वसतिं चक्रिरे।

भगवान् विश्वनाथोऽपि विनश्वरतनूमूल्येन सर्वोपायदुरवापामपि मुक्तिमाकीटमापामरं समानभावेन विक्रीणानः कति कति वा न सुकृतिनो मुक्तिभाजो विदधे।

अत्र हि केवलं शरीरपात एव मुक्तिलाभाय प्रभवति। इयं च भगवतो विश्वनाथस्यानन्दकाननमिति व्यवह्रियमाणा सत्य-मेवानन्दकाननं सलक्ष्यते।

भगवती जह्नुतनयापि पापिनः समुद्धर्तुकामा गङ्गाधरस्य कपर्दबन्धान्निष्क्रम्य विश्वेशितू राजधान्या अस्या वाराणस्याः पादमूलं क्षालयन्ती सुधासमधिकस्वादुना स्वपाथःप्रवाहेण तृषार्तानां परमां तृप्तिमातन्वती समुद्धरन्ती पातकिनः प्रौढेव विगतचापल्या शान्तात्मनाऽत्र प्रवहति।

सत्यमूर्तिर्महाराजहरिश्चन्द्रोऽपि गाधिनन्दनेन राज्यमपहृत्य निर्वासित. सन् चाण्डालराजे आत्मान विक्रीय तदनुचरीभवन्नत्रैव केदारखण्डे भागीरथीतटे प्रभोरर्थे प्रेतवस्त्राणि सञ्चिन्वन्नराजत। तेन प्रतिष्ठापितो हरिश्चन्द्रेश्वरोऽद्यापि जनै सभक्त्युन्मेषमवलोक्यते।

अष्टादशपुराणाना निर्मातापि कृष्णद्वैपायनो व्यासो ढुण्डिगणपते कपटबटुवेषपाटवेन प्रतारित सन्नितो निर्वासितो भूत्वा गङ्गाया परतीरे मगधेषु वास कल्पितवान्। केवल कृष्णचतुर्दश्या भगवन्त विश्वनाथं द्रष्टुमनुमतस्तावतैवात्मान धन्य मन्यते।

अत्रैव भगवतो विष्णोरशभूतेन भगवता धन्वन्तरिणापि आयुर्वेदविद्यासम्प्रदाय प्रवर्तित। वृद्धकालेश्वरनिकटे 'धन्वन्तरिकूप' इति प्रसिद्ध सकलामयोपसर्गदूरीकरणपटुरद्यापि स कूपो भक्तिमद्भिर्जनै. सादरमवलोक्यते निषेव्यते च। यत्प्रभावेण सर्वे रोगाः सहसैव दूरमपसरन्तीति विश्वसन्ति परमास्तिका सज्जना।

मुक्ताभियुक्तजनतापरिभूषितायामस्यामेव वाराणस्या भगवतो नवजलधरद्युतेर्विष्णोस्तल्पसङ्कल्पसम्पादनसमर्पितवपुषो नागराजस्य शेषस्यावतारभूतो भगवान् पतञ्जलिराविर्भूय महाभाष्य प्रणिनाय। तदावासभूते नागकूपेऽद्यापि श्रद्धालवो जना. शब्दशास्त्रनैपुण्यकामनया स्नान्ति जपन्ति पूजयन्ति च। श्रावणशुक्ले नागपञ्चम्या

प्रतिवर्षं पण्डितानां विद्यार्थिनां च शास्त्रार्थकोलाहलं कामपि कमनीयां कोटिं प्रकटयति।

(२)

अष्टमे शतके लब्धजन्मना काश्मीरकेण कविपुङ्गवेन दामोदरगुप्तेन स्वकीये कुट्टिनीमते इयमेव काशी सविशेषं वर्णिता वर्तते।

बौद्धसाहित्येऽपि जातकेषु प्रायो वाराणसीतिनाम्नास्या एव काशिकाया सौभाग्यसम्पत्समृद्धिं सातिशयं वर्णिता दृश्यते। काश्या निकट एव सम्प्रति 'सारनाथ' इतिनाम्ना प्रसिद्धं स्थानं बौद्धकाले 'मिगदाव' इतिनाम्ना प्रसिद्धमासीत्। यच्च जातकानुसारेण मृगरूपेणावतीर्णस्य भगवतो बुद्धस्य निवासस्थानमिति पवित्रतीर्थात्मना बौद्धैरद्यापि सम्मान्यते। तत्रैव तदनु सम्राजाशोकेन निखातः स्तम्भोऽद्यापि समतीतसार्द्धद्विसहस्रसंवत्सरमैतिह्यमितिहासरसिकानां पुरः समुपस्थापयति। इदमेव हि लोकोत्तरत्वमस्याः काशिकाया यदसौ सनातनधर्मस्य मातृगृहभूतापि बौद्धजैनादिधर्माणामपि प्रसारलीलाभूमिर्बभूव। इदमेव हि धर्मचक्रप्रवर्त्तनस्थानं बौद्धानाम्। प्रसिद्धानेकतीर्थङ्करलीलाभूमिश्च जैनानाम्। बौद्धयुगे च गङ्गाया नौकाद्वारा व्यापारस्य केन्द्रभूतमिदं नगरमासीत्। जातकेषु अत्रत्या धनिनो महाजनाः 'सेट्ठि' नाम्ना व्यपदिष्टाः सन्ति। तदानीं काशिकं वस्त्रं द्वीपान्तरेष्वपि रत्नमिव परिगण्यते स्म।

अथ बौद्धप्रभावादस्तमितप्राय सनातनधर्ममुद्दिधीर्षु शङ्करावतारो भगवान् शङ्कराचार्योऽपि केरलेषु लब्धजन्मा काश्यामुपगतो चाण्डालवपुर्धारिणा भगवता व्यासेन स्पृष्ट सन्नात्मानमशुचिं मन्वानो तेन परिबोधित एव तत्त्वज्ञानमवाप्तवान्। अन्वभूच्च सपदि ज्ञानोत्पादनमाहात्म्य काशिकाया ।

एवमेवान्येऽप्याचार्या सम्प्रदायप्रवर्त्तका काशीनिवासमहिम्ना लब्धपरिशुद्धावबोधा एव जनानुपदेष्टु मोक्षमार्गे प्रवर्त्तयितुञ्च प्राभवन्। वैष्णवेषु श्रीवल्लभाचार्यस्य काश्या सुचिर निवास आसीदिति तु शतश. प्रमाणजातैरपरोक्षमेव प्रेक्षावताम्। वङ्गीयवैष्णवसम्प्रदायप्रवर्त्तक श्रीमान् चैतन्यदेवोऽपि काश्या निवसन्नेव सनातनमुपदिदेश। अत्रत्य प्रसिद्ध सन्यासी प्रकाशानन्दोऽपि तेनानुगृहीतस्तस्य शिष्यो भूत्वा प्रबोधानन्दनाम्ना प्रसिद्धमुपाजगाम ।

(३)

काशिकापतेर्भगवतो विश्वनाथस्य मन्दिरमधिकृत्य कापि चित्तमुद्वेजयन्ती कथा प्रथिता वर्त्तते। प्राचीनेतिहासेषु काश्या अविमुक्तक्षेत्रमिति, काशीपतेरविमुक्तेश्वर इति च नाम प्राय. सर्वत्रैव समुपलभ्यते। 'काशी', 'विश्वेश्वर' इति नामनी तु नातितमा प्राचीने इत्यपि शक्य वक्तुम्। 'कालापहाड' इतिनाम्ना प्रसिद्धेन यवनराजसेनापतिना सर्वादौ श्रीविश्वनाथमन्दिरं निपातितमासीत्। ततः परम् आस्तिका मणिकर्णिकातीर्थ एव श्रीविश्वनाथ

भावयन्त पूजयन्त कथमपि चेतासि समादधिरे। वैक्रमपञ्च-दशशतके प्रादुर्भूतेन भट्टनारायणेन स्वप्रभावचमत्कृतटोडरमल्ल-महीपालद्वारा अकबराख्ययवनसम्राजोऽनुग्रहमासाद्य लक्षसुवर्णमुद्रा-व्ययेन रमणीयतमभ्रंलिहशिखर नव मन्दिर निर्माय पुन प्रतिष्ठा-पितो विश्वनाथ काशिकायाम्। तत. परमकबरप्रपौत्रेण मूर्तिम-तेव हिन्दूना दुर्भाग्धेयेन औरङ्गजेबनाम्ना तात्कालिकेन यवन-सम्राजा स्वकीयेन सुयशसा सहैव तन्मन्दिरं पुनर्निपातितम्। अथ पेशवाख्यस्य दाक्षिणात्यब्राह्मणराजस्य सौभाग्यवृद्धये काश्या तप-श्चरणमनुतिष्ठता तपोमूर्तिना सिद्धिसमृद्धेन पाटणकरनारायण-दीक्षितेन स्वप्ने भगवदादेशमासाद्य पुन प्रतिष्ठापितो भगवान् विश्वनाथ.। मन्दिर च जगत्प्रसिद्धदातृतामहिम्ना साध्वीकुलल-लामभूतया 'अहिल्याबाई' इतिप्रसिद्धया 'इन्दोर' महाराज्ञ्या निर्मा-पितम्। सौवर्णशिखर च सूरशिरोमणिना रणजीतसिंहेन सघ-टितम्। तदेवेद मन्दिरम्, स एव च भगवान् विश्वनाथ परमा-स्तिकाना सकल्पकल्पनाय कल्पतरुरिव विराजमानोऽद्यापि हिन्दूनां गौरवमक्षुण्णमिव रक्षति।

(४)

प्राय सर्वेष्वेव शास्त्रेषु तत्तच्छास्त्रीयनिबन्धनिर्मातार. प्रधानपण्डिता अपि स्वस्वनिवासेनेमा काशिका समलचक्रिरे। तत्र व्याकरणे पतञ्जलिरत्रैव नागकूपे निवसन् महाभाष्य प्रणिनायेति किंवदन्ती जागर्ति। काशिकाकारौ वामनजया-

दित्यावपि कञ्चित्काल काशीमेवालकुरुतः स्म। अर्वाचीनेषु प्रक्रियाकौमुदीकारो रामचन्द्राचार्यः, सर्वतन्त्रस्वतन्त्रो महावैयाकरणोऽनेकप्रबन्धनिर्माता श्रीशेषकृष्ण, सिद्धान्तकौमुद्यादिनिर्माता श्रीभट्टोजिदीक्षित नागेशभट्टश्च काशिका एवासन्। तत पर तच्छिष्यानुक्रमे पायगुण्डेबालभट्टस्तच्छिष्य' शम्भुदेवो गाडगीळोपनामको जनार्दन काशीनाथशास्त्री राजारामशास्त्री बालसरस्वतीतिप्रथितो बालशास्त्री च सर्वेऽप्यमी दाक्षिणात्या अपि काशिकाशिशव एव प्रथिता अभूवन्। श्रीबालशास्त्रिशिष्येषु प्रसिद्धयशोगौरवा महामहोपाध्यायादिपदाङ्किता राजप्रजोभयसमुपार्जितसम्मानाः श्री६गङ्गाधरशास्त्रि, दामोदरशास्त्रि, शिवकुमारशास्त्रि, तात्याशास्त्रिणोऽपि तथाविधा एव समभूवन्। तच्छिष्यपरम्परास्वेव सम्प्रत्यपि महामहोपाध्यायश्रीनित्यानन्दपन्तपर्वतीय[१]प्रभृतयो महावैयाकरणा विराजन्ते। साहित्यदर्शनादिशास्त्रेषु नव्यप्राच्यन्याययोश्च प्रौढप्रगाढपाण्डित्या श्रीमद्गोस्वामिदामोदरशास्त्रिणोऽपि तादृशा एव।

वेदान्तेऽपि, शङ्करभगवत्पादानन्तर तच्छिष्या पद्मपादाचार्या काशिका एवासन्। तत पर मध्ययुगे मधुसूदनसरस्वतीस्वामिनोऽपि वङ्गीया अपि चरमे वयसि काश्यामेव न्यवसन्। नृसिंहाश्रमस्वामिनोऽपि काशिका एव। स्वयप्रकाशयतय, काष्ठजिह्व-

---

१ स्वर्ग गतोऽसौ महाभाग १६८८ वैक्रमाब्दे।

स्वामिन, पूर्णाश्रमास्तारकाश्रमाश्च सर्वेऽप्यमी वेदान्तदान्ताशया यतिपुङ्गवा काशिका एवासन्।

न्यायेऽपि, भवानन्दसिद्धान्तवागीशा, महादेवदिनकरभारद्वाजौ, कृष्णभट्टो, विद्यानिवासभट्टाचार्यो, विश्वनाथपञ्चानन, पुण्यस्तम्भकरमहादेवो, गङ्गारामजडी च वैदेशिका अपि काश्याञ्चिरमवात्सु। महामहोपाध्यायकैलासचन्द्रशिरोमणिभट्टाचार्यश्च काशीमेव चिर निषेव्य विससर्ज तत्रैव वपु। तच्छिष्येषु प्रमुखो महामहोपाध्यायश्रीवामाचरणभट्टाचार्यो[१]ऽद्यापि काशिकराजकीयपाठशालाया मुख्याध्यापकपदे विराजमानस्तपस्विनी न्यायविद्या सरक्षति।

धर्मशास्त्रेऽपि भट्टभट्टवश्येषु प्रथमगण्या श्रीनारायणभट्टाः शङ्करभट्ट, कमलाकरभट्टो, नीलकण्ठभट्टो, दिनकरभट्टश्च, धर्माधिकारिवश्येषु प्रख्यातकीर्तयो नन्दपण्डिता, शेषवश्येषु शेषश्रीकृष्णाश्च प्रसिद्धा एव ग्रन्थकर्त्तार सम्भवन्।

सांख्येऽपि विज्ञानभिक्षवो, भावेगणेशदीक्षिताः। मीमांसायामपि खण्डदेवा, कविमण्डनशम्भुभट्टा, भट्टवश्याश्च। पुराणे नीलकण्ठचतुर्धरा। ज्यौतिषे कमलाकररङ्गनाथमुनीश्वरा नीलकण्ठदैवज्ञप्रभृतयश्च। तत पर ज्योतिर्विद्यावतारा श्रीमन्महामहोपाध्याय-

---

१ दिव गतोऽसौ महाशय १९८८ तमे वैक्रमाब्दे।

सि० आई० ई० इत्यादिपदवीविभूषिता. श्रीमद्बापूदेवशास्त्रिण-स्तच्छिष्या महामहोपाध्यायश्रीसुधाकरद्विवेदिनश्चन्द्रदेवशर्माणा स्वधर्मधुरन्धरा ज्योति शास्त्रपारदृश्वानो वेतालविनायकशास्त्रिणो घाटेमहादेवशास्त्रिणोऽन्ये च समभूवन्। तन्त्रे प्रेमनिधिभास्करराायादय । अलङ्कारे पण्डितराजजगन्नाथप्रभृतयश्च । सर्वेऽप्यमी वैदेशिका अपि चिर काशीमलङ्कुर्वन्तस्तास्तान् प्रबन्धान् प्रणयन्ति स्म । तेषु बहूना वश्या अद्यापि स्वपूर्वजगौरवेण समाजे लब्धपूजा पूज्यत्वेन जाग्रति। महानैयायिको मिथिलालङ्कार शङ्करमिश्रोऽपि चरमे वयसि काशीमेव सेवते स्मेति प्रसिद्धमस्ति।

सिद्धपुरुषविषयेऽपि काशिकागौरवमसामान्यमेव। अत्र हि मुक्तिपुर्या देवदेव विश्वेश निषेवितुकामा प्राय सर्वेऽपि सिद्ध-पुरुषा निवास भेजिरे। प्रसिद्धो रामभक्तो गोस्वामितुलसीदासोऽपि काशिक एवासीत्, अत्रैव च विससर्ज पार्थिव वपु । परमप्रख्यात-यशस. कबीरस्यापि काशिकैव जन्मभू । लोकोत्तरसिद्धिशाली परमहंसस्तैलङ्गस्वाम्यपि काशिक एव। स्वामी भास्करानन्दोऽपि नन्दन काशिकाया। महापण्डितो वशीकृतानेकनरपतिर्योगिराट् स्वामी विशुद्धानन्दोऽपि वाराणसेय एव।

(५)

नास्तिक्यप्रचुरप्रचारविषमेऽपि **वर्तमानसमये** यादृशी धर्मचर्चा, यादृशश्च सदाचार, यावच्च शास्त्राणा परिशीलनम्, यावन्तश्च धार्मिका काश्यामुपलक्ष्यन्ते न तथान्यत्रेति काशीमाहा-

त्म्यमेवात्र प्रभवति। अत्रत्यो राजकीय संस्कृतमहाविद्यालय. प्रतिवर्षमसख्यान् विदुष परीक्षापाथोधिपरतीरप्रापणेन लब्धप्रतिष्ठान् वितन्वन् सुरभारतीमविरत निषेवते। अत्रत्या अध्यापका अद्यापि प्राचीनगौरवमक्षुरण रक्षन्ति।

काश्या परभागेऽसीसङ्गमतीर्थोत्तरप्रदेशे श्रीमतामसामान्य-गुणगणाना लोकोपकाराध्वरदीक्षिताना श्रीमन्मदनमोहनमालवीय-महोदयाना कीर्तिराशिरिव मूर्तिमान् हिंदूविश्वविद्यालयो नयन-गोचरीभवति। यत्र सर्वा विद्या सर्वा कलाश्च सविशेष शिक्ष्यन्ते। नत्तद्विषयविशेषज्ञाश्च त त विषय सविशेषमध्या-पयन्ति।

इत्थमेव दानशूरस्य निर्भयताप्रथितकीर्तें सरलहृदो धनकुबेरस्य श्रीशिवप्रसादगुप्तमहोदयस्यार्थसाहाय्येन सस्थापित काशीविद्यापीठ-मपि राष्ट्रियशिक्षाप्रचारैकलक्ष्य सुलक्षण सलक्ष्यते। तत्र महादार्शनिका देशकार्यकरणप्रसिद्धा गम्भीरताभूमयो डॉ० भगवान्दासमहोदया कुलपतिपदे विराजन्ते। तेषामधीनत्वे प्रभूता विद्वासस्तानि तानि शास्त्राणि सरहस्य सप्रयोग चाध्यापयन्ति।

राजमहाराजै. श्रेष्ठिभिश्च व्यक्तिश सस्थापिताना विद्यालयाना सख्या तु सम्प्रत्येव शतत्रयादुपरि गच्छन्ती कालक्रमेण भवन्ती तेषामभिवृद्धि द्योतयति। विद्यार्थिनोऽपि नानादेश्या. समागत्य धनिभी राजमहाराजै प्रतिष्ठापितेषु सहस्राधिकेष्वन्नसत्रेषु भुञ्जाना धर्मशालासु छात्रावासेषु च विहितवसतयोऽधीयते।

उदरमिव जगन्निवासस्य भगवतो विष्णो काशिकापि सर्वदेश्य सर्वविधजनतासमावृता कामप्यनुपमा सुषमा वहति। तत्तत्प्रान्ताभिजनैरत्रत्यैर्जनै स्वस्ववीथीषु तथा व्यवस्था विरचिता वर्तते यथा दशाश्वमेधप्रान्ते वङ्गीयाना सविशेष निवासात्स प्रदेशो वङ्गदेश इव लक्ष्यते। एवं हनुमद्घट्टभागे मद्रासप्रान्तीया एव निवसन्तीति स विभागो मद्रासप्रान्त इव। एव महाराष्ट्रीयाणा मैथिलाना च वसतिप्रदेशो महाराष्ट्रभूर्मिथिला च सलक्ष्यते।

काशिकाया पादमूल क्षालयन्त्या भगवत्या जाह्नव्या अवतारतीर्थेषु पङ्क्तिशोऽवस्थिता अनेकमहीपालसुयश स्वरूपा पाषाणनिर्मिता शताधिका घट्टास्तु सकलभूतलविलक्षणसुषमा अनन्यसामान्या एव। पञ्चगङ्गातीर्थनिकटे औरङ्गजेबनिर्मापितमस्जिद मध्यवर्त्ती समुन्नततमो दूरवीक्षणयूपसौधो[१] (माधोलाल का धरेरा) बाहुरिव काशिकाया समाह्वयन्निव धार्मिकान् सलक्ष्यते।

एवविधानामसख्यानामाश्चर्यभूम्ना प्रसवभूरिय वाराणसी केन वा साकल्येन वर्णयितु शक्येत। सर्वाङ्गीणविशेषविभूषिताया अस्या प्रत्यङ्गमनेके विशेषा सविशेष लक्ष्यन्ते, तेषा सर्वेषा वर्णन वाक्पथातीतमेव। असाध्यमेव मादृशामल्पमेधसाम्। केवलमत्यन्त सक्षेपेण सामान्याकारेण सङ्कलितमिद वाराणसीवैभवमविशेषविदा यदि किञ्चिदुपकुर्यात्तर्हि सफलो मे परिश्रम इति॥

[म० म० साहित्याचार्यश्रीनारायणशास्त्रिखिस्तेमहोदयस्य
(१९३० तमे खिस्ताब्दे लिखितोऽय निबन्ध)

---

१ सौध प्रासाद.।

(३२)

भगवतो बुद्धस्य चरितमुपदेशश्च

(१)

अद्यत्वे प्रचरत्सु धार्मिकसमयेषु श्रीशाक्यसिंहप्रवर्तितस्य सद्धर्म-
चक्रस्य कालमहिम्ना मन्दीभूतवेगतयापचीयमानप्रभावस्यापि बहु-
मतत्वाद्वा सिद्धान्तवैशिष्ट्याद्वा सर्वोत्तर गौरवमवलोक्यते। तस्या-
स्यैव परमप्रसिद्धधर्मस्य प्रवर्तकस्य महापुरुषस्य चरितमुपदेश चोद्दि-
श्य किञ्चिदत्र सक्षेपेण निगद्यते।

धर्मस्यास्य प्रवर्त्तको गौतमाख्य कश्चित् क्षत्रियकुमार
आसीत्। स राजकुल उत्पद्य ससाराद् विरज्यमान उग्र तपश्चरन्
सम्यकसम्बोधिमधिगतवान्। मनुष्योऽपि स तप प्रभावेण प्राप्तदेव-
भाव उत महान् देव एव जगदुद्धारसकल्पेन विहितावतारो मानुषी
तनुमाश्रित इति विप्रतिपन्नम्।

एव श्रूयते किल सुमेधा नाम कश्चिद् ब्राह्मणो वेदपारगो दीप-
ङ्करबुद्धकाले वर्त्तमान आसीत्। ससारे चिर ससरन् दु खान्त
मन्वेषमाण स दानादिकमनुतिष्ठन् शीलनैष्क्रम्यप्रज्ञादीन् पूरया-
मास। सर्वाः पारमिता साक्षात्कृत्य पूर्णत्वमासादितवान्।
मरणोत्तर स तुषिताख्ये देवावासे देवराड्रूपेण दिव्यदेहमास्था-
याविरभूत्। तत्र दीर्घकाल स्वीयपुण्यसचारसमुचिता महीयसीं
सम्पद भुञ्जानो देवै सम्प्रार्थित सन्नात्मन सम्बोधिकाल

समागत इत्युपलभ्य स्वेच्छया स्वावतरणयोग्य कालदेशादिक निर्णीय भारते वर्षे कपिलवस्तुनगरे शाक्यवशे राज्ञ शुद्धोदनस्य महिष्या मायादेव्या. कुक्षावागत्य तस्यै श्वेतहस्तिरूपेण स्वत्मान स्वप्ने प्रदर्शयन् यथाकाल वैशाखमासस्य पूर्णिमातिथौ लुम्बिनीवने शालतरुमूले भूमिष्ठो बभूव। यस्मिन् देशे यस्मिन् काले च धर्मस्य ग्लानिर्भवति तत्र तदैव जगत्सरक्षिणी महती शक्तिराविर्भूय विप्लुत धर्म पुन सस्थापयति। तथा च तुषितस्वर्गे तदधिपति-रूपमाश्रित्य यो देवराट् शुद्धभोगान् नित्यमुपभुञ्जानो विराजते स एव साक्षाद्वा, निर्माणकाय निर्माय तदधिष्ठानेन वा, कामलोके कामहतसत्त्वानामचक्षुष्काणा मार्गप्रदर्शनार्थमात्मान प्रकटयति। नात्र किमपि चित्रम्।

आबाल्य लालितो भोगसुखेन विलासोपकरणैश्च परिवृतोऽपि स क्षत्रियोचितशस्त्रादिचर्चाया विविधविद्यासु चतुःषष्टिकलासु च पर नैपुण्यमलभत। षोडशवर्षदेशीय एव स दारपरिग्रह विदध इति स्मर्यते। तस्य लोकोत्तरा वैचित्र्यशालिनी शक्ति सर्वत्र शैशवादेव प्रकटिताभूत्। कदाचित् प्रवृत्ते मधुमासवैभवे स उद्यानविहारार्थमवरोधेन साकमुपवनमगच्छत्। तदैव तस्य प्रबोधकाल समागत इति देवास्तस्य पूर्वस्मृतिमुत्पादयितु बोधि-लाभार्थं महाभिनिष्क्रमणे मति जनयितुञ्च जरारोगमृत्युभिराक्रा-न्तान् पुरुषान् तस्मै दर्शयामासु। तद्दर्शनेन सारथ्युपवर्णित सत्त्व-मात्रस्य जरादिविकारावश्यभावपीडनमाकर्ण्य च भृश तस्य मन विषण्णमभवत्। तत एव सोऽकृतोद्यानविहारो निर्विण्णहृदयो

व्यरमत्। अनन्तर देवानुभावेन पथि शान्तचेतास्तप्तकाञ्चन-सन्निभ॰ समुद्भासितप्रसन्नवक्त्रमण्डल प्रज्ञाया करुणायाश्च लोकोत्तरो विग्रह इव कश्चित्तापसस्तस्य दृष्टिगोचरमायात। दृष्ट्वा च त तथाविध ज्ञात्वा च त निस्तीर्णभवसागर लङ्घितजरादि-विकारजात तादृशमेव स्वात्मानमपि विधातुकाम प्रव्रज्यायै मन-श्चक्रे। वीतस्पृह कुमारमवलोक्य पितुर्मनसि प्रकृत्यैव महती चिन्ता पदमकृत। पुत्रस्य भोगाकाङ्क्षासजननार्थं निखिलोऽपि पितुर्यत्नो निष्फलो बभूव। वह्निप्रदीप्ते गृहे स्थितिर्यथा दु शका तथैव सविग्नमनसो गौतमस्य ससारावस्थानमपि प्रत्यभात्। निर्वेदे क्रमेण घनीभूते दृढीभूते च गृहत्यागसकल्पे कदाचित् स निशीथे, सुप्तेषु पौरजानपदेषु, नि शब्दे च राजकुले, महाभिनि-ष्क्रमणाय प्रतस्थे। सद्योजातस्तनय, सुरूपा गुणवती भार्या, स्नेहानुबन्धी जनक, प्रभूतमैश्वर्य, नव वय, कान्त वपु—किमपि तस्येप्सिताभिमुख मन प्रतीपयितु तर्पयितु च नाशकत्।

राजोचित वस्त्रभूषणादिक परित्यज्य केशवपन विधाय धृत-श्रमणवेशो भिक्षा चरन् देशाद् देशान्तर पर्यटन्नासीत्। अन्तरा-न्तरा मारस्य प्रलोभनमप्यजायत। परन्तु तस्य वज्रसारे चेतसि कथमपि लेशोऽपि विकारस्य नादृश्यत। यस्य शमस्य सम्पत्तये स ससारस्य स्नेहपाश छित्त्वा, अभुक्तामपि सुविशाला राज्य-श्रिय परित्यज्य, प्रव्रज्यामाश्रित, न तु स केवल प्रव्रज्यया समधिगन्तु शक्यते, अपि तु योगादिसाधन विविध दुश्चर तपोऽपि च तत्रापेक्ष्यते इति विजानानो योगोपदेष्टुर्मार्गोपदर्शन-

समर्थस्य कस्यापि देशिकस्यान्वेषणामकरोत्। तथा कुर्वंश्च कालाय-सगोत्रस्याऽऽराडाख्ययोगिन प्रसिद्धि योगसमृद्धि चावगत्य तत्र गत्वा तदाश्रमे कियत्कालमवसन्। तदनुज्ञया च तत्र ध्यानादि-विहारेषु तत्प्रदर्शितदिशा चिर चित्त दधे। गुरो सामर्थ्येन स्वस्य च महनीयेन सरम्भेण चत्वारि रूपध्यानान्युपलभ्य ततो निवृत्तोऽरूपभूमौ तृतीयायामाकिञ्चन्याख्याया यथावत् प्रकर्षम-गच्छत्। एतादृशध्याने निष्णात क्षेत्रज्ञो देह विसृज्य विमुच्यत इति श्रुत्वापि तत्र तस्य हार्दिको रागो नाजायत। तस्मादपि ध्यानात् चित्त व्युत्तिष्ठतीति सदृश्य तदपि चित्तस्य प्रशमनाय नालमिति मत्वा च तदुत्तरभूमेर्जयार्थं गुर्वन्तर रामपुत्र रुद्र काह्वयमगच्छत्। तत्रापि तदनुग्रहेण "नैवसञ्ज्ञानासञ्ज्ञि" भूमि-पर्यन्तमेव तस्य साक्षात्कारो जात। जातेऽपि तादृशे साक्षा-त्कारे पूर्ववत् चित्तस्यैकान्तिकी निवृत्तिमपश्यन् तदाश्रय विहाय उरुबिल्वाया गत्वा निरञ्जनातीरे शुचौ प्रदेशे कस्यचिदश्वत्थवृक्षस्य मूले पूर्णबोधिलाभार्थं नानाप्रकारैरुपवासादिकृच्छ्रविधिभिरात्मन कार्श्य सम्पादयन् विहितासनबन्धो दुष्कराणि तपासि समारेभे। षड् वर्षाणि मारेण युद्ध्यन् पारमिताविश्वासबलेन त पराभूय परमा सिद्धिमवाप।

तथा हि ध्यानरतस्य तस्य रात्रे. प्रथमे यामे प्राक्तनीना जातीना तदुद्भवसस्काराणा चानुभवपर्यन्तमनुस्मरणमजायत। सञ्जातप्राक्स्मृति स आत्मन. पूर्वावस्थापरम्परामस्मरत्, भूता-मपि ता सनिकृष्टामिव साक्षादकरोच्च। आदिसर्गमारभ्य

लिङ्गमेकमेव वासनाभेदैरधिवासितं भोगार्थं कं क नाम देह नाश्रितवत् ? अनियताकारमपि तत् प्रारब्धकर्मणामुपभोगार्थमुपादीयमानदेहानुरोधेन क कमाकार नासादितवत् ? सस्कार साक्षात्करणेन पूर्वस्मृतीनामुदये तस्यानुभूतपूर्वभोगाना तत्सपृक्तविषयभुवनव्यवहारादीना च सर्वेषामपि समुल्लेख स्फुट मेव हृद्युपाजायत। सनिहितमृत्योर्जनस्यातिक्रम्यमाणजीवनस्येव सजातबोधाभासस्य सुस्मूर्षोस्तस्य निखिलानामेव जन्मना स्मरणमभूत्। आसन्नचेतनस्य निमेषायुष कीटस्य दशामिव कल्पान्तस्थायिना देवानामपि दशामजानात्। तथा जानन जगति दु खानामेवोत्कर्षमपश्यत्। आनन्दभूयिष्ठेऽपि जन्मनि दु खसत्तामवेत्।

अथ द्वितीये यामे दिव्य चक्षुरुदपद्यत येन निखिललोकस्य दर्पणप्रतिबिम्बितनगरस्येव स्फुट दर्शनमभूत्। षाट्कौशिकादिदेहेन तादात्म्यबुद्धया वस्तुतस्तद्विविक्तोऽपि व्यवहारण तदवच्छिन्नरूपस्तदाश्रितेन्द्रियग्रामैर्विषयेषु प्रचरन् जीवो निबिडमोहपाशबद्ध समन्ताद् दृष्टिं प्रसारयितु न शक्नोति। महाविदेहा धारणा शीलयतो मनस कर्मनिमित्ता देहप्रतिष्ठा शिथिलीकृत्य तस्य विशुद्धि स्वेच्छया बहि सचार च सम्पादयत समुद्भूतप्रज्ञाबलस्य गुरुकटाक्षक्षपितमलस्य किमिव न दृष्टिपथमृच्छति ? व्योम्नि नक्षत्रपङ्क्तिरिव, अलाबुलताया तत्फलानीव, सावित्र रश्मौ त्रसरेणव इव, अनादिनिधनाया भगवच्छक्तौ प्रकृत्यावरणे कोटिशो ब्रह्माण्डानि, प्रतिब्रह्माण्ड च कोटिशो लोका प्रतिभा-

सन्ते। ते सर्वे एव भोगाधिकरणरूपा उच्चावचभोगसाधनै-र्विषयै पूर्णाः। भोगाश्च सुखप्राया अपि नैकान्तेन दु खाविनाकृता इति दु खरूपा एव। एव भोगस्य देशविस्तार पश्यन्, कालविस्तार भोक्तृभेदेन भेदमप्यपश्यत्। जाते च तथाविधे दर्शने सत्त्वाना जन्ममृत्युदर्शनात् प्रागुद्भूत कारुण्य भूयोऽपि वर्धितमभूत्।

तृतीये यामे च तस्य चेतसि प्रतीत्यसमुत्पादस्य निगूढ रहस्य-मुन्मिषितमभूत्।

एव स बोधिद्रुममूले जगता दु खस्कन्धस्य मूलभूतामविद्या भित्त्वा सर्वा प्रतिसविद सम्प्राप्य बोधिपाक्षिकान् धर्मानुपलभ्य च क्षीणास्रव सर्वज्ञत्व बुद्धत्व चाधिगतवान्।

बहुविधा लोकोत्तरा सिद्धयस्तेन लब्धा—षडभिज्ञा, दशबलानि, तपस्याया फलभूत सर्वमेव तस्य करायत्तमभूत्। परन्तु ऋद्धिजातैर्दु खानामात्यन्तिक उच्छेदो न सभाव्यते, इति जातास्वपि योगविभूतिषु तस्य मनस्तत्र लग्न नाभूत्। येन दु खमेकान्तेन न निवर्तेत, कि तेन स कुर्यात्। धावन्त पुरुष स्वदेहच्छायावत् तप समाधिसम्पन्न विद्वास सर्वा समृद्धयोऽनुगच्छन्ति। सर्वसत्त्वाना सर्वविधदु खापगमे य. कृतोत्साहो भोगसुखानि तस्य स्थिरनिश्चय मन कथ चालयितु प्रभवेयु।

(२)

बोधिसम्पत्तेरनन्तर स्वात्मान कृतार्थं मन्यमान, तत्त्वस्य गहनत्वं

दुर्विगाहत्व च विचार्य स्वकीयमुपदेष्टृद्वयमेव स्वोपलब्धविद्याविभव-समर्पणस्य पात्रभूतममन्यत। परन्तूभयोरेव तयोस्तदानी कालवशगतत्वात् स वाराणसीमेव सद्धर्मप्रचारणाय समागच्छत्। सद्विद्याना क्षेत्रभूत, धर्मप्रस्थानाना विलासनिकेतन, तपस्विना विदुषा योगिना च सिद्धपीठरूप, भूमिष्ठमपि भूमिमस्पृशज्ज्योतिर्मयम-विमुक्तनगर सम्यकसम्बुद्धस्य धर्मचक्रप्रवर्त्तनस्थानमभूत्।

तत्रैव तेन चत्वार्यार्यसत्यानि दिष्टानि। दु खमस्तीति प्रथ-मार्यसत्यम्, तस्य हेतुरस्तीति द्वितीयम्, दु खनिरोधो निर्वा-णाख्य सभवतीति तृतीयम्, तदुपायभूतोऽष्टाङ्गयोगोऽप्यस्तीति तुरीयम्।

तत्र प्रथमार्यसत्यस्य विषये न कापि विचिकित्सा सम्भव-त्येव। विचित्रकर्मवशेन भोगवैचित्र्यजुषा तत्तद्भोगौपयिकसघात-वता तत्तद्भुवनवासिना जीवाना ससरणभूमिरिय दु खेन कवली-कृतेति न कस्यापि चक्षुष्मतोऽविदितचरम्। बुभुक्षूणामिन्द्रिय-लोलानामनवस्थिते चेतसि ससरस्यासारता क्षणभङ्गुरता हेयता वा नोदीयमानापि मुमुक्षोर्वैराग्यवत परमार्थमभीप्सतो बाह्यार्थैर-मितैश्वर्यमयैरतृप्यतो हृदये नितरा जागर्त्ति। स चोदयोऽचिर-स्थोपि भावान्तरैर्न पराभूयते, क्षणप्रभेव मेघाच्छन्ननभोलीनैर्दर्श-निशीथतमोभि। नानाविधसुखदु खरूकुल ससारोऽयं सूक्ष्मेक्षि-कया दृश्यमान परिणामतापसस्कारदु खैरन्वितत्वाद् विवेकिभि-र्दु खमयत्वेनैव विभाव्यते। विवेकपराङ्मुखो भोगलोलुपचित्तस्तु

विषयेभ्योऽनुपरममाणो दु खानुषक्तसुखेष्वपि कामबुद्धया प्रवर्त्तमानो दु खनिवृत्तिमविन्दन् दीर्घससारकान्तारेष्वनिश भ्रमन् योनेर्योन्यन्तर पर्यटति, दु खमेव च निरन्तर लभते ।

अस्य पुनर्जगद्व्यापिदु.खस्कन्धस्य मूलमविद्या । तत एव सस्कारादिक्रमेण दु खसमुदयो भवति । तद् यथा—सर्व दु ख जातिनिबन्धनम् । जातिश्च देहोपलम्भ । तस्या सत्या जरा वा रोगो वा मरण वा सर्वमेव दु खकारण सम्भवति । तन्निरोधे च दु खोत्पादस्य मूलमेव च्छिद्यते । मरणेन देहनिवृत्त्या दु खविगमो न सम्भवति, देहारम्भकसस्कारादिसत्त्वात् पुनरपि तस्य परिग्रहो भवत्येव । देवदेहो वा भवतु, तिर्यग्देहो वा, सर्वत्रैव पुनर्दु खानुबन्ध सलक्ष्यते । जन्मन कारण भव , स खलु उपादानात्सञ्जायते । यद् बाह्य वस्तु उप समीपे आदत्ते तदुपादानम् । उपादानस्यासम्भवे भवोदयासम्भवात् जातिरपि न सम्भवति । उपादानस्य निमित्तभूता तृष्णा, यावत्सा न शाम्यति तावत् सतोषाभावाद् बाह्यपरिग्रहाकाङ्क्षा तिष्ठत्येव । तृष्णाया कारण वेदनाख्या विषयानुभूति., वेदनायाश्च कारणमिन्द्रियार्थसन्निकर्षः स्पर्श । स्पर्श षडायतनादुत्पद्यते । षडायतनं नाम ज्ञानेद्रियपञ्चक मनश्चेति षड्वर्ग । षडायतन नामरूपाभ्या समुत्पद्यते । तत्र नाम सज्ञासस्कारविज्ञानाना सघात । नामरूपे एकीभूय पञ्चस्कन्ध घटयत । नामरूपयोर्निमित्त विज्ञानम् । विज्ञानस्य हेतु सस्काराः । सस्काराश्च सर्व एव अविद्यामूलका । अविद्याया. पुनर्मूल न किमपि दृश्यते । सैव सर्वानर्थनिदानमिति

तस्या उन्मूलनमेव पुरुषार्थस्वरूपम्। तच्चाष्टाङ्गयोगमार्गपरिशीलनलब्धप्रज्ञया साध्यते। **एतानि द्वादश निदानानि सौगतानां ग्रन्थेषूपलभ्यन्ते। समुच्चयेन प्रतीत्यसमुत्पादोऽयमेव।**

तदिदमनिशमावर्त्तमान दु खचक्र कदापि निवृत्त भवितुमर्हति नवेति शङ्कायां सम्भवत्येव तन्निरोध इति तत्प्रशमस्वरूपाविष्करणरूप तृतीय सत्यम्। अयमेव दु खनिरोध प्रथानभेदेन मोक्षनिर्वाणापवर्गामृतनि श्रेयसादिपदैर्व्यपदिश्यते। यदिदं जगदाडम्बर परिदृश्यते, तच्चाविद्याया एव विजृम्भितमिति प्रागेवोक्तम्। अविद्यानिरोधेन दु खपर्यन्तस्य तत्कार्यचक्रस्यापि निरोधे सति जगदभावे यदवशिष्यते तदमृत निर्वाणमिति कथ्यते। तदेव च शून्यपदभाक्। नहि निर्वाण वस्तुतोऽभावरूपमिति विज्ञेयम्। न वा व्यावहारिकभाववदपि, तादृशभावाना प्रज्ञोदयेऽसत्त्वात्। निर्वाणम् "असस्कृत" धातुत्वात् शाश्वत शिव द्वन्द्वातीत प्रपञ्चोपशमरूप परम सुखम्।

- निर्वाणममृतपदम्। तदस्ति, तत्प्राप्त्युपायश्चाप्यस्ति। क स उपाय ? अष्टाङ्गयोग इति बुद्धदर्शनम्। वस्तुतस्तु ज्ञानेनैवाविद्यानिवृत्तिर्भवति। तस्या निवृत्ताया क्रमेण सस्कारादिनिवृत्त्या दु ख निवर्त्तते। ज्ञानसम्पत्तये चाष्टाङ्गयोगमार्ग एव शरणम्। **योगाङ्गानि** तावत्—सम्यग्दृष्टि, सम्यक्सङ्कल्प, सम्यग्वाक्, सम्यगाचार, सम्यगाजीव, सम्यग्वीर्यम्, सम्यक्स्मृतिः, सम्यक्समाधिश्च।

बहूना जन्मनामन्ते कस्यचिदेव भाग्यवत. समाधिमनुशीलयतो मनसि प्रज्ञाया समुदयो भवति। उदिताया तस्या बन्धनकारका दशविधाः पाशा सयोजनाभिधा. त्तीयन्ते।

मार्गस्यास्य चतस्र एव भूमय.।

प्रथमा तावत्—स्रोतआपत्तिभूमि', तामधिगतस्यार्यस्य सत्कायदृष्टिविचिकित्साशीलव्रतपरामर्शरूप सयोजनत्रय विनश्यति। स पृथिव्या वा, कस्मिन्नपि देवावासे वा, कर्मानुगुणफलभोगार्थं जायते। परन्तु मार्गाश्रयादपुनरावृत्तिस्तस्य नियतैव। सप्तसु जन्मसु तन्न्यूनेषु वा निर्वाणमवश्य भावि।

द्वितीया भूमि. सकृदागामिपदव्यपदेश्या, तामारूढस्य देवलोक उपपद्य पृथिव्या सकृदेव जन्म भवतीति केषाञ्चिन्मतम्। देवलोके जन्मेत्यपरेषा मतम्। तदेव तस्य चरम जन्म। तदेव प्रज्ञोत्कर्षान्निर्वाणमधिगम्यते। अस्या भूमौ 'कामराग' 'प्रतिघ'-श्चेतिसयोजनद्वय निवर्त्तते।

अनागाम्याख्या भूमिस्तृतीया। तस्या कामरागाभावात् पृथिव्यादौ वा तदन्यस्मिन् कामस्वर्गादौ कामलोके वा पुनरावृत्तिर्न सम्भवति। अनागामी ब्रह्मलोके सकृदेवाविर्भवति। तत्रैव च प्रज्ञाशुद्धि लब्ध्वा विमुच्यते। स कस्मिन् ब्रह्मलोके जायत इति रागोच्छेदतारतम्यमपेक्ष्य समाधेयम्। यस्य रूपरागो विद्यते स रूपब्रह्मलोके, तदितरस्तु अरूपब्रह्मलोके स्वात्मानमाविर्भावयति। अरूपरागच्छेदेऽरूपब्रह्म-

लोके नोद्भव सम्भवी। मानौद्धत्याविद्याख्यसयोजनत्रयस्य निवृत्तेर्बन्धनकारणत्रयस्य रहितत्वात् निर्वाण भवति। तच्च सत्यपि देहे सजायते। तदेव चार्हत्त्व जीवन्मुक्त्याख्यम्। देहपातानन्तर परम निर्वाणमवशिष्यते, तच्च परमार्थ।

तदाप्रभृति जनपदेषु सर्वत्र परिभ्रमन् स सद्धर्म प्रचारयामास। केचिद् गृहे निवसन्त उपासका बभूवु। केचिच्च गृह त्यक्त्वा भिक्षव.। पुरुषवत् स्त्रियोऽपि तस्य शिष्यमण्डले प्राविशन्। क्रमेण विहारसङ्घारामादि स्थाने स्थाने निर्मितमभूत्। सङ्घस्य परिचालनोपयोगिनो नियमा निबद्धा जाता। ब्राह्मणा राजान श्रेष्ठिनो वेश्या अपि त्रिरत्न—बुद्ध धर्म सङ्घ च—शरणमुपागच्छन्।*

तदुपदेशमाहात्म्येन बहवोऽर्हद्भाव गता, बहवश्च स्रोतआपत्त्यादिभूमिषु प्रविष्टा। केचित्तु मौद्गलायनवद् ऋद्धिमन्तोऽपि सवृत्ता। बहवस्तस्य विरोधिनोऽपि विरोध परिहाय तस्य सेवकत्व गृहीतवन्त। नात्राविश्वासार्ह किमपि लक्ष्यते। महीयसा महता प्रभावेण सर्वमेव सभाव्यते। †

---

*त्रिशरण खलु बुद्धस्य तत्प्रवर्तितधर्मस्य तद्धर्मावलम्बिसघस्य च दैनिकी स्तुति—'बुद्ध शरण गच्छामी'त्यादिरूपा।

† स्थूलदृष्ट्या बौद्धो धर्म शीलानुष्ठानपर इति शीलमधिकृत्य किञ्चिदुच्यते। भिक्षुभिर्गृहस्थैश्च पञ्चशीलमनुष्ठेयम्। तत्तु प्राणिहिसाऽदत्तादानव्यभिचारमृषावादमद्यपानविरतिरूपम्। अष्टशील तु प्रागुक्त शीलपञ्चक तेन सयोजित नियमत्रय च। नियमत्रयं नाम विकालभोज-

इत्थं चत्वारिंशदधिकवर्षकालं धर्ममुपदिशन् जीवानुद्धरन् स कृतकृत्यः पश्चिमे वयसि कुशीनगराख्ये स्थाने देहं मुमोच ॥

[वाराणसेयराजकीयसंस्कृतविद्यालयभूतपूर्वाध्यक्ष-
महामहोपाध्याय श्रीगोपीनाथकविराजमहोदयस्य

---

(३३)

वेदानां संस्कृतपठनपाठनप्रणाल्यां स्थानम्

वेदानां महत्त्वम् ।

कस्याविदितं सचेतसो यदस्माकं भारतीयानामार्याणां वाङ्मये निरतिशयेन सर्वोत्कृष्टं हि स्थानं वेदानाम् । न केवलं विभिन्नरूपेण प्रचरत आर्यधर्मस्य मूलस्रोतस्त्वेन उपजीव्यत्वेनैव च तेषामुत्कृष्टत्वम्, किन्तु अन्यान्यदृष्ट्यापि ।

नविरतिः, माल्यधारणगन्धद्रव्योपयोगविरतिः, उच्चमहाशयनाभ्यां विरतिश्च । अष्टशीले व्यभिचारविरतिस्थलेऽब्रह्मचर्य्यविरतिर्बोध्या । अष्टशीलेन सह नियमद्वययोजनेन दशशीलं भवति । नृत्यगीतादिविरतिः स्वर्णरजतप्रतिग्रहविरतिश्चेति नियमद्वयम् । दशशीलं भिक्षून् पञ्चशीलं च गृहस्थानुद्दिश्य प्रवृत्तम् । शीलाचरणेन शमो लभ्यते, तदनाचरणेनात्मनो मूलमपि नश्यति । गृहस्थैर्भिक्षुभिश्चानुष्ठेयेषु बहुविधेषु धर्मेषु बुद्धेनोपदिष्टेषु शीलोपदेश एव सर्वसामान्येन प्रधानः ।

भारतीयसंस्कृतेर्भारतीयानां भाषाणाम्-आर्यभाषाणां तदितर-भाषाणाम्-च तात्त्विकदृष्ट्या अध्ययनाय अनुशीलनाय च वेदानां वैदिकभाषायाश्चानुशीलनं नितरामावश्यकम्। अन्यदेशीयभाषा-संस्कृत्याद्यनुशीलनापेक्षयापि तेषामतीवोपयोगित्वमिति तु नात्र प्रकृतमिति न तद्विषये किञ्चित्प्रस्तूयते।

अत एवास्माकं धार्मिकग्रन्थेषु तत्र तत्र शतशः प्रकारैर्वेदानां महत्त्वमुद्घोष्यते।

तथा च भगवान् मनुः—

वेदोऽखिलो धर्ममूलम् ॥२।६॥
सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे ॥१।२१॥
यः कश्चित्कस्यचिद् धर्मो मनुना परिकीर्तितः।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥२।७॥
पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्।
अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः ॥१२।९४॥
चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्।
भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिध्यति ॥१२।९७॥ इति।

प्राचीनकाले वेदानां पठनपाठनप्रणाल्यां स्थानम्

तदेवं सर्वतोमुखीं वेदानामत्युपयोगितामाकलय्यैव अस्माकं साक्षात्कृतधर्मभिराचार्यैः प्राचीनकाले पठनपाठनप्रणाल्यां मुख्यत्वेन स्थानं वेदानां निर्धार्यते स्म। तथा च—

तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितै ।
वेद कृत्स्नोऽधिगन्तव्य सरहस्यो द्विजन्मना ॥२।१६५॥
वेदमेव सदाभ्यस्येत्तपस्तप्स्यन् द्विजोत्तम. ।
वेदाभ्यासो हि विप्रस्य तप परमिहोच्यते ॥२।१६६॥
योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥२।१६८॥
शूद्रेण हि समस्तावद् यावद्वेदे न जायते ॥२।१७२॥
षट्त्रिंशदाब्दिक चर्यं गुरौ त्रैवेदिक व्रतम् ।
तदर्धिक पादिक वा ग्रहणान्तिकमेव वा ॥३।१॥
वेदानधीत्य वेदौ वा वेद वापि यथाक्रमम् ।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत् ॥३।२॥

इत्यादिमानवधर्मशास्त्रोक्तैरन्यैश्चैवप्रकारै शतश प्रमाणैर्न केवल द्विजैस्तेषामध्ययनमेवातीवावश्यकत्वेन प्रतिपाद्यते, किन्तु वेदाध्ययनस्यैव प्राधान्येन द्विजत्वस पादकत्वमप्याख्यायते ।

कस्यैतदविदित यत्, वेदानामखिलपुरुषार्थसाधनतया, प्राय सर्वेषा शास्त्राणामध्ययनाध्यापनस्य वेदाभ्यासो वेदानुशीलन वेदरक्षा चैव परमप्रयोजनमिति विभिन्नशास्त्रेष्वेवासकृद् गीयते सप्रयत्न स्थाप्यते च ।

उदाहरणार्थम्, पातञ्जलमहाभाष्य एव शब्दानुशासनस्य प्रयोजननिर्देशप्रसङ्गे प्रायो वेदनिबन्धनेनैव "रक्षोहागमलघ्वसन्देहा· प्रयोजनम्" इति, "तेऽसुरा । दुष्ट. शब्द । यदधीतम् । यस्तु प्रयुङ्क्ते ।

अविद्वास । विभक्ति कुर्वन्ति । यो वा इमाम् । चत्वारि । उत त्व । सक्तुमिव । सारस्वतीम् । दशम्या पुत्रस्य । सुदेवो असि वरुण" । इति च प्रयोजनानि प्रतिपादितानि ।

निरुक्तेऽपि, "अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते । अर्थमप्रतियतो नात्यन्त स्वरसस्कारोद्देश ।", "अथापीदमन्तरेण पदविभागो न विद्यते ।", "अथापि याज्ञे दैवतेन बहव. प्रदेशा भवन्ति तदेतेनोपेक्षितव्यम् ।", "अथ ज्ञानप्रशसा भवत्यज्ञाननिन्दा च ।" इत्युपक्रमैर्वेदाध्ययनमुद्दिश्यैव तत्प्रयोजनान्यभिहितानि ।

किं बहुना, अतिगम्भीरस्य वेदस्य साक्षात्परम्परया वा अध्ययनोपकारायैव प्रायेण विभिन्नशास्त्राणि प्रवृत्तानि ।

तथा चोक्त यास्काचार्येण निरुक्ते—

"साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्सप्रादु । उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेम ग्रन्थ समाम्नासिषुर्वेद च वेदाङ्गानि च ।" इति ।

व्याकरणादीनाम् 'अङ्गत्वेन' मीमासादिशास्त्राणा च 'उपाङ्गत्वेन' सर्वविदित वर्णनमपि वेदानामपेक्षयैव । अत एव पाणिनीयशिक्षायामुच्यते—

छन्द पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयन चक्षुर्निरुक्त श्रोत्रमुच्यते ॥

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥४१।४२॥

मीमांसादिशास्त्राणामपि वेदार्थज्ञानार्थमुपयोगस्तत्र तत्र स्मर्यते। तथा हि—

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ॥

इत्यादीनि बहूनि प्रमाणानि अत्र विषये ।

वेदाङ्गत्वेन वेदोपाङ्गत्वेन च प्रसिद्धशास्त्राणि विहायापि, अक्षुण्णतया वेदसम्प्रदायपरिरक्षणाय समस्तपृथिव्यामन्यधर्मावलम्बिनामश्रुतचरा ये नानाविधा उपाया अस्माकमाचार्यैराविष्कृताः प्रचारिताश्च न केषान्ते विस्मयावहा । पदक्रमजटाद्यष्टविकृतीनां परिकल्पना पदगाढ-बैठ-प्रातिशाख्यादीनां पादादिविषयकविविधानुक्रमणीनां च निर्माणं सर्वमेतद्वेदानां रक्षणार्थमेव। अत एव परःसहस्रेषु वर्षेष्वतीतेष्वपि वैदिकसंहितानां पदशः स्वरशोऽक्षरशश्च सम्प्रदायाविच्छेदो न कानाश्चर्यचकितान्विदधाति ।

असन्तुष्टा इवानेन महतापि प्रयत्नेन त एवाचार्या ब्राह्मणसमाजस्य द्विवेदत्रिवेदचतुर्वेदादिविभागमपि सुतरां वेदानां परिरक्षणार्थमेव चक्रुरिति प्रतीयते ।

तदेतत्सर्वं प्राचीनकाले पठनपाठनप्रणाल्या वेदानामत्युत्कृष्टमनन्यसाधारणं च स्थानं द्योतयति ।

आधुनिकी अवस्था

परं का दशामनुप्रपन्ना वयमद्यत्वेऽस्मिन्विषये । वेदानामध्ययनाध्यापनं विलुप्तप्रायमेवास्माकं दौर्भाग्येण । केचिदेव विरला अङ्गुलिनिर्देश्या सर्वभावेन वेदाध्ययनपरायणा दृष्टिपथं प्रयान्ति । न चेयमाधुनिकी एव प्रवृत्तिः । चिरकालादेवैतादृग्दुर्दशाग्रस्ता वयम् । वैदिकत्वेन प्रसिद्धान् काँश्चिद् ब्राह्मणान् वर्जयित्वा, केवलं नाममात्रेणैव प्रायेण वैदिकत्वमितरेषामिति प्रतीयते । प्राचीनग्रन्थानुसन्धाननिरतस्य कस्याविदितं यन्नानाशास्त्रज्ञानां पण्डितानां गृहेष्वपि अन्यान्यविषयकप्राचीनहस्तलिखितग्रन्थेषूपलभ्यमानेष्वपि वैदिकग्रन्थानां, विशेषतश्च वैदिकसंहितादिग्रन्थानां, प्रायोऽभाव एव दृश्यते । सर्वमेतद्वेदविषये तेषामनास्थामेव वस्तुतो द्योतयति ।

वैदिकत्वेन प्रसिद्धानां मध्येऽपि केचिदेव प्रविरला एतादृशो ये—

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ।।

यद् गृहीतमविज्ञातं निगदेनैव शब्द्यते ।।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ।।

(निरुक्ते १।१८)

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्व विसस्रे जायेव पत्य उशती सुवासा ॥
(ऋ० १०।७१।४)

इत्यादिश्रुती स्मरन्तोऽनुसरन्तश्च अर्थदृष्ट्यापि वेदानामभ्यासमनुतिष्ठन्ति ।

विद्यमानाप्येषा चिरकालादेव वेदविषयेऽस्माकमुदासीनता साम्प्रतमतिमात्र वृद्धि गता । अत एव प्रविरलसस्कृतप्रचाराणा सामान्यप्रदेशाना तु का कथा, विद्याया केन्द्रीभूतस्थानेष्वपि, सत्स्वपि तत्रान्यान्यशास्त्रीयविषयविशेषज्ञेषु, वस्तुतो वैदिकाना विदुषा प्रायोऽभाव एव दृश्यते । येऽपि विभिन्नविषयेषु पारोवर्यविदो विद्वासस्तेऽपि वेदविषयेऽनभिज्ञा एव प्रायश । वेदानामध्ययनेन न तेषा किञ्चित्प्रयोजनमितीव तेषा प्रतीति । महाभाष्यानुसार वेदरक्षार्थ प्रवृत्तस्य अन्यान्यसस्कृतव्याकरणापेक्षया विशेषतो वैदिकप्रक्रियाप्रतिपादकस्य पाणिनीयव्याकरणस्य कर्णधारेषु वा, वेदाना प्रामाण्याप्रामाण्य पुरस्कृत्य साग्रह विवदमानेषु नैयायिकपञ्चाननेषु वा, वेदप्रतिपाद्यधर्मस्वरूपविचारचातुरीधुरीणेषु मीमासाप्रवीणेषु वा, धर्म्याधर्म्यव्यवस्थापकेषु धर्मधुरन्धरेषु पदवाक्यप्रमाणपारावारीणेषु वा, "अस्य महतो भूतस्य, नि श्वसितमेतद् यदृग्वेद" इत्याद्यर्थपरक 'वेद + अन्त'मधीयानेषु वेदान्तिधौरेयेषु वा वस्तुतः "अनेकविद्यास्थानोपबृहितस्य प्रदीपवत् सर्वार्थावद्योतिन सर्वज्ञकल्पस्य महत ऋग्वेदादे" अनुशीलनस्य प्रवृत्तेरभाव

एव प्रायो दृष्टिपथमापतति। एतस्या दुरवस्थाया एव एष परिणामो यद्वैदिकत्वाभिमानिनोऽपि वय केवल नाममात्रेणैव वेदानुयायिन सवृत्ता ।

अत एव—

विश्वदानी सुमनस. स्याम ।
पश्येम नु सूर्यमुच्चरन्तम् ।। ऋ० ६।५२।५।।

मा नो अग्नेऽवीरते परा दा
    दुर्वाससेऽमतये मा नो अस्यै ।
मा न' क्षुधे मा रक्षस ऋतावो
    मा नो दमे मा वन आ जुहूर्था ।। ऋ० ७।१।१६।।

अस्मे धेहि श्रवो बृहद् द्युम्नं सहस्रसातमम् ।
इन्द्र ता रथिनीरिष ।। ऋ० १।९।८।।

उदिह्युदिहि सूर्य वर्चसा माभ्युदिहि ।
याँश्च पश्यामि याँश्च न तेषु मा सुमतिं कृधि ।।
अथर्व० १७।१।७।।

पुमान् पुमासं परि पातु विश्वत ।। ऋ० ६।७५।१४ ।।

इन्द्र त्वोतास आ वयं वज्र घना ददीमहि ।
जयेम सं युधि स्पृधः ।। ऋ० १।८।३ ।।

वय शूरेभिरस्तृभिरिन्द्र त्वया युजा वयम् ।
सासह्याम पृतन्यतः ।। ऋ० १।८।४ ।।

अदीना. स्याम शरद. शत भूयश्च शरद शतात् ।।
यजु० ३६।२४ ।।

भद्रं जीवन्तो जरणामशीमहि ॥ ऋ० १०।३७।६ ॥

पश्येम शरदः शतम् ॥ जीवेम शरदः शतम् ॥

बुध्येम शरदः शतम् ॥ रोहेम शरदः शतम् ॥

पूषेम शरदः शतम् ॥ भवेम शरदः शतम् ॥

भूषेम शरदः शतम् ॥ भूयसीः शरदः शतात् ॥

अथर्व० १९।६७।१-८ ॥

यतो यतः समीहसे ततो नो अभयं कुरु ॥

यजु० ३६।२२ ॥

अश्मा भवतु नस्तनूः ॥ ऋ० ६।७५।१२ ॥

वीर्यमसि वीर्यं मयि धेहि ।

बलमसि बलं मयि धेहि । यजु० १९।९ ॥

मदेम शतहिमाः सुवीराः ॥ अथर्व० २०।६३।३ ॥

इत्यादीनामाशाभावभरितानां वीरतारसपरिप्लुतानामुदात्तविचाराणाम् "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः", "तद्वचनादाम्नायस्य प्रामाण्यम्" इत्यादिप्रमाणानुरूपमभ्युदयनिःश्रेयससाधनस्य वैदिकसदाचारस्य वैदिककर्मकाण्डस्य च सर्वथाऽभाव इव सर्वतो दृश्यते । अत एवास्माकं समाजस्य शिथिला शीर्णा च दशा, निःश्रीका निस्तेजस्काश्च वयं संवृत्ताः । प्राचीनाः सर्व एव समुन्नता आदर्शा विलुप्तप्राया स्मृतिगर्भे विलीनाः संजाताः ।

अस्माकं कर्तव्यम्

समुपस्थितायामेतादृश्यां परिणामदुरन्तायां वैदिकसाहित्य-

विषयकोपेक्षाया सर्वैरस्माभिर्वैदिकै समयानुसारेण यथा-सभव पुनरपि वैदिकसाहित्यानुशीलनस्य प्रवृत्तेरुज्जीवनाय उपायो अवलम्बनीया.। प्रयतनीय च तथा यथा तत्तद्विषयान-धीयाना अपि सस्कृतच्छात्रा —

वेदानधीत्य वेदौ वा वेद वापि यथाक्रमम्।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत्॥ मनु० ३।२॥
उपनीय तु य शिष्य वेदमध्यापयेद् द्विज।
सकल्प सरहस्य च तमाचार्य प्रचक्षते॥
एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुन।
योऽध्यापयति वृत्त्यर्थमुपाध्याय स उच्यते॥
मनु० २।१४०-१४१॥

"ब्राह्मणेन निष्कारणो धर्म षडङ्गो वेदोऽध्येयो ज्ञेयश्च" (महाभाष्ये) इत्याद्यादर्शमनुसरन्तो वेदाभ्यासोऽस्माक निष्कारणो धर्म इति मन्यमाना वेदमप्यभ्यस्येयुरनुशीलयेयुश्च।

कथमेतत्सर्व सम्पादयितु शक्यते, कथ च वेदाध्ययन द्विजमात्रेण विशेषतश्चार्यजाते पुरोयायिभिर्ब्राह्मणै क्रियते, कथ चास्मिन् विषये आधुनिकी प्रचलिता पठनपाठनप्रणाली साधिका भवितुमर्हति, इत्यादिविचारणार्थमेव वेदानामनुरागिणामनुयायिना च पुरस्तादेष प्रबन्ध समुपस्थाप्यतेऽस्माभि।[१]

---

१ सस्कृतरत्नाकरस्य वेदाङ्के पूर्व प्रकाशितोऽय लेखः किञ्चित्परिवर्त्यात्र समुद्ध्रियते।

(३४)

*भारतीयसंस्कृतिः

नूनमभूतपूर्वोऽय समयो भारतवर्षस्य दैर्घकालिक इतिहासे। सत्य सुप्रभाता रजनी। चिरकालिकपारवश्यमहातमिस्रातमोऽपगमे भारतीयगगनमण्डले उदयाभिमुखभारताभ्युदयभास्वतो नूतननूतनाशाकिरणोद्भासि दिव्यं प्राभातिक ज्योतिर्विशालमाशाचक्रवालम् आभासयन्नो मानसकलिका प्रबोधयदिवावलोक्यते। अस्मिन्हि शोभने समये प्रकृतिदेव्या. क्रोडे क्रीडतामाद्यानामृषीणाम् "एषा दिवो दुहिता प्रत्यदर्शि ज्योतिर्वसाना समना पुरस्तात्" (ऋग्० १।१२४।३) इत्याद्युषस्य श्रुतिगानमिव भारतीयानामस्माक सोल्लासमनसा सहसेव मुखान्नि सरति—

सुप्रभात विजयता धियो यत्पुष्टिवर्धनम्।
पथ सत्यस्य सातये ॥

तदेतेन मनोऽभिरामेणाभिनवजीवनदायिना समयेनाभिनवतामापन्न इव भारते

"ता प्रत्नवन्नव्यसीर्नूनमस्मे रेवदुच्छन्तु सुदिना उषासः"
(ऋग्० १।१२४।६)

---

१ ३।२।१६५० ईस्वीतिथावुत्कलस स्कृतपरिषद उपाधिवितरणोत्सवावसरे कृताद् ग्रन्थकर्तुर्दीक्षान्तभाषणात्तदशरूपेण समुद्धृतोऽय लेख. ।

इत्यनुसारं प्रत्नवद्धयोऽपि भारतीयसंस्कृतेः प्रजागरः स्यादित्यभिप्रायेण 'भारतं भारती भारतीयसंस्कृतिः' इति श्रुतिमधुरो रव सर्वत श्रुतिपथमापतति।

न केवलमस्मद्देशस्य विभिन्नक्षेत्रेषु कार्यधुरं वहन्तो नेतार एव तत्तन्मञ्चेभ्यो भारतीयसंस्कृतेर्गुणगानपरा अनवरतमद्यत्वे श्रूयन्ते, किन्तु हिन्दुमहासभा-राष्ट्रियस्वयंसेवकसंघ-अखिलभारतीयसंस्कृतिसंमेलनप्रभृतिसंस्था अपि तथैव खलु तन्महिमवर्णनया मुखरा दृश्यन्ते। किं बहुना भारतवर्षस्य तु का वार्ता, भारताद्बहिरपि अमेरिका-रूस-फिन्लैण्ड-नारवेप्रभृतिसुदूरदेशदेशान्तेरष्वपि भारतीयसंस्कृतेरध्ययनाध्यापनविषयिणी महती अश्रुतचरी रुचिर्विदुषां नानाविश्वविद्यालयानां च क्रमशः प्रवर्धमाना अहरहः संवादपत्रेभ्यः प्रतीयते।

तत्र केयं ननु भारतीयसंस्कृतिः, किं तस्याः स्वरूपम्, कीदृशं च तस्याः स्थानमद्यतनीये जगतीति स्वाभाविकी जिज्ञासा समुदेति नो मनःसु। सर्व एष विचारः खलु संस्कृतिसामान्यस्वरूपावधारणसापेक्ष इति संस्कृतिसामान्यमेव तावत्संक्षेपेण विचार्यते।

तत्र संस्कृतिस्तावत्केति जिज्ञासायां कस्यापि देशस्य समाजस्य वा विभिन्नजीवनव्यापारेषु सामाजिकसंबन्धेषु वा मानवीयत्वदृष्ट्या प्रेरणाप्रदानां तत्तदादर्शानां समष्टिरेव संस्कृतिरित्येवार्थः प्रमितित्वेन वक्तव्यः। वस्तुतस्तस्यामेव सर्वस्यापि सामाजिकजीवनस्योत्कर्षः पर्यवस्यति। तयैव तुलया विभिन्नसभ्यताना-

मुत्कर्षापकर्षौ मीयेते। किं बहुना, संस्कृतिरेव वस्तुतः "सेतुर्विधृतिरेषा लोकानामसंभेदाय" (छान्दोग्योपनिषदि ८।४।१) इत्येव वर्णयितुं शक्यते। अत एव च सर्वेषां धर्माणां सम्प्रदायानामाचाराणां च परस्परं समन्वयः संस्कृतेरेवाधारेण कर्तुं शक्यते।

भारतीयसंस्कृतिः

उपर्युक्तदृष्ट्यैव भारतीयसंस्कृतेरपि गुणगानमद्यत्वेऽभितः श्रूयते। इयं हि भारतीयसभ्यताया अन्तरात्मा, सर्वेषां भारतीयानां धर्माणां सम्प्रदायानां चाधारः। आपाततः परस्परं विरुद्धत्वेन प्रतीयमानेष्वपि शैवशाक्तवैष्णवजैनबौद्धादिसम्प्रदायेषु परस्परं य आन्तरः संबन्धस्तस्य मूलं तेष्वेकसूत्ररूपेण ओतप्रोता भारतीया संस्कृतिरेव। "स यथा सर्वासामपां समुद्र एकायनम्" (बृहदारण्यकोपनिषदि २।४।११) एवं सर्वेषां भारतीयसम्प्रदायानां भारतीयसंस्कृतिरेकायनम्।

भारतीयसंस्कृतेस्तत्तत्सम्प्रदायानां च परस्परं पोष्यपोषकभावरूपः संबन्धः। एकतः सा तानाप्याययति, अपरतस्ते तां पोषयन्ति। अत एव "इदं सत्यं सर्वेषां भूतानां मध्वस्य सत्यस्य सर्वाणि भूतानि मधु" (बृह० उप० २।५।१२) इति श्रुतिमनु "इयं भारतीयसंस्कृतिः सर्वेषां भारतीयसम्प्रदायानां मध्वस्याः संस्कृतेः सर्वे सम्प्रदाया मधु" इदमपि सुतरां वक्तुं शक्यते।

इय हि यद्यपि तत्तत्सप्रदायेषु व्याप्ता, तथापि न तैरस्याः स्वरूप परिसमाप्यते। किञ्च, तत्तत्कालभेदेन तत्तदवस्थितिभेदेन च भिन्नापि, गङ्गाया धारेव सतत प्रगतिशीलापि, सा एकसूत्ररूपेण वर्तमाना स्वस्या एकात्मता पवित्रता च न जहाति। अत एव भारतवर्षे चिराय प्ररूढासु, अस्माक दास्यकाले च सुतरा प्रवृद्धासु, अनुदारसाप्रदायिकभावनासु विद्यमानास्वपि, तत्त्वविदो विचारशीला विद्वास "परोक्षप्रिया हि देवा प्रत्यक्षद्विष" इति श्रुतेरादेशमनुसरन्त इव तेषु तेषु सप्रदायेषु व्यापिन्या एकस्या भारतीयसस्कृत्या भावनयैव भावितचित्ता उदारहृदया सर्वत्र समदृष्टयो न कुत्रापि सम्प्रदाये पक्षपातिनो भवन्ति, न चान्यायेन व्यवहरन्ति।

भारतीयसंस्कृतेः स्वरूपम्

तस्या एतस्या आसेतुहिमालयम् "आ समुद्रात्तु वे पूर्वादा समुद्रात्तु पश्चिमात्" (मनु० २।२२) परःशतेषु सप्रदायेषु प्रविभक्ताया, परःसहस्रेभ्यश्च वर्षेभ्यो लोकोत्तरप्रतिभानवद्भिराचार्यैर्महात्मभिश्च जगद्धितसपादनकामनयैवाभिवृद्धि नीताया, साम्प्रत च चतुर्दिशम् "इन्द्राग्नी ता हवामहे" (ऋग्० १।२१।३), "सवितारमुपह्वये" (ऋग्० १।२२।५) इत्यादिसदृश देवतारूपेण समाहूयमानाया भारतीयसस्कृते कि स्वरूप कि वा वैशिष्ट्यमिति महति प्रश्ने समासत एव तत्समाधानमिह प्रदर्श्यते।

भारतीयसस्कृते. स्वरूपावधारणप्रसङ्गे प्रथम पदमवगाहते

आध्यात्मिकी भावना। एषा हि तस्या अधिष्ठान हृदयमात्मैव वा। तिलेषु तैलमिव, पुष्पे सुगन्ध इव, क्षीर आज्यमिव, प्राणिषु प्राणा इव, शरीरे रक्तमिव वा इय हि तस्या. सर्व स्वरूपमभिव्याप्य तिष्ठति। मणिमालाया मेरुमभितो मणिगणा इव आध्यात्मिकी भावनामभितस्तस्या अन्ये गुणा अभिवर्तन्ते। सैव तत्सूत्र येन वै भारतीयसस्कृते. सर्वाण्यन्यानि रूपाणि स दृब्धानि भवन्ति। एषैव तानि सर्वाणि यमयति। सब्राह्मणोपनिषत्का वेदा., स्मृतय, पुराणानि, बौद्धाना जैनाना वागमाः, महात्मना वचासि, अन्यद्वा भारतीय वाङ्मय सर्वमप्याध्यात्मिक्या भावनया साक्षादसाक्षाद्वा ओतप्रोतम्। असख्यानां भारतीयमहात्मना मुनीना साधूनां च जीवनान्यस्या एव निदर्शनानि।

कीदृग्रूपा पुनरियमाध्यात्मिकी भावनेति चेत्, "परोक्षप्रिया हि देवा प्रत्यक्षद्विष.", "कश्चिद्धीर प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" (कठोपनिषदि २।१।१), "श्रेयो हि धीरोऽभि प्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते" (कठो० १।२।२), "पञ्ञापासादमारुय्ह असोको सोकिनि पजं। पब्बतट्ठो व भुम्मट्ठे धीरो बाले अवेक्खति॥" (धम्मपद २।८) इत्यादिश्रुतिस्मृत्यनुसार सतत स सरणशीले क्षणपरिणामिनि स सारे आपातरम्या पर्यन्तपरितापिनीमैन्द्रियिका तात्कालिकी च प्रवृत्तिं विहाय यत्किंचित्स्वभाववतोऽप्यात्मन· कल्याणकामनया धीरधीभिरेवावलम्बनीया अन्तर्वृत्तिरूपा दीर्घदृष्टिरेव सेत्येव वक्तु

शक्यते। सा चैषा आध्यात्मिकी भावना समाना सर्वेष्वपि भारतीयस प्रदायेषु। अन्यत्सर्वमधस्ताद् वर्णित भारतीयसस्कृते. स्वरूप वस्तुतोऽस्या एव विस्तरो व्याख्यान वा।

आध्यात्मिकीं भावनामनु समायाति पारलौकिकी भावना। आपातरम्ये पर्यन्तपरितापिनि ऐन्द्रियके जीवनेऽनास्था, आत्मन कल्याणकामना च स्वत एव 'अयमेव लोको न पर' इति भावनाया विरोधिन्या पारलौकिकभावनायामेव विश्रान्ति लभेते। ता विना को नु क्षणस्थायिनि सतत ससरणशील इह जीवने शान्तिभाग् भवेत्। एतयैव प्रेरिता भारतीया वीरा रमण्यश्च स्वधर्मस्य स्वदेशस्य च रक्षार्थं हसन्त एव सर्वस्व प्राणानपि चोत्सृजन्तो भारतीयेतिहासे दृश्यन्ते। सा चैषा पारलौकिकी भावनापि सतत-मस्मान् कर्तव्यपालनाय प्रोत्साहयन्ती अमूल्य रत्नमिव भारतीय-संस्कृते.।

कर्तव्यपक्षेऽपि वर्णनातीतमेव भारतीयसस्कृते स्वरूपम्। तत्र आत्मस यमस्तावत्प्रथम पदमधितिष्ठति। नानाविधव्रतोपवा-सादिबहुलेन तत्तत्साप्रदायिकाचारेण, कृच्छ्रातिकृच्छ्रचान्द्रा-यणादिविधानेन च आत्मसयमस्यैव भारतीयसस्कृता-वनन्यसदृश महत्त्वमाख्यायते। पुरुषार्थचतुष्टयसाधकेषु चतुर्ष्वाश्रमेषु यद् ब्रह्मचर्यस्यानन्यसाधारणं प्रमुख स्थान तदपि भारतीयसस्कृतावात्मसयमस्यैव वैशिष्ट्यं प्रख्यापयति। नैतदहेतुकं यत्पृथिव्या विभिन्नसभ्यतासु केवलं

भारतीयसंस्कृतावेव ब्रह्मचर्यस्य एकतमाश्रमत्वेन स्थापना तस्या-द्वितीयमहत्त्ववर्णन च दरीदृश्यते। कस्याविदित यद् भीष्म-पितामहसदृशादर्शब्रह्मचारिणा जन्मभूमिरपि भारतमेव।

आध्यात्मिकभावनावारिणा सिक्तायामेव भूमौ पुनरस्यात्म-संयमस्य सभव इति न व्याख्यामपेक्षते। वस्तुतस्तु यमनियमा-दीनि सर्वाण्यपि बाह्याभ्यन्तरशुचितासाधनानि आत्मसयमस्यैव प्रपञ्च.।

आत्मसयमादनन्तर तस्यैव सद्विलास इव भारतीयसंस्कृते-रपरं वैशिष्ट्य मातृशक्ते स माननं नाम। भारतीयसस्कृतेर-साधारण माहात्म्यमेतत्कृतमेव। विश्वप्रपञ्चस्य मूलकारणभूता-माद्या महाशक्ति "या देवी सर्वभूतेषु मातृरूपेण स स्थिता" (दुर्गासप्तश० ५।७१) इत्येव मातृरूपेण चिरात्संभावयन्त्या, "तव देवि भेदा स्त्रिय. समस्ता" (दुर्गा० ११।६) इत्येव च ता निध्यायन्त्या भारतीयसंस्कृत्या मातृशक्तेर्विशेषत स मान स्वाभा-विक एव। परं नियतमेतद्वैशिष्ट्यमखिलेऽपि स सारेऽसाधारणम्। "मातृवत्परदारेषु" इति नीतिकृद्भिरभ्युपगत सिद्धान्तो व्यवहारेऽपि परस्त्रीषु परदारिकासु च मातः! भगिनि! पुत्रि! इत्यादिशब्दान् प्रयुञ्जानैर्वस्तुत परिपाल्यते भारते पामरैरपि जनै। किं बहुना, विशेषतो भगवत्या सीताया[1] देव्या द्रौपद्याश्चापमानपरिमार्जनार्थं

---

[1] तथा हि दृश्यताम्—"काव्य रामायण कृत्स्न सीतायाश्चरितं महत्" (वाल्मी० रा० १।४।७)। "पतिव्रताना नाकस्मात् पतन्त्यश्रूणि भूतले" (वा० रा० ६।१११।६७)।

प्रवृत्तयोर्रामायणमहाभारतयोर्निर्माणमपि उपर्युक्तसिद्धान्तनिदर्शनार्थमेव जातमिति मन्ये। ततश्च स्त्रीजातेः समानभावनाप्यस्माकं भारतीयसंस्कृतेरवर्णनीयं वैशिष्ट्यमिति निर्विवादम्।

परस्परं विचारसहिष्णुतापि अपरं वर्णनार्हं वैशिष्ट्यं भारतीयसंस्कृतेः। सामाजिकाचारेष्वपेक्षितेऽपि प्रायेण व्यक्तीनां साम्ये, विचारविषये सर्वेषां स्वातन्त्र्यं चिरादेवाभिमतमासीद् भारतीयानाम्। परस्परं विचारसहिष्णुतामन्तरेण न तत्प्रथत इति साप्यावश्यकत्वेनाङ्गमस्मत्संस्कृतेः। अत एव ईश्वरानीश्वरवाद-वेदपौरुषेयत्वापौरुषेयत्ववाद-वाममार्गदक्षिणमार्गादिभेदानां परस्परं सहिष्णुतया संस्थितिर्न कस्याप्यविदिता भारते। अत एव च विशुद्धभारतीयेतिहासे विदेशेतिहासेष्विव धर्मभेदासहिष्णुतामूलकस्य रक्तपातस्य नामापि न श्रूयते। नृशंसन (= मनुष्यहिंसा) विरोधप्रतिपादकस्य महाभारतादिप्राचीनग्रन्थेषु श्लाघनीयगुणत्वेनासकृद्वर्णितस्य आनृशंस्यस्याप्यन्ततो मनुष्यत्वस्य समादररूपायां परस्परं विचारसहिष्णुतायामेव पर्यवसानं भवति।

व्यक्तिस्वातन्त्र्यरूपा वा मनुष्यत्वस्य समानरूपा वा एषा विचारसहिष्णुतैव वस्तुतो जैनानामनेकान्तवादसिद्धान्तस्य मूलम्। विभिन्नशास्त्रेषु जैनाद्यागमेषु चोपसंगीतगौरवाया अहिंसाया अपि अन्ततस्तत्तच्चेतनव्यक्तीनां स्वव्यक्तित्वविकासार्थमबाधस्वातन्त्र्यमेवाभिप्रायो निष्पद्यते।

अत एव भारतीयेतिहासे बलात्कारेण धर्मान्तरग्रहणस्य

वार्ता अश्रुतचरी एव। तदत्र मौलिको भेद आर्यसंस्कृतेरितरसंस्कृतिभ्य ।

भारतीयसंस्कृतेः स्थानमद्यतनीये जगति

तदेवमाध्यात्मिकभावनाया आधारेण पारलौकिकी भावना, आत्मसंयम., मातृशक्ते समान , परस्पर विचारसहिष्णुता चेत्यादिरूपैरसाधारणैर्व्यष्टे समष्टेश्चोदात्तताया. कल्याणस्य च संपादकैर्गुणैरर्चिता इयं नो भारतीयसंस्कृतिर्नू न स्वरूपत एव सकललोककल्याणसाधनक्षमा। अत एव मानवीयधर्मेणानर्थान्तरतया "जातिदेशकालसमयानवच्छिन्ना सार्वभौमा महाव्रतम्" (योगसूत्रे २।३१) इत्यनुसार सार्वभौमधर्मस्यैव नामान्तरम्। लोककल्याणमेव कामययानैर्ऋषिभिर्मुनिभिराचार्यैश्च प्रायोऽविच्छिन्नरूपेण संपोषिताया, "मित्रस्य चक्षुषा समीक्षामहे" (यजुर्वेदे ३६।१८), "असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्मामृत गमय" (बृहदारण्यकोपनिषदि १।३।२८) इत्याद्युपदेशामृतैश्च भरिताया अस्या स्वभावत एव सार्वभौमधर्मरूपत्वे नहि किञ्चिदाश्चर्यम्। अत एव च "कृण्वन्तो विश्वमार्यम् (ऋग्वेद० ९।६३।५), "एतद्देशप्रसूतस्य सकाशादग्रजन्मन। स्व स्व चरित्र शिक्षेरन् पृथिव्या सर्वमानवा ॥" (मनुस्मृतौ २।२०) इत्याद्युद्घोषास्तस्या संस्कृते संगच्छन्ते। तत्कृत एव च तस्याः कल्याणकारी प्रभावोऽद्यापि सुदूरदेशदेशान्तरेषु, विशेषतश्च बृहत्तरभारतप्रदेशेषु, समुपलभ्यते।

तस्या एतस्याः साम्प्रतिके, एकतो नानासघर्षैरुद्विग्ने, अपरतो जगद्विजिगीषाराक्षस्या समाक्रान्ते, अन्यत पारस्परिकविद्वेषाविश्वाससत्रासै· कदर्थिते, क्वचित्क्वापि सभ्यताप्रकाशेन रहिते जगति कीदृशी उपयोगितेति विषये किमु वक्तव्यम् ? स्वत एव स्पष्ट एषोऽर्थो नैव हेतुवादै साध्यतामपेक्षते। नून भारतीयसस्कृत्यधीनमेव परित्राण समन्तात् खिन्नस्य जगत ।

तस्याः सांप्रतिकी दुरवस्था

सत्यप्येतादृशे लोकोत्तरमहिमशालिनि भारतीयसस्कृत्याः स्वरूपे वृत्ते च, तस्या भारत एव साम्प्रतिकी दुरवस्था कस्य नाम मनस्ताप न तनुते ? चिरादेव जीर्णशीर्णगात्रा सा साम्प्रत सत्यं मुमूर्षुरिव प्रतीयते। यत्र कुत्रापि दृष्टिर्निक्षिप्येत तत्रैव सा सुप्तेव, विलुप्तेव, अथवा विलोपनोन्मुखी एव दृश्यते। सर्वेष्वस्माकं व्यवहारेषु, जीवनक्षेत्रेषु, गृहजीवने, सामाजिकजीवने, विश्वविद्यालयेषु, अन्यत्र वा तस्या आदर्शानां स्वरूपस्य च प्रायेण प्रातिकूल्यमेव दृष्टिपथमापतति ।

तस्या आध्यात्मिकताया मौलिक आधार एव तावत् प्रस्खलित इव, शिथिलित इव, उन्मूलित इव वा सजात.। "सगच्छध्व सं वदध्वम्" (ऋग्० १०।१६१।२) इतिश्रुतेरादेशानुसार समष्टिहितसपादन एवात्महितबुद्धेर्दीर्घदृष्टिमपहाय समाजविद्वेषिण्यामन्धस्वार्थकामनायामेव निमग्ना, सात्त्विकभावना.

समुत्सृज्य रजस्तमोऽभिभूताः, स्वकर्तव्यपालनविमुखा निरन्तरमधिकारलिप्सयैवोह्यमाना, "ईहन्ते कामभोगार्थमन्यायेनार्थसचयान्। इदमद्य मया लब्धमिम प्राप्स्ये मनोरथम्" (भ० गी० १६।१२-१३) इत्येवम् "आत्मसभाविता स्तब्धा धनमानमदान्विता" (भ० गी० १६।१७) जगतोऽहितायैव प्रायेण प्रवृत्ता मन्ददृष्टयो वय स्पष्ट नितरा प्रतिकूला आध्यात्मिकभावनाया।

एव भारतीयसस्कृत्या आधार एव समुन्मूलनोन्मुखे का कथा तस्यास्तत्तद्विशेषाणाम्। तथा च आत्मसयमस्थाने नग्नोच्छृङ्खलताया, विचारसहिष्णुताया स्थाने साप्रदायिकविद्वेषिताया वर्गसघर्षस्य च साम्राज्यमभितो दरीदृश्यते। औदरिका इव 'रोटीरोटी' इति विपुल क्रन्दन्तोऽपि सुदूरमेव तत क्रमशो नीयमाना', वस्त्राद्यावश्यकसामग्रीविहीना., सर्वविधानुशासनहीना इव स्वकर्तव्यपालनविषये, 'स्त्रिय स्वतन्त्रा' इत्येवमापाततस्तासा हित चिकीर्ष·तोऽपि दम्पत्योरकृत्रिम स्नेहमुन्मूल्य गृहे गृहेऽशान्तिवातावरणोत्पादनपरा., चिरपरम्पराप्ररूढ गुरुशिष्ययो. पवित्रसम्बन्ध कलुषीकुर्वन्तो वयमसशय भारतीयसस्कृते सुदूरमुपनीता इव साम्प्रतम्।

सांप्रतिका भारतीयविश्वविद्यालयाः

यथा ह वै कस्मिन्नपि देशे राष्ट्रे वा तत्तद्वस्तूनि तत्तद्यन्त्रालयेषु निष्पाद्यन्ते, एव वाव तत्रत्याया सभ्यताया सस्कृतेर्वा अभिवृद्धि. परिपुष्टिर्वा तत्रत्येषु विद्यालयेषु विशेषतश्च विश्वविद्यालयेषु जायते।

तत्परीक्ष्यता तावदस्मदीयाना विश्वविद्यालयानामेव दृष्टिरवस्था चैतस्मिन् विषये। सत्यामपि नानाविधाया स्पृहणीयाया तेषा समुन्नतौ, सत्यपि च निर्विवाद तेषामस्माक समुन्नतौ स्वतन्त्रता-वाप्तौ च महत्युपकारे, को नाम प्रभवेत् प्रत्याख्यातु यत्तेषामा जन्मन सर्वापि प्रवृत्ति सर्वेऽप्यादर्शा आमूलचूड विदेशप्रभवा एव। भारतीयसस्कृतेर्भवतु नामाध्ययनाध्यापन यत्र कुत्रचिद् विशेष-विषयरूपेण, तत्राप्यङ्गुलिनिर्देश्यैश्छात्रै, पर निश्चित केनाप्यद्य यावन्नैव प्रयतित भारतीयसस्कृत्याधारेण तान् प्रतिष्ठापयितुम्। प्रायेण भारतीयवाङ्मयस्य ससपर्शेनापि विहीनास्तत्रत्याश्छात्रा अध्यापकाश्च भारतीयसस्कृतेरादर्शेभ्य पराङ्मुखा इति न किमप्याश्चर्यम्। अत एव च्छात्रोच्छृङ्खलतया कदर्थनामनु-भवतामध्यापकानाम्, निर्व्याजविद्यापरायणतामुत्सृज्य प्रधानतोऽ-र्थोपार्जनपराणामध्यापकानामुपेक्षाभावेन खिन्नाना छात्राणा च पारस्परिकसबन्धस्यादर्शहीनता क न तापयति भारतीयसस्कृते कल्याणानुबन्धिष्वादर्शेषु श्रद्धावन्तं जनम्। एतस्यैव परिणामोऽय यदद्यत्वेऽहरह· सुप्रसिद्धविश्वविद्यालयेष्वपि छात्रेभ्योऽप्यध्यापकाना भयस्य, छात्राणा स्वाभीष्टप्रतिघातमूलकस्य तात्कालिकस्याध्ययना-द्विरामस्य, तैरेव कृतस्य न केवलमध्यापकाना किन्तु विश्वविद्यालय-प्रधानाधिकारिणामप्यनादरस्य च सवादाः समाचारपत्रेषु दृश्यन्ते।

परदारेषु परदारिकासु च मातृबुद्धिं स्वसृबुद्धिं दुहितृबुद्धिं वा शास्त्रतो व्यवहारतश्च प्रतिपादयति भारतीयसस्कृतिः। परं

तद्विरुद्धमेवास्माकं विश्वविद्यालयेषु च्छात्राणामभद्रो व्यवहारो भारतीयसंस्कृतेस्तु सर्वथा प्रतिकूल एव, भारतीयसंस्कृतेरपरिचित-स्यान्यस्यापि कस्यचित्सोऽभिमतो भवेदिति महान्न सन्देहः।

प्राचीनभारते नैकविधतपस्याया जीवनं निर्वहतां छात्राणां ब्रह्मचर्यं शृङ्गारभावनाराहित्यं सौम्यत्वं मातापित्रोरैश्वर्यशालित्वा-शालित्वविचारमप्युत्सृज्य कृष्णसुदाम्नोरादर्शमनु परस्परं भ्रातृ-भावेन गुरुसपर्यया च वर्तनं कस्याविदितं भारतीयसंस्कृतीतिहास-विदः। सर्वमेतद्विपर्यस्तमिवाद्यत्वे विद्यासंस्थास्विति नापेक्षते विशेषविवरणम्। शिक्षाया अतीव व्ययसाध्यत्वम्, स्वास्थ्यस्य निर्ह्रासः, कस्या अपि निश्चिताया सन्ध्यावन्दनादिसहकारिण्या दिनचर्याया अभावः, सर्वमेतदेतत्कृतमेव।

अत एव साम्प्रतं भारतीयविश्वविद्यालयेषु भारतीयसंस्कृतेस्तु का कथा, प्रायेण साकल्येन तद्विरुद्धमेव वातावरणम्। भाषाया भावाना भोजनाच्छादनयोरपि च दृष्ट्या प्रायेणाभारतीयं वर्तनं तत्र।

तदेवमस्माकं विद्यास्थानेभ्य एव बहिष्कृता भारतीया संस्कृतिः कथमन्यत्र राष्ट्रियजीवने समाश्रयं लब्धुं क्षमा भवितुम-र्हति। कथं च तस्या दुरवस्था अपरिहेया न भविष्यतीति सर्वथैव दौर्भाग्यं तस्याः। प्रतिवर्षं देशालङ्कारभूतैर्महाभागैर्दीक्षान्तस-मारम्भेषु विचारगभीरेषु अभिभाषणेषु क्रियमाणेष्वपि नूनं हृदय-तापकरी भारतीयसंस्कृतेरियं दुर्दशा।

भारतीयसंस्कृतेः समुद्धारः

तदेवमस्या, प्राचीनकाले व्याप्तदूरदेशदेशान्तराया, साप्रत पुन स्वदेशेऽपि दुरवस्थाग्रस्ताया जीवितसशय चोपेताया भारतीय-सस्कृत्या, न केवल राष्ट्रियजीवन एव "अभय सत्त्वसशुद्धि" (भ० गी० १६।१) इत्यादेर्दैव्या सपद परिपोषिकाया परिस्थिते-रुत्पादनार्थम्, किन्तु तत्तद्व्यक्तिगतव्यवहारेष्वपि निर्व्याजमाधुर्य-भावानामुत्पत्तये सद्य समुद्धारोऽपेक्षित । अत एव राष्ट्रस्यात्मन समुद्गत तदन्तर्नादरूपमाह्वानमिवैष भारतीयसस्कृतेरुद्घोष सम-न्तात् साम्प्रत श्रूयते ।

तत्कोऽभ्युपायस्तस्या समुद्धारस्येत्येव महान् प्रश्न ।

तत्र तावदिदमवधारणीय यत्सत्यामपि चिरकालतोऽत्यन्त प्रतिकूलाया परिस्थितौ भारतीया सस्कृतिरद्यापि न सर्वथैव समु-च्छिन्ना । जागर्त्येव सा समष्टिरूपेण भारतीयजनताया अन्त-र्हृदये मूकभावनासु च । तत सर्वत. प्रथममावश्यकता यत्तस्या अन्तरात्मन आविष्करणं नाम । तच्च तस्या दीर्घपरम्पराया अध्ययने-नैव साध्यम् । तदर्थं च केवलमेकमात्र साधन यदिद सस्कृत देववाणी वा ।

कस्यैतदविदित यत्सस्कृत हि भारतीयसस्कृते शरीरम् । पर सहस्रवर्षेभ्य समागताया, परिस्थित्यनुसार तत्तत्सप्रदाय-प्रभावाद्वा तत्तद्राजनीतिकप्रभावाद्वा नानावस्था उपभुञ्जानाया अपि

अन्तर्वर्तिनीमेकसूत्रता सदधानाया भारतीयसस्कृते स्वरूपावगमाय देवत्रायया विस्तृत, प्रायेण भारतीयेतिहासकालस्य समव्यापि, वाङ्मयमेव मुख्य साधनम् ।

चिरन्तनकालादेवायुतसिद्ध इव सबन्धो भारतीयसस्कृत्या सह सस्कृतस्य । भारतीया सस्कृतिरिव सस्कृतभाषापि चिरादेव समानरूपेण समाश्रिता परिपुष्टा च विभिन्नसप्रदायै । अद्यत्वेऽपि विभिन्नभाषाभाषिप्रान्तेषु विभिन्नधार्मिकसप्रदायेषु च सस्कृतभाषैव सास्कृतिकीमेकसूत्रता सपादयति । कस्य तिरोहित यदद्यापि यावद्भारतमार्याणा धार्मिक कृत्य प्रायेण सस्कृतद्वारैव सपाद्यते । अद्यापि च दिष्ट्या भारतीयभाषासु केवल सस्कृतमेव आसेतुहिमालयमापूर्वापरसमुद्र च परस्परव्यवहारसाधनम् ।

ततश्च निर्विवाद भारतीयसस्कृते समुद्धारस्य मुख्यतम साधन सस्कृतमेव ।[१]

(३५)

कृत्स्नो हि लोको बुद्धिमतामाचार्यः

(चरके)

अथवा

संस्कृतज्ञेषु लोकप्रगतेर्लोकावस्थितेश्चोपेक्षा

---

१ विषयस्यास्य विशेषविचारस्तु प्रबन्धप्रकाशस्य द्वितीयभागेऽविकलरूपेण प्रकाशिते प्रकृतदीक्षान्तभाषण एव द्रष्टव्य ।

*कानि पुनर्देववाण्या अवनते कारणानि ? प्रायेणैष विचार एतादृशस्थलेषु बहुभिरुपस्थाप्यते यद्राजशक्ते स्वसंस्कृते पोषिकाया अभाव एवास्माक देववाण्या वा उत्तरोत्तरमभिवर्धमानाया अवनते कारणमिति। "राजा कालस्य कारणम्" इत्यादिवचनान्यन्यत्र विषये प्रमाणीक्रियन्ते। पर वस्तुतो विचारणाया तु कार्यकारणभावस्य वैपरीत्यमेवात्र न प्रतिभाति। कस्यापि देशस्य राजशक्ती राजनीतिसबन्धिन्यवस्था वा न स्वयमकारणात एव समुत्पद्यते । वस्तुत सापि तत्तद्देशवासिना शिष्टाना शिक्षिताना वा जननायकाना जनताया प्रतिनिधिरूपाणा पुरोयायिना पुरोहिताना वा प्रजा प्रति स्वकर्तव्यस्य पालनापालनमूलिकैव। एवञ्च तत्तत्काले सदृश्यमाना भारते या राजनीतिसबन्धिनी दुरवस्था नैवास्माक दुरवस्थाया कारणम्, प्रत्युत वयमेव स्वकर्तव्यपालनाद्विमुखा जनताया पुरोयायिपदाद् भ्रष्टास्तस्या कारणतामुपगता। एतादृशमेव तत्तद्विषयककार्यकारणभावे मतिवैपरीत्यमन्येष्वपि विषयेषु प्रायेणास्माकमुपदृश्यते। तदाधारेणैव च जनताया वास्तविकलाभालाभविचारमुपेक्ष्य तास्ता दृष्टी प्रजासु प्रचारयन्तो वस्तुत स्वात्मवञ्चनामेव बहवो जना कुर्वन्ति।

---

* १६, २०।८।१६३६ ईस्वीतिथ्यो सयुक्तप्रान्तीयसस्कृतच्छात्रसमेलनस्य श्रीमथुरापुर्या द्वितीयाधिवेशने ग्रन्थकर्त्रा सभाध्यक्षरूपेण कृतादभिभाषणात्तदशरूपेण समुद्धृतोऽय प्रबन्ध ।

लोकप्रगतेर्लोकावस्थितेश्चोपेक्षा

ततश्च न हि राजशक्तेर्हानि संस्कृतभाषाया अवनतेर्मूलकारणम्, किन्तु यन्मूलकारणा तत्कृतैव राजशक्तेर्हानिरपि। तच्च लोकप्रगतेर्लोकव्यवहाराद् लोकावस्थितेश्च संस्कृतज्ञाना विराग उपरति, तेषामुपेक्षा च।

लोकप्रगतिर्हि नदीव सततमग्रगामिनी न जातु एकावस्थायामेव सतिष्ठते। ऋतूनामिव तस्या अपि आनुरूप्येण नर्तन जीवनस्य सफलजीवनयात्राया वा प्रथम लक्षणम्। लोकप्रगतिमनुरुध्यैव प्रवर्तमानास्तत्तद्देशनिवासिन्यो जातयो जगति स्वयश समन्तात् प्रसारयन्ति। अन्यास्तु कालकवलतामापद्यन्ते।

वस्तुतो लोकप्रगतिमूलिकैव तत्तद्युगादिकल्पना, युगरूपानुसारतश्च धर्माणा भेद इति वै शास्त्रविदा मतम्। तथा हि—

अन्ये कृतयुगे धर्मास्त्रेताया द्वापरे युगे।
अन्ये कलियुगे नृणा युगरूपानुसारतः॥
युगेष्वावर्तमानेषु धर्मोऽप्यावर्तते पुन।
धर्मेष्वावर्तमानेषु लोकोऽप्यावर्तते पुन॥
श्रुतिश्च शौचमाचार प्रतिकाल विभिद्यते।
नानाधर्मा प्रवर्त्तन्ते मानवाना युगे युगे॥

इत्येव तासु तासु स्मृतिषु स्मर्यते।

सर्वेष्वपि देशेषु सर्वेष्वपि च कालेषु सर्वेऽपि कर्ममार्गा, सर्वमेव कर्मकाण्ड च लोकप्रगतिमनुरुध्यैव वस्तुत प्रजाहित-दृष्ट्यैव च प्रचारित सत् साफल्य लभते।

लोक एव याथार्थ्येन

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्य कृत ।
ऊरू तदस्य यद्वैश्य पद्भ्या शूद्रो अजायत ॥

इत्येव गीयमानस्य भगवतो विराट्पुरुषस्य प्रत्यक्षमूर्त्ति-रिव सर्वेषामेव मार्गाणा धर्माणा कर्मणा वा सत्यत्वासत्यत्वयो-रुपयोगित्वानुपयोगित्वयोर्वा परीक्षणाय तत्त्वनिकषग्रावेव वर्तते। अमुमेवार्थं प्रख्यापयन्ती "विशि राजा प्रतिष्ठित" इत्येषा श्रुतिर्गीयते।

अयमेवार्थ "स्त्रीभ्य सर्ववर्णेभ्यश्च धर्मशेषान् प्रतीयात्" (आ० धर्म० २।११।२६।१५) इत्यापस्तम्बधर्मसूत्रवचनेन पुष्टि समश्नुते।

एतदेव रहस्य यत्कालक्रमेण केऽपि धर्मा विलुप्ता जायन्ते, परम्परागता प्राचीनशास्त्रेषु समुद्गीयमाना कर्मपथा खिली-भवन्ति। अन्ये च नूतनास्तेषा स्थानमधितिष्ठन्ति। एतदेव कारण प्राचीननवीनसस्कृत्योस्तिरोभावाविर्भावयो.।

तामेता लोकप्रगतिमनुरुध्यैव लोकावस्थितिञ्चावेदय लोक-व्यवहारविदो विद्वास. प्रजाहितदृष्ट्यैव कर्मसु प्रवर्तमाना:

सर्वेषा समादरभाजो जायन्ते । तत्तत्कार्येषु पुरोयायिन पुरोहिता (पुरोऽग्रे हिता स्थापिता) मार्गप्रदर्शका एव मनुष्येषु नायकत्वपदवीं नेतृत्वपदवीं वासादयन्ति। चक्षुषामिव नेतृणा शिक्षिताना शिष्टाना वा एतदेव कार्यं यत्खलु मार्गप्रदर्शन जनताया । एतन्मूलकमेव खलु नयनयोर्नयनत्वम् । पशुषु पुनरन्यथैवैतत् । तेषा प्राजिता हि पश्चादेति दण्डसाहाय्येनैव च तानग्रे यापयति । अत एव प्राचीनकाले ऋषयो धर्मसकटेषु प्रजोपप्लवेषु चोपस्थितेषु सभूय विचार्य च लोकावस्थानुसारत एव कर्तव्यमार्गनिर्धारण कुर्वन्ति स्म। लोकावस्थाया उपेक्षयैव पुन प्रवर्तमानाः पश्चाद्दृष्टयो जना शोकमापद्यन्ते ।

ततश्चास्माकं देववाण्या सस्कृतज्ञाना वा विदुषा चिरादेव क्रमशो ह्रासमुपगच्छन्त्या अवस्थाया वास्तविक मूलकारण लोकप्रगतेर्लोकावस्थितेश्च अथवा प्रजायाः सामान्यजीवनस्योपेक्षैव, ततस्तेषा पार्थक्यं च। लोकस्य लोकयात्रायाश्च प्रात्यहिकीनामावश्यकतानामुपेक्षयैवास्माक जीवनोपयोगिनीना विद्यानां कलाना च नानाविधाना तिरोभाव समजनि। लोकप्रगतेरुपेक्षणेन सर्वैरुपेक्षिता इव शनै शनै सस्कृतज्ञा दृश्यन्ते। जनताया नेतृत्व च शनै शनैस्तेषां हस्तात्प्रस्खलितमिव प्रतिभाति ।

स्वाभ्युदयकाले पुनर्देववाण्या वाङ्मयस्य जीवनयात्राया

विभिन्नविभागानामानुरूप्येणैव नैके विभागा विभिन्ना. शाखाश्चावर्त्तन्त। सभ्यसमाजस्य तत्तदावश्यकतानुसारमेव तास्ता विद्या कलाश्च समुद्दिश्य संस्कृतवाङ्मय तदा प्रवृत्त-मासीत्। आसीच्च समाजस्य राष्ट्रस्य वा सर्वेष्वप्यङ्गेषु समाना कल्याणबुद्धि प्राचीनानामाचार्याणा शिष्टाना जनताया. पुरोयायिनाम्। अत एव च तत्र तत्र पुराणादिषु—

पठन्द्विजो वागृषभत्वमीयात्
स्यात्क्षत्रियो भूमिपतित्वमीयात्।
वणिग्जन· पण्यफलत्वमीयाज्
जनश्च शूद्रोऽपि महत्त्वमीयात्॥
(वा० रा० १।१।१००)

शृण्वन्विप्रो वेदवित्स्यात्क्षत्रिय पृथिवीपति।
ऋद्धि प्राप्नोति वैश्यश्च शूद्रश्चारोग्यमृच्छति॥
(अग्निपुराणे ३८३।२३)

इत्येव राष्ट्रस्य सर्वेष्वप्यङ्गेषु अङ्गाङ्गिभावरूपो घनिष्ठ. सबन्धोऽत एव चैकस्यापि दुरवस्थयोपेक्षया वा सर्वेषामपि हानिर्नियतेति च सिद्धान्तानुरूप सर्वेषामप्यङ्गाना कल्याण-कामना श्रूयते। अत एव च प्रजाया विभिन्नानामङ्गानामावश्य-कतानुरूपम् "आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वती" इत्येव विद्याना चातुर्विध्यमाम्नायते।

"चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति। आगमकालेन

स्वाध्यायकालेन प्रवचनकालेन व्यवहारकालेनेति" (महाभाष्ये), "आचार्य सर्वचेष्टासु लोक एव हि धीमत", "कृत्स्नो हि लोको बुद्धिमतामाचार्य । शत्रुश्चाबुद्धिमताम्" (चरके), "बुद्धिहीना विनश्यन्ति यथा ते मूर्खपण्डिता" (पञ्चतन्त्रे) इत्याद्यभियुक्तोक्तिभि, महाभाष्यादिप्राचीनग्रन्थेषु पदे पदे "तद्यथा लोके" इत्येव लोकव्यवहारस्य समादरेण, साङ्ख्यादिषु नानाविधलौकिकदृष्टान्तसाहाय्येन च शास्त्रार्थप्रतिपादनेन प्राचीनाना विदुषा दृष्टौ लोकबुद्धेर्लोकप्रगतेर्व्यवहारज्ञानस्य च महत्त्वमेव स्पष्टीक्रियते ।

प्राधान्येन सामान्यजनताया शिक्षणार्थं विनिर्मितेषु सर्वेषा माननीयेषु विभिन्नपुराणेषु राजशास्त्रस्य, भुवनकोशस्य, महाद्वीपादे, वास्तुलक्षणस्य, रत्नादिपरीक्षाया, वृक्षायुर्वेदस्य, नैकेषा राजवंशानाम्, अश्वचिकित्साया, गजचिकित्साया, अन्येषा चैवविधाना लोकोपयोगिविषयाणा सप्रपञ्च वर्णनादिकमपि "लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि' इति भगवदाज्ञानुरूप न केवल प्राचीनाचार्याणा लोकसंग्रहचेष्टाया लोककल्याणबुद्धेश्चैव निदर्शक, किन्तु तेषा स्वयमपि लोकोपयोगिविद्यासु परमप्रावीण्यस्य व्यापक स्पष्टत प्रतीयते ।

परमद्यत्वे संस्कृतज्ञा भीता इव समुद्विग्ना इव दूरत परित्यजन्ति व्यवहारोपयोगिनीना लोकप्रगतेश्च परिचायिकाना भूगोलेतिहासगणितराजशास्त्रादिविद्यानामध्ययनम् । हन्त ! एता-

दृक्प्रवृत्तिमूलिकैव स स्कृतभाषाया स स्कृतज्ञाना च जीवनयात्रा-सम्बन्धिषु विभिन्नव्यापारेषु राष्ट्रस्य तत्तदावश्यकविभागेषु चानिश स वर्द्धमानानुपयोगिता ।

तदेव प्रपञ्चितमस्माभिरस्मन्मतानुसारेण देववाण्या अवनतेर्मूलकारणम् । अन्यानि कारणानि वस्तुतोऽस्यैव मूल-कारणस्य व्याख्यारूपाणि ।[1]

(३६)

शिक्षायाः प्रधानमुद्देश्यम्

सर्वेष्वपि सभ्यदेशेषु शिक्षाविषयक. प्रश्न. सनातन एव । तथाप्यद्यत्वे सघर्षस्याशान्तेश्च वातावरणे चतुर्दिश प्रसृते, मनुष्यतया च पशुताया रूपे गृहीते सति, सर्वत्र शिक्षाविषयिणी अन्तरवेदनाप्रवृत्तिर्विशेषतो जागरितेव दृश्यते। अतो भारते प्रचलिता वर्तमानशिक्षामधिकृत्य किञ्चिदिह विवेचन साम्प्रतिकमेव।

शिक्षायाः प्रधानमुद्देश्यम्

शिक्षाया प्रधानमुद्देश्य किमित्येष वै मुख्य प्रश्न शिक्षा-विषये। नून तेनैतादृशेन भवितव्य येन मनुष्यस्य मनुष्यत्वाभि-

---

१ देववाण्या अवनतेरन्येषा कारणाना विचारस्तु प्रबन्धप्रकाशस्य द्वितीयभागेऽवकलरूपेण प्रकाशिते प्रकृतभाषण एव द्रष्टव्य ।

मुखी—न तु पशुत्वाभिमुखी—प्रवृत्तिर्विकासमाप्नुयात्, यच्च मनुष्यस्य पशुभ्य पृथक्ताया साधनीभूताना दैवीना सात्त्विकीना च प्रवृत्तीना प्रोत्साहनाय, नतु पाशवीनामासुरीणा च प्रवृत्तीना प्रवर्धनाय, प्रभवेत्। नैतद् विशेषविवरणमपेक्षते यन्मनुष्य· खलु स्वभावत एव दैवीभिरासुरीभिश्च प्रवृत्तिभिरुपेतो विद्यते। तथापि मनुष्यताया कृते आवश्यकमेतद् यन्मनुष्य स्वकीयनिम्नप्रवृत्तीना दमने शक्तो भवेत्। इममेवार्थं भगवद्गीता एवमाह—

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च।

(१६।६)

दैवी सपद्विमोक्षाय निबन्धायासुरी मता।

(१६।५) इति।

शिक्षाया उपर्युक्तस्य वास्तविकस्य उद्देश्यस्योपेक्षा वै साम्प्रत ससारव्यापिनः सघर्षस्याशान्तेश्च मुख्य कारणम्। कर्तव्याकर्तव्यबुद्धेरपेक्षां विनैव, कथमपि स्वार्थसम्पादनशक्तेरर्जनमेव शिक्षाया उद्देश्यमित्येव प्रायेण लोको मन्यते। एतादृश्या भावनाया आधारेण गृहीता शिक्षा काम धनबलयो प्राप्ते साधन भवतु, परन्तु नहि मनुष्यस्तद्द्वारा वास्तविकदृष्ट्या सामाजिकीं वैयक्तिकी वा शान्तिमाप्तु शक्नोति। तद्भावभावितो हि नरः सत्यस्य, आत्मसयमस्य, स्वदेशस्य, स्वधर्मस्य, स्वजाते, स्वसस्कृतेश्च गौरवमयीर्भावना उपेक्ष्य परेषा चाटुकारिता प्रवञ्चना चाप्यङ्गीकरोति। अत एव शिक्षाया मौलिक लक्ष्यमस्मन्मत एतदेव

यत्तद्द्वारा मनुष्ये स्वकीयजीवनस्यादर्शभावनाया कर्तव्य-बुद्धेर्वा उद्बोधनं भवेदिति। "धियो यो न प्रचोदयात्" (यजु० २२।९), "या मेधा देवगणा पितरश्चोपासते। तया मामद्य मेधयाग्ने मेधाविन कुरु स्वाहा॥" (यजु० ३२।१४) इत्यादिवैदिकमन्त्रेषु बुद्धिविषयिण्या प्रार्थनया उपरिनिर्दिष्टा आदर्शभावना कर्तव्याकर्तव्यबुद्धिरेव वा अभिप्रेयते। तस्या एवादर्शभावनाया निदर्शनमस्माकम्

अग्ने नय सुपथा राये युयोध्यस्मज्जुहुराणमेन ।

(यजु० ४०।१६)

(अर्थात्, भगवन्! वास्तविकैश्वर्यस्य प्राप्त्यै प्रेरय न. सत्यस्य मार्गेण गमनाय, आत्महानिकर पाप चास्मत्तो दूरीकुरु),

विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्र तन्न आ सुव॥

(यजु० ३०।३)

(अर्थात्, हे देव सवित! अस्माक पापान्यस्मत्तो दूरे गमय। यच्च कल्याण तदस्मानागमय)

इत्यादिवैदिकप्रार्थनासु दृश्यते।

आदर्शभावनाया उद्बोधन वै निखिलसात्त्विकप्रवृत्तिषु प्रगतिशीलनूतनताया समुत्पत्ते कारणम्। तस्या प्रकाशे हि मनुष्यस्वभावस्य निम्नप्रवृत्तीना विद्यमानता नैव सभवति। शनै शनै स्वयमेव ता विलीनतामुपयान्ति। आदर्शहीन जीवन पुनरन्धकारे

यात्रया समानम्, यस्यामवस्थाया मनुष्य, प्रगतेस्तु का कथा, स्वजीवनस्यापि रक्षायामसमर्थो भवति।

आदर्शभावनैव, व्यक्ते. समाजस्य च दृष्ट्या, जीवने वैषम्यस्य घातकद्वन्द्वानां वा अभावस्य स्पृहणीयाया अवस्थाया. प्राप्ते साधनम्। एतस्या एवावस्थाया नामान्तर वर्णाश्रमव्यवस्थेति न· प्राचीनशास्त्रेषु प्रसिद्धम्। यथा हि खलु व्यक्ते समाजस्य च पारस्परिकद्वन्द्वस्य समाधान वर्णव्यवस्था, एवं वै मनुष्यस्य विभिन्नाना तात्कालिकीनामैन्द्रियिकाणा च प्रवृत्तीना सामञ्जस्येन प्रगतिशीलतासपादनमेव आश्रमव्यवस्था।

व्यक्ते समाजस्य च, व्यक्तिगतविरुद्धप्रवृत्तीना च घातक-द्वन्द्व कस्याविदित मनीषिण। नून तस्य परस्परोन्नायकस्य जीवनप्रदसमन्वयस्य व्यवस्थायाश्च रूपेण परिवर्तन महानादर्श.। तस्यैव महत आदर्शस्य प्राप्तेरात्मनि योग्यतासम्पादन वास्तविकी द्विजत्वप्राप्ति। एतस्या एव द्विजत्वप्राप्तेरुद्देश्येन गुरुणोपनीता बालका प्राचीनकाले गुरुकुले निवास चक्रु।

शिक्षायां सामाजिकी दृष्टिः

अतश्च समष्टिदृष्ट्या समस्तस्य समाजस्य जाते राष्ट्रस्य वा हितभावनयैव शिक्षाया मौलिकेन लक्ष्येण भवितव्यम्। शिक्षाद्वारा भावनायामेतस्या प्रबुद्धाया लब्धभूमिकाया वा शिक्षितो जन कस्यामप्यवस्थाया वर्तमान—सोऽध्यापको वैद्यो

विधि(=Law)जीवी व्यवसाये रतो वा भवतु, अन्यो वा कश्चित्—देशस्य समाजस्य जातेर्वा हित न कदाचिदुपेक्षितु प्रभवेत्। वैदिकविवाहसस्कारे 'राष्ट्रभृद्' आहुतिभिर्वधूवरयोरेषैव राष्ट्रहितभावना दृढीक्रियते। तासामाहुतीनामेष एवाभिप्रायो यत्ताभ्या प्रतिज्ञातव्य यत्तयोर्वैवाहिकजीवनस्य लक्ष्य राष्ट्रहितस्य सपादनमेव भवेदिति।

साम्प्रतिकभारते विभिन्नसामाजिकवैषम्यै परम्परागतै-र्मिथ्यास्वार्थैरनुदारभावनाभिश्च अस्माकमार्यजातौ विशृङ्ख-लितायाम्, राष्ट्र समाज च प्रति समष्टिरूपेण हितभावनाया उद्बोधनस्य महती आवश्यकतेति कस्य तिरोहित विपश्चित। अतश्चास्माक शिक्षासस्थाभि स्वकर्त्तव्यत्वेन सर्वत प्रथममेतद्विचार-णीय यत्कथ नु भारतीयेषु नवयुवसु समस्त समाज जाति राष्ट्र च प्रति सत्या हितभावनोद्बोधयितु शक्यते, कथ तेषु एकस्या भारतीयजातेर्गर्व, यावद्भारतीयम् (भारतीयमात्रे) अकृत्रिम प्रेमा च सपादयितु शक्येते, कथ च परम्पराप्राप्तानामनुदारभावनाना विनाशकारिप्रभावात्तेषा रक्षा सभवतीति।

समष्टिदृष्ट्या शिक्षाया महत एतस्यादर्शस्यावहेलनया, लघ्वतिलघुसमाजेष्वेव मिथ्याजातिबुद्धिमाधाय, तेषामेव हित-साधन च प्रायेणात्मनो लक्ष्यत्वेन गृहीत्वा इयमस्माकं विश्व-विजयिनी आर्यजाति. पर शतेभ्यो वर्षेभ्य परेषा धिक्कारन्यक्कारयो पात्रीभूता घोरमपमानमसहिष्ट। तेषामेव कुसस्काराणा विषमयी

आत्मघातिनी प्रवृत्तिरद्यापि ता न मुञ्चति। तस्यैवैष प्रभावो यत्साम्प्रतिकशिक्षादीक्षिता अपि बहव प्रायेण तस्मिन्नेव कर्दममये कच्छे पतिता इव दृश्यन्ते। एष एव विषमय प्रभावो हिन्दुसमाजं जीर्णं शीर्णं च विदधाति। तस्य च दुष्परिणाम समस्तेन देशेन सुतरामनुभूयते।

शिक्षायां वैयक्तिकी दृष्टिः

व्यक्तिगतजीवनदृष्ट्यापि शिक्षाद्वारा आदर्शभावनाया उद्बोधनस्य सुतरामावश्यकता। व्यक्तिभिरेव समाजस्य निर्माणं भवति। एकैकया इष्टकया हि महान्त प्रासादा निर्मीयन्ते। अत शिक्षाया· साक्षादुद्देश्य तु व्यक्तिगतपरिष्कार एव। शब्दान्तरे, एतदेव 'चरित्रनिर्माणम्' इति व्यपदिश्यते।

कि पुनश्चरित्रनिर्माणमिति चेत्, उच्यते। मनुष्ये स्वजीवनादर्शस्य पूर्णं परिज्ञानम्, तस्मिन्नादर्शे निष्ठाविश्वासयो सद्भाव, कि च तस्यादर्शस्य प्राप्तावनुषक्ति पालने दृढता चेत्येतदेव चरित्रनिर्माणमिति मन्तव्यम्। अस्माकमादर्शेषु कार्येषु च यद्येकवाक्यता सामञ्जस्यं च न विद्यते, अस्माकमुपदेश आचारे च यदि विरोधो दृश्यते, यद्यल्पीयसापि बाह्येनाभ्यन्तरेण वा प्रलोभनेन, आलस्येन, सकटेन वा स्वकीयादर्शेभ्यो विचलिता वय भवाम·, तर्हि अस्माक शिक्षाया· कि मूल्य कश्चोपयोग ?

वैदिकविवाहसस्कारे सामाजिकादर्शभावनाया सद्भावविषय

उपरिष्टादुक्तमस्माभि । तथैव वैयक्तिकदृष्ट्यापि आदर्शभावनामभिलक्ष्यैव तस्मिन् सस्कारे जयाख्या आहुतयो विधीयन्ते। शारीरिकीमानसिक्यादिशक्तिभि सपन्नस्य दृढव्रतस्य सत्यनिष्ठस्य च जनस्य समक्ष जीवनस्य सर्वविधा बाधा नतशिरस्का जायन्त इत्येतमेवार्थ वधूवरौ बोध्येते ताभिराहुतिभि । स्पष्टमेव चायमर्थस्तत्र ।

प्रजापतिर्जयानिन्द्राय वृष्णो
प्रायच्छदुग्र पृतनाजयेषु ।
तस्मै विशः समनमन्त सर्वा
स उग्र स इ हव्यो बभूव ॥

(जयान् = जयसाधकान् मन्त्रान् विजयान्वा । पृतनाजयेषु = विरोधिशक्तीना जयनिमित्तेन। इन्द्राय वृष्णो = विजयशीलाय शक्तिसपन्नाय जनाय। प्रायच्छत् = प्रयच्छति। इ = च। हव्य = स्तुत्य) इत्यस्मिन् मन्त्रे प्रतिपाद्यते ।

सामाजिकजीवन वस्तुतः समुन्नत विधातुमस्माक व्यक्तिगतजीवने पवित्रता, सत्यता, कर्तव्यपरायणता इत्यादिगुणाना सद्भावस्यात्यन्तमावश्यकता। सा चैषाद्यत्वेऽदृष्टचररूपेणातिमहती। अस्माक सामाजिकजीवने तदाधारभूतानामेषामुदात्तगुणाना कियती आवश्यकता विद्यते, कियच्चोत्तरदायित्व तद्विषयेऽस्माकं शिक्षितानामित्यन्तरवेक्षणेन सर्वैरस्माभिरनुभवितुं शक्यते। एतेषां गुणाना विषये हि ग्रामीणाया अशिक्षिता,

याश्च जनताया मार्गप्रदर्शनमस्माक कर्तव्य विद्यते। तत्स्थाने तत्प्रतिकूलमेवोदाहरणमुपस्थाप्यतेऽस्माभि। तदेतद् दौर्भाग्यमस्मद्देशस्य।

शिक्षाया वैयक्तिकदृष्ट्या आदर्शभावनायाश्चरित्रनिर्माणस्य च याथातथ्येन लक्ष्यीकरणेनास्माकं गृहाण्येव शिशूनां कृते शिक्षामन्दिराणा स्थान ग्रहीतु शक्नुवन्ति। तस्यामवस्थाया देशस्य समक्षमुपस्थितस्य शिशुशिक्षालयाना 'मान्टेसरी' प्रभृतिपाठशालाना वा विषये आवश्यकस्य प्रश्नस्य प्रायेण बहुतिथ समाधान स्वत एव सजायते। वास्तविकशिक्षामवाप्नवतोर्मातापित्रो सम्पर्के गृहस्य पवित्रे वातावरणे वसता शिशूना कोमलहृदयेषु सच्चरित्रताया देशभक्तेश्च स्थायिन्या शिक्षाया. सुखेनैव बीजारोपण भवितुमर्हति। "मातृमान् पितृमानाचार्यवान् पुरुषो वेद" (अर्थात्, मनुष्यस्य वास्तविकी शिक्षा प्रशस्तेषु मातापित्रोराचार्यें चायत्ता भवति), "पितुर्दशगुणा माता गौरवेणातिरिच्यते" (अर्थात्, बालकस्य शिक्षाया पितुरपेक्षया मातुरत्युत्कृष्ट स्थान वर्तते) एतादृशा वैदिकादर्शाना सत्यता महत्ता च, शिक्षाया वैयक्तिकादर्शभावनायै चरित्रनिर्माणाय च समुचितस्थानस्य दानेन विना, नैवानुभवितु शक्यतेऽस्माभि.।

उपसंहारः

अतश्च भवत्वस्माक बालकाना कीदृश्यपि विशिष्टा शिक्षा, प र शिक्षाया वास्तविक्या सफलताया कृते आवश्यकमेतद् यत्तेषा

शिक्षाया सामाजिकदृष्ट्या वैयक्तिकदृष्ट्या च उपरिनिर्दिष्टाना-मादर्शभावनानामुद्बोधनस्य समुचितेन स्थानेन भाव्यमिति । वस्तुत शिक्षाया इयमेव मौलिकी भित्ति ॥

---

(३७)

भारतीयसंस्कृतौ स्त्रीजातेः स्थानम्

चिरकालिकराजनीतिकपारवश्यतमिस्रातमोऽपहृतदृष्टयो भारतीया मूढा इव परप्रत्ययनेयबुद्धयो प्रायेण भारतीयसस्कृते सर्वं स्वरूप-मन्यथाकार मन्यन्ते ।

भारतीयसस्कृतौ स्त्रीजाते कि स्थानमित्यस्मिन् विषयेऽपि तथैव बहूना मिथ्याप्रत्ययो विद्यते । स्त्रीजातेर्नैव विशेषत समाननीयं स्थानमासीद् भारत इत्येव तेशा विचार ।

नूनमेतद् भारतीयसस्कृतेरपरिज्ञानमूलकमित्येवानुपद प्रदर्श्यते ।

भारतीयसस्कृतिमनुशीलयता शेमुषीमता नाविदितमेतद् यद् भारतीयसभ्यताया प्रारम्भकालादेव साप्रतं यावद् , न केवल-मैतिहासिकदृष्ट्यैव, न केवल शास्त्रीयदृष्ट्यैव, किन्तु व्यवहारदृष्ट्यापि, सर्वदैव भारते स्त्रीजातिर्विशिष्टस्य समानस्य गौरवस्य च पात्रमासीद् वर्तते चेति ।

ऐतिहासिकदृष्ट्या तावत्—

वैदिकेषु ऋषिषु घोषा-विश्ववारा-लोपामुद्राप्रभृतीनामृषिकाणाम्, उपनिषत्सु गार्गीप्रभृतीना ब्रह्मवादिनीनाम्, महाभाष्यादिग्रन्थेषु च "काशकृत्स्निना प्रोक्ता मीमासा काशकृत्स्नी। काशकृत्स्नीमधीते काशकृत्स्ना ब्राह्मणी" (महाभाष्ये ४।१।१४), "उदमेघस्यापत्य गोत्र स्त्री औदमेघी। औदमेघ्याश्छात्रा औदमेघा." (महाभाष्ये ४।१।७८), "या तु स्वयमेवाध्यापिका तत्र वा ङीष् वाच्य। उपाध्यायी, उपाध्याया।", "आचार्या स्वय व्याख्यात्री" (सिद्धान्तकौमुदी) इत्यादिप्रमाणानामुपलब्धया स्पष्टमत्युच्चमासनमुद्घोष्यते प्राचीनभारते स्त्रीजाते।

शास्त्रीयदृष्ट्यापि, "जायेदस्तम्' (=जाया वै गृहमित्यर्थ, ऋ० स० ३।५३।४), "गृहिणी गृहमुच्यते", "मातृमान् पितृमानाचार्यवान् पुरुषो वेद" (शतपथब्रा०), "पितुर्दशगुणा माता गौरवेणातिरिच्यते", इत्यादीनि प्रमाणानि तामेव कथा कथयन्ति।

किञ्च, द्वन्द्वे पूर्वनिपातप्रकरणे "अभ्यर्हित च पूर्व निपततीति वक्तव्यम्" इति वार्त्तिकस्य "मातापितरौ' (महाभाष्ये २।२।३४) इत्युदाहरणेनापि पुरुषस्याप्यपेक्षया स्त्रिया विशिष्टगौरवास्पदत्व प्रतीयते। अत एव न केवल सस्कृतभाषायामेव किन्तु लोकभाषास्वपि 'राधाकृष्ण', 'सीताराम', 'गौरीशंकर,' 'पार्वतीपरमेश्वर'-इत्यादिसमस्तशब्देषु दृश्यमान स्त्रीनाम्न. पूर्वनिपात उक्तमेवार्थ समर्थयति।

अत्रैतदपि विभावनीयम् । वैदिकदेवतासु इन्द्रादिभि सहेन्द्राणी-प्रभृतिदेवपत्नीना सद्भाव, सर्वदेवसाधारणस्यापि 'देवता'शब्दस्य स्त्रीलिङ्गता, प्राकृतिकजगतस्तस्य तस्य विभागस्याधिष्ठातृशक्ते 'अधिष्ठातृदेवता' इति स्त्रीत्वविशिष्टाधिष्ठातृदेवतारूपेणावगति, अन्तत जगदात्मशक्तेर्नि शेषदेवगणशक्तिसमूहमूर्त्ते स्थितिसहार-कारिण्या विश्वेश्वर्या महाशक्तेरपि 'देवी'रूपेण िभावना च—सर्वमेतद् भारतीयसस्कृतौ स्त्रीजातेरनन्यसाधारणी समानभाव-नामेव ख्यापयति ।

व्यवहारदृष्ट्यापि, भारतीयसस्कृतौ मातृशक्तेर्विशेषत समान स्वाभाविक एवेति स्पष्टत प्रतीयते । "मातृवत् परदारेषु" इति नीतिकृद्भिरभ्युपगत सिद्धान्तो व्यवहारेऽपि परस्त्रीषु परदारिकासु च मात ! भगिनि ! पुत्रि ! इत्यादिशब्दान् प्रयुञ्जाने पामरैरपि जनैर्भारते वस्तुत परिपाल्यते । किं बहुना, विशेषतो भगवत्या सीताया देव्या द्रौपद्याश्चापमानपरिमार्जनार्थ ऽवृत्तयो रामायण-महाभारतयोर्निर्माणमपि उपर्युक्तसिद्धान्तनिदर्शनार्थमेव जातमिति मन्ये[१] ।

---

१ तथा च वाल्मीकिरामायणम् "काव्य रामायण कृत्स्न सीताया-श्चरित महत्" (१।४।७) । "पतिव्रताना नाकस्मात् पतन्त्यश्रूणि भूतले" (६।१११।६७) ।

ततश्च स्त्रीजाते समानभावना भारतीयसंस्कृते परम वैशिष्ट्य-मित्येव मन्तव्यम् ॥

---

(३८)

अस्माकं तीर्थानि

तीर्थेति शब्दो नानार्थ । तथा चामर "निपानागमयोस्तीर्थ-मृषिजुष्टे जले गुरौ" इति । कोशान्तरेषु पुनरन्येऽप्यर्था अस्य दृश्यन्ते । परमत्र प्रकृते नद्यादिसमीपस्थित पवित्रस्थानमेव तीर्थत्वेनाभिप्रेयते । तथा चोक्तम्—

यथा शरीरस्योद्देशा केचिन्मेध्यतमा मता ।
तथा पृथिव्या उद्देशा केचित्पुण्यतमा स्मृता ॥
प्रभावादद्भुताद् भूमे सलिलस्य च तेजस ।
परिग्रहान्मुनीना च तीर्थानां पुण्यता स्मृता ॥
(शब्दस्तोममहानिधि)

पृथिव्या सर्वत्र विभिन्नधार्मिकसप्रदायाना पवित्रतीर्थाना सद्भावाद् अस्माकमार्यधर्मावलम्बिनामपि तत्तत्सम्प्रदायभेदेन नैकतीर्थानि विद्यन्त इति सर्वथा स्वाभाविकमेव । अद्यापि पर सहस्रा भारतीया-श्रद्धया विश्वासेन च सह, नानाविधकष्टानि सहमाना अपि, प्रतिवर्षं तीर्थयात्रार्थं गच्छन्तीति महत सन्तोषस्य विषय ।

तीर्थयात्राया अनेके लाभा विद्यन्त इत्यन्यत्र प्रतिपादितमेवास्माभि । तथापि तेषा तीर्थाना विषये बहु वक्तुमवशिष्यते । तदेवात्र प्रपञ्च्यते ।

नून सर्वैरप्यस्माभिस्तीर्थमेक तीर्थद्वय वा तावद् दृष्ट भवेत् । तत्र तीर्थेषु गतवत प्राय सर्वस्यापि जनस्य मनसि विचार एष समुदेति यत्तत्तीर्थाना तीर्थत्वेन प्रसिद्धौ तत्रत्य प्राकृतिक रामणीयकमेव मौलिक कारण भवेदिति । तत्तत्स्थानाना तादृशीमलौकिकी शोभासपत्तिमालोक्यैव तदाकृष्टचित्तैरस्मत्पूर्वजैऋषिभिर्मुनिभिर्महात्मभिश्च वननदीपर्वतादीनामभ्याशे नून स्वकीया आश्रमा अस्थाप्यन्त । कालान्तरे तेषामेव तीर्थत्वेन प्रसिद्धिरभवत् । परमद्यत्वे हन्त ! तेषु प्राकृतिकदृश्येषु प्रायेण विद्यमानेष्वपि न तत्र तादृशमलौकिक रामणीयकमुपलभ्यते । गया-पुष्करेत्यादितीर्थेषु गतवता केन खलु नैनदनुभूत भवेत् ।

तीर्थानामभ्यन्तरभागे जनाकीर्णपथेषु मालिन्यम्, तत्रत्यजनताया अव्यवस्थितो निवासप्रकारश्च, सर्वथैव तीर्थाना पवित्रतारामणीकयोर्विरोधित्वेन, कस्य मनीषिणो मनो न कदर्थयति । जनताया दारिद्र्यमेवात्र प्रधान कारणमिति प्रायेण लोकप्रवाद । पर वस्तुतस्तु अद्यत्वेऽपि भारतीयेष्वस्मासु नागरिकताबुद्धे स्वच्छताभव्यताभावनयोश्चाभाव एव तत्र कारणमिति को नाम प्रत्यवतिष्ठेत ?

किञ्च, यद्यपि तीर्थेषु पराडाख्यतीर्थपुरोहिता सर्वत्रैव विद्यन्ते, यथाकथञ्चिच्च ते यात्रिणा मार्गप्रदर्शका अपि तत्र भवन्ति, तथापि सुदूरदेशदेशान्तरेभ्य आगतान् सर्वथा च तेषु प्रत्ययमादधतो यात्रिण प्रति तेषा व्यवहारो न तादृशो दृश्यते यादृशेन तेन भवितव्यम्। नाय विषयो बहु विवरणामपेक्षते। नानाविधकष्टजात सोढ्वा, प्रायेण महान्त धनव्यय च कृत्वा विभिन्नप्रदेशेभ्य श्रद्धावशादागताना यात्रिणा सभ्यै सुशीलैर्विश्वासभाजनै सच्चरित्रैर्विनम्रैश्च तीर्थपुरोहितै· सर्वथा साहाय्य विधेयमिति को नाम नानुमोदिष्यते।

अन्यच्च, अद्यत्वे हि परम्पराप्राप्तमैतिह्य तन्मूला च लोकाना तेषु पवित्रताभावना, एतावन्मात्र प्रायेण तीर्थाना सपत्तिरवशिष्टा। नैव तत्र प्राचीनकाल इव तप स्वाध्यायनिरतैर्दान्तै शान्तैश्च महात्मभिर्मनीषिभिश्च कृताधिवसतय आश्रमा विद्यन्ते, न चापि सुव्यवस्थितत्वेन विद्यमानमन्यत्किञ्चिदेतादृश सस्थान प्रायेणावलोक्यते यतस्तत्र गतवता यात्रिणा मन सु विद्याया ज्ञानस्य वा धर्मस्य वा कृते काचिद्विशिष्टा प्रेरणा प्रोत्साहन वा समुत्पद्येत। भवन्तु नाम कानिचिद्देवमन्दिराणि तत्र। तद्दर्शनेन च श्रद्धालुजनै काचिदाध्यात्मिकी शान्तिर्लभ्येत। परन्तु प्रायेण तेषु देवायतनेषु वास्तविक्याः स्वच्छताया भव्यतायाश्चाभावात् सामान्यजनताया, विशेषतश्च साम्प्रतिकविचारै· प्रभावितचेतसा सचेतसा, मन प्रसादो नैव जायते।

तदेतादृश्या हृदयावसादकर्यामस्माक तीर्थानामवस्थायां विद्य-

मानाया सर्वेषा तीर्थेष्वास्थावतामास्तिकजनाना गम्भीरविचारस्याय विषयो यत्कथ नु तेषा गैारवस्य मर्यादायाश्च रत्ता कर्तु शक्यते। अत्र विषयेऽस्माक मत तु एतद्यत् सर्वत प्रथम तत्रत्यनगरपालिका-नामेतदपरिहार्यत्वेन कर्तव्य भवेद् यत्तीर्थाना भव्यताया स्वच्छता-याश्च सवर्धनार्थं सर्वेऽपि समुचिता उपाया अवलम्बनीया इति।

अपि च, तीर्थपुरोहिताना न केवल नियन्त्रणमेव, किन्तु तेषु शित्ताया शीलस्य यात्रिण प्रति कर्तव्यपालनस्य सेवा याश्च बुद्धे समुत्पादनमपि, नगरपालिकाना शासनस्य च प्रधान कर्तव्यम्।

किञ्च, भारते धर्मप्राणजनतया विशेषत एतद्विभावनीय यत्प्रति-वर्ष धर्मस्य कृते दानादिरूपेण व्ययीक्रियमाणस्य कोटिकोटिधनस्य सदुपयोगस्तीर्थेषु ज्ञानस्य विद्याया धर्मस्य च प्रोत्साहनार्थं सुव्यवस्थिताना विविधसस्थानाना स्थापनाया सचालने चैव विद्यत इति।

नूनमेतेषामुपायानामवलम्बनेन तीर्थानि न केवल शरीरस्वा-स्थ्यस्य चित्तनिर्वृतेर्वा लाभार्थमेव, किन्तु घोरनास्तिकेष्वप्यास्ति-कताबुद्धे प्रचारार्थमपि, अद्वितीयसाधनानि भवितुमर्हन्ति॥

(३८)

सांप्रदायिक्यसहिष्णुता तत्प्रतीकारश्च

चिरकालादेव हि भारतवर्ष साम्प्रदायिकासहिष्णुताया जन्मभूमिरिव प्रतीयते। आर्यधर्मावलम्बिष्वपि पुनरतितरामुपलभ्यमाना सा कदर्थयति देशहितैषिणा चेतासि। 'वयमास्तिका यूय नास्तिका', 'वय वेदिका यूयमवैदिका', 'अस्माक सम्प्रदाय प्राचीनतमो युष्माक पुनर्नवीन, किञ्चित्कालादेव प्रचलित' इत्येव परस्परमधिक्षिपन्त साम्प्रदायिका केन न श्रुता भवेयु। तत्तत्सप्रदायनामोल्लेखपूर्वक तत्तत्सिद्धान्तखण्डनप्रवृत्ताना ग्रन्थाना नामसु 'मुखभङ्ग', 'कर्णामदनम्', 'मुखचपेटिका' इत्यादिपदविन्यासोऽपि तादृश्या एवासहिष्णुताया लज्जास्पद निदर्शनम्।

वर्तमाने काले समुन्नतदेशेषु तत्तदनुदारसाम्प्रदायिकभावनासु प्रतिदिनमुपक्षीयमाणास्वपि, अस्मासु भारतीयेष्वेष राष्ट्रियभावनाप्रशकरोऽसहिष्णुताया सद्भाव कस्य नाम देशहितैषिण आर्यधर्माभिमानिनो मनस्ताप न तनुते।

तस्या एतस्या असहिष्णुताया किं कारण कश्च तत्प्रतीकार इत्येतदेवात्र विचारविषय।

तदत्र आपातत परस्पर विरुद्धत्वेन प्रतीयमानेष्वपि शैवशाक्तवैष्णवजैनबौद्धप्रभृतिषु नानासप्रदायेषु एकसूत्ररूपेण

व्याप्ताया भारतीयमौलिकसस्कृत्या स्वरूपस्यापरिज्ञानमेव तस्या मुख्य कारणमिति सक्षेपेण वक्तु शक्यते। तत्स्वरूप चोपवर्णित-मुपरिष्टादस्माभि ।

अत्रैतदपि विभावनीयम्। इतिहासविदामतिरोहित यत्काल क्रमेण तत्तदवस्थावश्यकतानुरूप स्वभावत एव नूतना नूतना सम्प्रदाया सर्वेषु देशेषु प्रवर्तन्ते। परम्परागतमर्यादाया विरोधि-त्वभावना तेषु किञ्चित्कालपर्यन्तमेव जनताया जायते। किञ्चित्का-लातिपाते तु तेषा तस्यामेव मर्यादायामन्तर्भाव समावेशश्च प्राय सर्वत्र क्रियते। ततश्च साम्प्रदायिकी असहिष्णुता सर्वथा अवि-चारमूला। अत एव तत्त्वविदो विचारशीला विद्वास तेपु तेषु सम्प्रदायेषु व्यापिन्या एकस्या भारतीयसस्कृत्या भावनयैव भावितचित्ता उदारहृदया परस्पर सहिष्णुताभावस्यैवाभिवृद्धिम-भिवाञ्छन्ति।

अपर च। सम्प्रदायेषु परस्पर भेद प्रायेण तस्य तस्य तत्त्वस्य विषये साम्प्रदायिकपरिभाषाकृत एव भवति। एव चान्तत स भेदो भाषाया विलास एव पर्यवस्यति। यतो हि आध्या-त्मिकाना दार्शनिकाना च तत्त्वाना परिशीलने भाषा प्रायेण परिभाषारूपेणैव कार्यकरी भवति। यथा हि तत्तच्छास्त्रेषु व्यवहारसौकर्यार्थं पारिभाषिकशब्दाना कल्पना सकेतो वा क्रियते, तथैव खल्वाध्यात्मिके दार्शनिके च जगति शाब्दिकरूढीनामाश्रयेण तत्तत्प्रमेयाणा प्रतिपादन क्रियते। एव भाषा तत्त्वस्य स्वरूपे कमपि भेदमनादधती केवल तस्य विभिन्नपक्षानेव प्रतिपादयति। अतश्च "शब्दब्रह्मातिवर्त्तते" इत्यनुसार भाषाया स्तरम् (लोक, पदवीं वा)

अतिक्रान्तस्य तत्त्वदर्शिन स्थितप्रज्ञस्य दृष्टौ—वेदान्तस्य 'ब्रह्म'. नीति(=कर्तव्य)शास्त्रस्य 'सत्यम्', बौद्धदर्शनस्य 'धर्म.' (=धम्मो), मीमासादर्शनस्य 'कर्म', तन्त्रशास्त्रस्य 'शक्ति.', गीताशास्त्रस्य च 'अहम्' अथवा 'वासुदेव'—सर्वे एते पारिभाषिका शब्दा वस्तुत एकस्यैव मौलिकस्य तत्त्वस्य तत्तद्दृष्टिभेदेन प्रतिपादका ।

मनुष्येण रचिता हि भाषा, या हि

'वाग्वै मनसो ह्रसीयसी। अपरिमिततरमिव हि मन । परिमिततरेव हि वाक्" (शतपथब्राह्मणे १।३।६)

एतच्छ्रुत्यनुसार विचाराणा प्रकटीकरणार्थमपूर्णमेक साधनम्, स्वत सिद्धस्य मौलिकतत्त्वस्य प्रतिपादिकैव भवितुमर्हति, न तूत्पादिका ।

अत्रैते श्लोका भवन्ति—

यतो भूतानि जायन्ते यत्र तेषा लयो मत· ।
यदाश्रयेण तिष्ठन्ति तत्त्व तन्नित्यमव्ययम् ॥ १ ॥
भाषासीमामतिक्रम्य ज्ञानगम्य कथचन ।
स्वयम्भु, वस्तुतो नाम्ना रहित तद्धि वर्तते ॥ २ ॥
तन्नामविषये मन्दास् तत्तद्रूढिवशान्मुधा ।
विवदन्ते, तदाश्चर्यमुपहासकर महत् ॥ ३ ॥
नियतो विषयो वाचोऽनियतो मनसस्, तत· ।
ह्रसीयसी हि वागुक्ता मनसोऽपेक्षया श्रुतौ[१] ॥ ४ ॥

---

१ तथा च शातपथी श्रुति—"वाग्वै मनसो ह्रसीयसी । अपरिमित-तरमिव हि मन. । परिमिततरेव हि वाक् ।"

तत्त्व स्वभावत् सिद्ध गुणग्रामनिकेतनम् ।
गुणमेक समाश्रित्य पुनर्नाम प्रवर्तते ॥ ५ ॥
न विद्यते ततो नाम त्रिषु लोकेषु तादृशम् ।
तत्त्वोपवर्णने शक्त साकल्येन भवेत्तु यत् ॥ ६ ॥
अन्वर्थवाचक सर्व नाम तत्त्वस्य विद्यते ।
नैव रूढ, ततस्तेन विशेषगुण उच्यते ॥ ७ ॥
रुचिभेदाद्धियो भेदादथवा सप्रदायत. ।
तत्त्वस्य विषये दृष्टेर्भेद. समुपजायते ॥ ८ ॥
दर्शनानि विभिन्नानि सप्रदायास्ततोऽपरे ।
समुत्पन्नानि लोकेऽस्मिन् दृश्यन्ते यत्र तत्र वै ॥ ९ ॥
परिधानीयवस्त्राणा भोज्यानां चैव निश्चितम् ।
प्रकारेषु महान् भेदो देशभेदेन दृश्यते ॥ १० ॥
तत्तत्कारणसत्त्वेऽपि तत्र भेदे, न मौलिक. ।
अभिप्रायो मनुष्याणा भेदमापद्यते क्वचित् ॥ ११ ॥
रुचकादिप्रकारेण भिन्नाकारानुपेयुष ।
सुवर्णस्य सुवर्णत्व हीयते न कदाचन ॥ १२ ॥
एव सत्यपि दृष्टीना विभेदे दर्शनादिषु ।
तत्त्व स्वरूपत. स्थायि कूटस्थं चैव वर्त्तते ॥ १३ ॥
एकस्यैव प्रमेयस्य परिभाषान्तर यथा ।
क्रियते शास्त्रभेदेन तथा तत्त्वेऽपि दृश्यताम् ॥ १४ ॥
सत्य ब्रह्म पर धाम कर्म 'धम्म' प्रजापति. ।
शक्तिर्माता शिवो विष्णू राम ओंकार एव च ॥ १५ ॥

प्रेमेत्यादि पद मूलतत्त्ववाचि न संशय ।
तदेव तत्त्वं गीतायामहशब्देन कथ्यते ॥ १६ ॥
(प्राज्ञगीताया)

सर्वमेतत्पश्यता वै मनीषिणा साम्प्रदायिक्यसहिष्णुता केवल मूर्खताया अज्ञानस्यैव च विजृम्भितम् ।

ततश्च राष्ट्रस्यैक्यमेकस्या भारतीयसंस्कृतेश्च भावनाया पुष्टि-मभिवाञ्छद्भि साम्प्रदायिक्यसहिष्णुता समूलमुन्मूलनीया ॥

---

(४०)

गीतायाः कर्मणो यज्ञस्य च स्वरूपम्

कर्तव्याकर्तव्यशास्त्र कर्मशास्त्र वा गीतेति प्रायेण सर्वसम्मत सिद्धान्त । तस्या एष एव विशिष्टप्रतिपाद्यविषयो यन्मनुष्येण कर्म, न केवल कर्तव्यबुद्ध्यैव अनासक्तबुद्ध्यैव वा, किन्तु ईश्वरार्पणबुद्ध्या अथवा भक्तिभावनयापि विधेयमिति । तथा हि

तस्मादसक्त. सतत कार्य कर्म समाचर ।
असक्तो ह्याचरन् कर्म परमाप्नोति पूरुष ॥
कर्मणैव हि ससिद्धिमास्थिता जनकादय । (३।१९-२०)
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ (९।२७)

एवमनासक्तबुद्धया तथेश्वरार्पणबुद्धया विहितस्य कर्मणो महिमा गीतायामसकृद् वर्णित । किञ्च,

सहयज्ञा· प्रजा. सृष्ट्वा पुरोवाच प्रजापति ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥ (३।१०)
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नाय लोकोऽस्त्ययज्ञस्य कुतोऽन्य कुरुसत्तम ॥ (४।३१)

एव यज्ञस्यापि गुणगरिम्णो भूयो भूय सकीर्तन तत्र क्रियते ।

परतु गीताया मौलिकसिद्धान्तो याथार्थ्येन बुद्धयारूढो भवेदित्येतदर्थं कर्मणो यज्ञस्य च वास्तविकस्वरूपस्यावबोधोऽत्यन्तमावश्यक । शब्दविषयकरूढिवादस्य प्रभावेणैव तपोदानदयास्वर्गवर्णश्रद्धाप्रभृतिशब्दानामिव कर्मयज्ञेतिशब्दयोरप्यर्थविषयेऽस्माक समाजो वास्तविकताया अतिदूर नीतो वर्तते। अस्माक धर्मशास्त्राण्यपि नात्र विषयेऽपवादा· । रूढिमूलकस्यैतस्यैव परम्पराप्राप्तस्य भ्रमस्यापाकरणार्थं गीताया श्रद्धादानतप.-प्रभृतिशब्दै सह कर्मयज्ञेतिशब्दयोरपि वास्तविकमर्थं स्पष्टयितु सुमहत् प्रयतितम् ।

तत्र कर्मविषये गीता स्पष्टमुद्घोषयति—

कि कर्म किमकर्मेति कवयोऽप्यत्र मोहिता· । (४।१६)
अर्थात्, कर्मणोऽकर्मणश्च वास्तविकस्वरूपस्यावगमे कवयो विद्वासोऽपि भ्रान्ता दृश्यन्ते, सामान्यजनाना तु का कथा ।

सामान्यरूपेण कर्मशब्दो यज्ञादिकर्मकाण्डस्य देवार्चनादि-

कर्मणो वा वाचकत्वेनैव गृह्यते। परन्तु गीताया यस्य कर्मण स्वरूप विचार्यते तेन तु जीवनस्य विभिन्नक्षेत्रेषु पितापुत्र-जायापति-गुरुशिष्य-सेव्यसेवक -नागरिकतादिसासारिकसंबन्धै प्रेरितेन मनुष्येण क्रियमाणाना सर्वविधकर्मणा सग्रहोऽभीप्सित । यज्ञादिकर्मकाराड तु तस्यैव व्यापकजीवनस्य साधन-रूप. सभार, अथवा प्रतीकमेव। ,यथा हि वै स्वल्पकालमपि प्रत्यह कृत शारीरिको व्यायामो यावद्दिवस कर्मकरणाय शरीरस्य स्वास्थ्यसरक्षणद्वारैवोपयोगी, एवमेव खलु सर्वस्यापि धार्मिक-कर्मकाराडस्योपयोग साफल्य च मनुष्यस्योच्चभावनाना परिपुष्टौ तद्द्वारा च जीवनस्य पवित्रतासच्चरित्रयो सपादन एव विद्यते। एतादृश्या भावनया विरहित हि कर्मकाराड देवार्चनादि वा, स्वयमेव जीवनस्य लक्ष्य सत्, बाहुल्येन दम्भमानलोभपाषराड-परप्रतारणाभावै सचालितम्, शनै शनैरादर्शहीनजटिल-क्रियाकलाप-रूपेण च परिणमत्, व्यक्तिगताना समाजगताना वा उदात्तभाव-नाना नैतिकतायाश्च नैव परिपोषक भवितुमर्हति, किन्तु घातकमेव सजायते। तस्यामवस्थाया हि किञ्चिन्मात्रेणैव पूजापाठादिना मनुष्य कृतकृत्यतामासादयितु शक्नोति, तस्य प्रात्यहिकजीवनस्य कर्तव्यकर्मणामाध्यात्मिकेन नैतिकेन वा जीवनेन नहि कोऽपि सबन्ध इत्येष विचार एव जनताया सजायते। एतादृशमेवादर्शहीन यज्ञादिकर्मकाण्ड गीताया तामसत्वेन राजसत्वेन वा वर्ण्यते, नैक-प्रकारेण च तस्य भर्त्सना क्रियते। एतादृश एव निरुद्देश्यके कर्म-काराडे रताना विषय उच्यते—

नैन छन्दांसि वृजिनात्तारयन्ति
मायाविन मायया वर्तमानम् ।
नीड शकुन्ता इव जातपक्षाश्
छन्दांस्येन प्रजहत्यन्तकाले ॥
(विदुरनीतौ ३।४२)

सर्वस्यापि, लौकिकस्य धार्मिकस्य वा, कर्तव्यस्य कर्मणो महत्त्व केवल तस्मिन् कर्मणि प्रवृत्तस्य मनुष्यस्य भावनाधीनम् । कर्म-करणे प्रवृत्तो हि मनुष्यो विद्वान् वा, पण्डितो वा, ब्राह्मणो वा, सपत्तिशाली वा, साधारणातिसाधारणकार्यकर शूद्रो वा, 'हरि-जनो' वा भवतु, तस्योच्चताया नीचतायाश्च निर्णयो गीतयैतयैव दृष्ट्या विधास्यते । नून धर्मव्याधादिकथानामस्मत्पुराणादिसाहित्य उपवर्णितानामेष एवाभिप्राय ।

समानैव कथा यज्ञशब्दस्यापि वर्तते । तस्यापि वास्तविकमर्थं विस्मृत्य वय चिराय सकुचित एवार्थे तस्य प्रयोग कुर्म । अग्नावा-हुतीना प्रक्षेप एव नहि तस्य मौलिकोऽर्थ । वास्तविकयज्ञभावनायाः समयभेदेन केवलमेकं प्रतीक तत्काम भवतु । यज्ञस्य नानाभेदान् प्रदर्शयन्ती गीतैव स्वयमाह—

दैवमेवापरे यज्ञ योगिन' पर्युपासते ।
ब्रह्माग्नावपरे यज्ञ यज्ञेनैवोपजुह्वति ॥
श्रोत्रादीनीन्द्रियाण्यन्ये सयमाग्निषु जुह्वति ।
शब्दादीन् विषयानन्य इन्द्रियाग्निषु जुह्वति ॥

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते॥
द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः॥
अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः॥
अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति।
. . . .
एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे॥
(४।२५-३०, ३२)

अल्पज्ञस्य स्वभावत इन्द्रियपरायणस्य तथा स्वार्थसाधने तत्परस्य मनुष्यस्य स्वकीयनिम्नप्रवृत्तीनां विजयोद्देश्येन जगतः पोषणकर्त्रीभिः स्वभावतः परार्थप्रवृत्ताभिर्दैवीभिः शक्तिभिरथवा दैव्या शक्त्या स्वसंपर्कस्य स्थापनमेव यज्ञस्य वास्तविकोऽर्थः।

"यज देवपूजासंगतिकरणदानेषु" इत्येषामर्थानामप्यत्र संगतिः संजायते। दानेन खलु महत्या शक्तेः समक्षमात्मनः समर्पणमेवाभिप्रेयते। उपर्युक्तसंपर्कश्च निःस्वार्थलोकसेवाद्वारैव स्थापयितुं शक्यते। अयमेवार्थो गीतायामेवमुपवर्ण्यते—

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥

देवान् भावयतानेन ते देवा भावयन्तु व ।
परस्पर भावयन्त श्रेय परमवाप्स्यथ ॥ ३।१०–११

ऐतरयब्राह्मणादिग्रन्थेषु अस्मिन्नेवार्थे 'भावनायज्ञ' इति शब्द प्रयुक्तो दृश्यते । भवति चात्र श्लोकः—

भावनाकुसुमैरीडे तत्तेज शाश्वत महत् ।
सवितृरूपेणात्मा वै जगतस्तस्थुषश्च यत् ॥
(प्राज्ञगीताया) ।

एतादृशेन हि यज्ञेन गीताया मतेन

भोक्तार यज्ञतपसा सर्वलोकमहेश्वरम् । (५।२९)
श्रेयान् द्रव्यमयाद् यज्ञाज् ज्ञानयज्ञः परन्तप । (४।३३)

इत्यनुसार यज्ञतपसा भोक्तुर्भगवत परमेश्वरस्य भक्ति पूजा च कर्तु शक्येते । वस्तुतस्तु गीतानुसार कर्तव्यबुद्धया ईश्वरार्पण-बुद्धया च कृत कर्मैव तात्त्विको यज्ञ ॥ॐ

———

१ प्रबन्धप्रकाशस्य द्वितीयभागे प्रकाशिताद् "भगवद्गीताया. स्वरूपम्" इत्याख्यनिबन्धादुद्धृतोऽयं लेख. ।

(४१)

*जैनविद्वांसः संस्कृतसाहित्यं च ।

संस्कृतभाषाया अभ्युन्नति कथं भवेदित्येष विचारोऽद्यत्वे सर्वेषा सस्कृतभाषानुरागिणा मन सु जागर्त्ति। नानादृष्टिभिरस्य प्रश्नस्य विषये विचार कर्तुं शक्यते। परन्नात्र तदवसर । केवलमेकामेव दृष्टिं पुरस्कृत्य किंचिदत्र विचार्यते। सा चेय यत्सस्कृतभाषानुरागिभि सस्कृतस्य पठनपाठनविषये साप्रतिक्या विचारसकीर्णताया परित्यागो विधेय । अन्यथावनतिगर्ते पतिता जीर्णशीर्णशरीरा सा सस्कृतभाषास्मिन् सर्वथाननुकूले काले कदाचिदपि भूयोऽभ्युन्नतिमुखी भविष्यतीति दुराशामात्रमेव ।

भारतीयार्यधर्म इव सस्कृतभाषापि सर्वेषामप्यस्माकमार्यधर्मावलम्बिना वरिष्ठ शेवधिर्गर्वस्य च विषय । एको हि आर्यधर्मवृक्षोऽसख्यशाखाप्रशाखारूपेणातिविस्तृत "सहस्रशीर्षा पुरुष सहस्राक्ष· सहस्रपात्। स भूमिं सर्वत स्पृत्वात्यतिष्ठद् दशाङ्गुलम्॥" (यजुर्वेदे ३१।१) इत्यादिश्रुतिभिर्गीयमानविराटपुरुष इव, नानारूपै पल्लवित पुष्पित फलितश्च साम्प्रतं समन्ताद्भारतभूमिमल करोति। एतदृदृष्ट्या हि सोऽपि "एकोऽश्वत्थ· सनातन" (भग-

---

* जैनाचार्यात्मानन्दजन्मशताब्दीस्मारकग्रन्थादुद्धृतो ग्रन्थकृतो लेख ।

वद्गीतायाम्) इत्येव वर्णयितु शक्यते। शैव-वैष्णव-जैन-बौद्ध-सिक्खप्रभृतय सर्वेऽपि भारतीयधर्मास्तस्यैव शाखाप्रशाखा-रूपाः। भारतीयसस्कृतीत्यपरनामा एक एव जीवनरसस्तान् सर्वानाप्याययति परिपोषयति च, तेषा सर्वेषामन्यधर्मेभ्य किञ्चिदनिर्वचनीय वैशिष्ट्य च सपादयति।

तस्य खलु भारतीयसस्कृतीत्यपरनामधेयस्य भारतीयजीवना-यामृतकल्पस्य जीवनरसस्य सर्वकामदुघा दोग्ध्रीवेयमस्माक मातृरूपा देववाणी। अत एव तस्या परिपोषणेनैव भारतीय-सस्कृते परिपुष्टि, तदनुयायिना सर्वेषामार्यधर्मावलम्बिनामस्माक सर्वाङ्गीणा समुन्नतिश्च सभवति।

कस्यैतदविदित यत्प्राय सर्वेषामप्यार्यधर्मावलम्बिना धार्मिक साहित्य प्राचुर्येण सस्कृतभाषाया वर्तते। प्राय सर्वेषामप्यार्य-धर्माणामनुयायिभिराचार्यैरस्या साहित्यभाण्डारस्य परिपूर्त्ति प्राचीनकालादेव कृतास्ति। ततश्चास्याः समुन्नतिविषये सर्वैरप्यार्य-धर्मानुयायिभि प्रयत्नो विधेय इत्यर्थादापद्यते।

तत्र सस्कृतसाहित्यस्याभिवृद्धये जैनधर्मस्याचार्यवर्यैर्यत्कृत न तत्कस्यापि तिरोहितम्। स्वसप्रदायपरिपुष्ट्ये यत्तावत् तेषा दर्श-नादिविषयकमत्यद्भुतं विपुल च वाङ्मयं तत् सहसैव तात्त्विक-विदुषा साधुवादानामभ्यर्हणायाश्च पात्रम्। तदाधारेण परस्परस्पर्ध-येव समुन्नतमन्यदपि नो दर्शनशास्त्र परम्परया तद्दणि। नात्र तद्विषये किञ्चिद्वक्तुमभीप्सितम्। परन्तु सामान्यसाहित्यविषयेऽपि

जैनाचार्यैं सस्कृतभाषाया यन्महदुपकृत तदपि अत्यद्भुत सर्वथा प्रशासास्पद च ।

व्याकरणविषय एव तावत् कस्याविदित यन्माधवाचार्यहरदत्त-मिश्रकैयटसदृशाना वैदिकधुरन्धराणामपि चिराय बहुमता काशिकेति सुप्रथिता अष्टाध्यायीसूत्रवृत्तिर्वामनजयादित्ययोर्जैनाचार्ययोरेव कृति । सुप्रसिद्धा न्यासेतिनाम्नी तट्टीका च जिनेन्द्रबुद्धेर्जैनाचार्यस्यैव कृति । दिगन्तविश्रान्तकीर्त्तेः श्रीहेमचन्द्राचार्यस्य कृतेर्हैम-चन्द्रशब्दानुशासनस्य वा नाम केन न श्रुतम् ?

कोषविषयेऽपि अर्वाचीनाना नानाकोषानामुपजीव्यस्य दिष्ट्या साम्प्रतमपि सस्कृताध्येतृभि सबहुमानमनवरतमभ्यस्यमानस्य अमर-कोषस्य जैनाचार्यकर्तृकत्व कस्याविदितम् ? श्रीहेमचन्द्राचार्यविर-चिता वा नानाकोषा केन न श्रुता ?

गद्यपद्यकाव्यविषयेऽपि मान्यैरुदात्तचरितैर्जैनाचार्यैं प्रणीतानि "आत्मानुशासनम्", "धर्मशर्माभ्युदय", "सुभाषितरत्नसदोह", "क्षत्रचूडामणि", "विदग्धमुखमण्डनम्", "यशस्तिलकचम्पू", "जीवन्धरचम्पू" इत्यादीनि शब्दसौन्दर्येण रचनाचातुर्येणार्थ-प्रौढ्या च विद्वन्मनास्यावर्जयन्ति । कादम्बर्यादिकाव्यनिबन्धाना जैनाचार्यकृतास्टीका अपि सर्वेषामतीवोपयोगिन्यः कैर्नाम नितरा नाद्रियन्ते ।

अलङ्कारशास्त्रेऽपि "अलङ्कारचिन्तामणि" प्रभृतयस्तेषा कृतयः कृतिना केन नाकर्णिता ?

तदेतेन दिङ्मात्रप्रदर्शनेनैवानुमातु शक्यते यत्सामान्यसाहित्य-विषयेऽपि जैनाचार्यै कीदृशी सस्कृतभाषाया सेवा कृता। तदर्थं हि ते सर्वेषामपि सस्कृतप्रणयिना धन्यवादार्हा ।

एव प्राचीनकालादेव सस्कृतभाषाया समुन्नतिविषयेऽस्माक पूर्वाचार्याणा सद्भावनया परस्पर सभूयैव कार्यकारिणामत्युदारा प्रवृत्तिरासीत्। सा चेय प्रवृत्तिर्भूयोऽपि यथा पुष्टि समश्नुते, यथा च सस्कृतपठनपाठनविषये विदुषा छात्राणा च विचारा संकीर्णता विहाय उदारता लभन्ते तथैवास्माभिरनवरत प्रयतनीयम् ॥

इति प्रबन्धप्रकाशस्य प्रथमभागे
निबन्धनिदर्शन नाम
द्वितीयोल्लास ॥

---

(१)

कृशे कस्यास्ति सौहृदम् ?

लोकवृत्तविद् प्राय सर्वस्यापि जनस्यायमनुभवो यद् दुर्बले कस्यापि सौहृदं न भवति। तथा चोच्यते—

वनानि दहतो वह्नेः सखा भवति मारुत।
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम्॥
अश्वं नैव गजं नैव व्याघ्रं नैव च नैव च।
अजापुत्रं बलिं दद्याद् देवो दुर्बलघातक॥

"तिमींस्तिमिङ्गिलो गिलति।'

"दुर्बलान् बलिनो भक्षयन्ति पीडयन्त्येष वै मात्स्यन्याय।"

नास्ति खलु जगति दुर्बलताया गुरुतरं पातकम्। अत एव मनुष्येण सर्वथा शक्तिसपन्नेन, बलवता, तेजस्विना, आत्मरक्षा-समर्थेन, शत्रुसाहेनारिमर्दनेन च भवितव्यमित्यसकृद् मन्त्रवर्णाना-माघोष। तथा हि—

तेजोऽसि तेजो मयि धेहि, वीर्यमसि वीर्यं मयि धेहि, बलमसि बलं मयि धेहि, ओजोऽस्योजो मयि धेहि, मन्युरसि मन्युं मयि धेहि, सहोऽसि सहो मयि धेहि॥ (यजुर्वेद० १९।९)

केनापि सह व्यवहारे तस्य पात्रत्वापात्रत्वविचार इव, अधिकारित्वानधिकारित्वविचार इव च, तद्विषये योग्यत्वायोग्यत्वविवेकोऽपि नितरामावश्यक॰।

एतदेव कारण यद् भारतीयशास्त्रेषु तदधिकारित्वानधिकारित्वविचारपुरःसरमेव स्वविषयप्रतिपादन क्रियते। ग्रन्थारम्भेऽपेक्ष्यमाणोऽनुबन्धचतुष्टयेऽधिकारिविचारोऽप्यन्तर्गच्छति।

कस्या अपि विद्याया अध्यापने शिष्यस्य योग्यत्वायोग्यत्वपरीक्षा अवश्य करणीया। सा च न केवल बुद्धिदृष्ट्यैव, किन्तु चरित्रदृष्ट्यापि। अत एवोच्यते—"नानुपसन्नाय (गुरुर्निर्ब्रूयात्)। अनिदंविदे वा। नित्यं ह्यविज्ञातुर्विज्ञानेऽसूया। उपसन्नाय तु निर्ब्रूयात्। यो वाऽलं विज्ञातुं स्यात्। मेधाविने तपस्विने वा" (निरुक्ते)।

न केवल विद्याया प्रदान एव, सामान्येन सात्त्विकदानमात्रस्य विषये पात्रत्वापात्रत्वविचार आवश्यक। तथा च स्मर्यते—

दातव्यमिति यद्दान दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दान सात्त्विक स्मृतम्॥ इति।

वस्तुतोऽयोग्याय अपात्राय वा वितीर्णा विद्या दान वा नैव कस्यापि श्रेयसे भवति। यथा पिपासिताय पानीय बुभुक्षिताय वा अन्नमेव वै पात्राय दत्तं दानं सफलम्। अन्यथा तु अन्धस्य दीप इव, बधिरस्य गीतमिव, महिष्याः पुरो वीणावादनमिव वा तन्निष्फलमुपहासास्पद च।

एव मेव कस्यापि कस्मिन्नप्यधिकारपदे नियोजने तस्य तद्वि-

षयकयोग्यताया विचार परमावश्यक.। तदभावे न केवल तस्य कार्यस्य व्यतीपात एव, किन्तु योजयितुर्वचनीयतापि भवति।

भवन्ति चात्र विषये नीतिविदामुक्तय·। तथा हि—

व्योमनि वास कुरुते चित्र निर्माति यत्नत सलिले।
स्नपयति पवन सलिलैर्य क्षुद्रे चरति सत्कारम्॥

तथा। न वेत्ति यो यस्य गुणप्रकर्ष
स तस्य निन्दा सतत करोति।
यथा किराती करिकुम्भजाता
मुक्ता परित्यज्य बिभर्त्ति गुञ्जाम्॥

ततश्च सत्यमेतद् यदनधिकारिणोऽयोग्याय वा कृतस्य प्रसादस्य तेन दुरुपयोग उपेक्षा एव वा क्रियते। न च तेन प्रसादकर्तुर्यश-प्राप्तिर्भवति॥

---

(७)

परीक्ष्यकारिणो हि कुशला भवन्ति

(चरके)

अथवा

संस्कृतज्ञेषु वस्तुतत्त्वज्ञानस्योपेक्षा

❀ कस्याविदितमेतद् यदद्यत्वे जगति येयमभूतपूर्वा नानाविधा

---

१ प्रबन्धप्रकाशस्य द्वितीयभागस्य पृष्ठानि ५२—५५ अत्र द्रष्टव्यानि।

समुन्नतिर्दृश्यते, नानारूपा आविष्कारगश्चानवरत क्रियमाणाः सर्वानाश्चर्यचकितान् कुर्वन्ति, विविधविद्यासंबन्धिविज्ञानाना च य समुत्कर्षो दृष्टिपथमायाति तस्य सर्वस्य मूलकारण तत्त्वज्ञानदृष्ट्या तत्तत्प्रमेयाणा वास्तविकी जिज्ञासा, "मूढ परप्रत्ययनेयबुद्धि" इत्यभियुक्तोक्त्यनुसार परम्परागताना तत्तद्विषयकविश्वासाना स्वयमनुभवेन प्रायोगिकपरीक्षापुर सर विनिर्णयस्य च प्रवृत्तिरेव विद्यते। सैषा प्रवृत्ति सुतरामासीदस्मद्देशेऽपि प्राचीनकाले। स्वानुभवेन प्रयोगपूर्वक च वस्तुस्वरूपविनिर्णयप्रवृत्तिकारणादेव प्राभवन्नस्मत्पूर्वजा नानाविधपदार्थविषयकपरिज्ञानपूर्णानि भारतीयनदीदेशनगरग्रामकूपारण्यप्रभृतिभूगोलेतिहासादिविशिष्टज्ञानपुर सर कौटिल्यार्थशास्त्र-पाणिनीयाष्टाध्यायीसदृशान्यसाधारणानि लोकविदितानि ग्रन्थरत्नानि निर्मातुम्। वैशेषिके, आयुर्वेदे, ज्यौतिषे, गणिते, अन्येषु चैवविधेषु प्रायोगिकपरीक्षणसापेक्षेषु शास्त्रेषु स्वानुभवेन वस्तुतत्त्वपरीक्षणपुर.सर या तेषा समुन्नतिरद्यापि सास्माक भारतीयाना गर्वस्यास्पदम्।

"परीक्ष्यकारिणो हि कुशला भवन्ति", "नापरीक्षितमभिनिविशेत", "सम्यक्प्रयोगनिमित्ता हि सर्वकर्मणा सिद्धिरिष्टा। व्यापच्चासम्यक्प्रयोगनिमित्ता" (इत्यादि चरके), "आप्त खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा। साक्षात्करणमर्थस्याप्तिस्तया प्रवर्तत इत्याप्त। ऋष्यार्यम्लेच्छाना समान लक्षणम्। तथा च सर्वेषा व्यवहाराः

प्रवर्तन्ते" (इति न्यायसूत्रवात्स्यायनभाष्ये शब्दलक्षणप्रकरणे), "मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन् को न ऋषिर्भविष्यतीति। तेभ्य एत तर्कमृषि प्रायच्छन्" (इति निरुक्ते)—सर्वाणि चैतानि प्रमाणानि तमेव पूर्वोक्तमर्थ द्रढयन्ति। कि बहुना, धर्मविषयेऽपि तेषामासीदिय धारणा यत्--

आर्ष धर्मोपदेश च वेदशास्त्राविरोधिना।
यस्तर्केणानुसधत्ते स धर्म वेद नेतर ॥

वस्तुत शब्दप्रमाणस्य प्रामाण्यमनुभवपूर्वकपरीक्षासहकृतमेवेति पूर्वनिर्दिष्टवात्स्यायनवचनेन "अनुभवेन वस्तुतत्त्वस्य कार्त्स्न्येन याथार्थ्यज्ञानवानाप्त " इत्याप्तलक्षणेन च प्रतीयते।

पर चिरकालादेवैषा स्वयमनुभवेन वस्तुतत्त्वपरीक्षणमुखी प्रवृत्तिस्तिरोहितेव सस्कृतज्ञेषु इति प्रतीयते। अद्यत्वे तु तस्या प्रतिकूला प्रवृत्तिरेव चरमा सीमा यातेति कस्याविदित भवेत्। भवतु नामावश्यकी शब्दैकप्रमाणपरता श्रुत्यादिविहितेषु पारलौकिकेष्वदृष्टेषु विषयेषु। परन्त्वनुभवगम्येषु प्रायोगिकपरीक्षणसहेषु लौकिकेषु विषयेषु तु सा सर्वथैवाक्षम्या।

वर्तमानकाले सस्कृतपठनपाठनपद्धतेरयमेको महान् दोषो यत्प्रथम तु छात्रेषु कस्मिन्नपि विषये स्वाभाविकविशिष्टजिज्ञासाबुद्धेरनुदय एव। उदयेऽपि अभ्यस्यमानग्रन्थप्रमाणबलादेव सबलात्कार तस्या उपशम क्रियते। अभ्यस्यमान-

ग्रन्थोक्ता पदार्थास्तात्तद्ग्रन्थेषु यथा प्रतिपादितास्तथैव वस्तुतत्त्व-ज्ञाननिरपेक्षया ग्राह्यन्ते। व्याकरणे उदाहरणरूपेणान्यथा वा समागताना शब्दाना केऽर्था, काव्यादिषूपवर्णिताना तत्त-त्पदार्थाना वा वस्तुतो लोके किं स्वरूपम्, पुराणेतिहासादिषु वर्णिताना पर्वताना देशाना नद्यादीना च वस्तुत कुत्र स्थिति कानि च तन्नामानि इदानीन्तने भारतेऽन्येषु वा देशेषु, ज्यौतिषे वा सविस्तरमुपवर्णिताना नक्षत्राणा वस्तुत खगोले कुत्र कीदृशी स्थितिरित्येवविधाना जिज्ञासानामनुदय एवाद्यत्वे सस्कृतज्ञेषु। उदयेऽपि कति नाम ता समाधातु प्रयत्नपरा दृश्यन्ते। दर्शन-शास्त्रेषु अशतोऽनूदितान् दर्शनान्तरपदार्थान् यथाकथञ्चित्प-ठित्वैव सन्तुष्टा नहि चेष्टन्ते केऽपि प्रायेण वस्तुतस्तत्तद्-दर्शनान्तरपदार्थैस्तान् सवादयितुम्।

सैषातिमात्र शब्दप्रमाणपरता अस्थाने प्रयुक्ता नून देववाण्या अवनतावेकतमद् मुख्य कारणम्। एषैवास्माक विश्वा-रसकीर्णताया नूतनविज्ञानाना सग्रहेऽनुदारताया अपि मुख्य कारणम्। "नीचादप्युत्तमा विद्याम्" इति वचने सत्यपि, भार-तीयज्यौतिषे यवनाचार्याणा, प्रासादनिर्माणविद्याया मया सुरादीना च प्रभावे स्पष्टेऽपि एषास्माकमनुदारता सर्वथैव गर्हणीया। उपरिनिर्दिष्टप्रवृत्तिवशादेव सस्कृतज्ञा अस्मिन्समुन्नतिमुखे काले असामयिका गण्यन्ते॥

---

(८)

अशनेरमृतस्य चोभयो-
र्वशिनश्चाम्बुधराश्च योनयः ॥

कर्तव्याकर्तव्यविवेकबुद्धिमपहाय केवलमवसरमपेक्ष्यैव कार्यस्य कर्तार प्रायेण मानवा लोके दृष्टिपथमायान्ति । चारित्र्यस्य दुर्बलतैव तत्र तेषामल्पसत्त्वाना कारणम् ।

ये पुनः शमिनो दान्ताशया जितेन्द्रियास्तपोधनास्ते वै तेषा मर्वथा प्रतिकूला । अम्बुधरा यथा सममेव वज्रस्य जलस्य च प्रभवा भवन्ति, तथैव शमिनोऽपि तपस्विनोऽशनेर्नाम कार्कश्यस्य दृढताया वा एवममृतस्य नाम मृदुताया सरलताया कारुण्यस्य वा स्थान भवन्ति । तेषु खलु गङ्गायमुनयो प्रयाग इव, अग्नीषोमयोर्ज्योतिष्टोमयाग इव वा मार्दवकठोरतयोरपूर्व सगमो दृष्टिपथमायाति ।

नेव ते स्वार्थलोलुपा । अत एव केवलमवसरवादिता नैव तेषु पद लभते । "अद्यैव वा मरणमस्तु युगान्तरे वा, न्याय्यात्पथ. प्रविचलन्ति पद न धीरा" इत्युक्त्यनुरूप कदाचिदपि चारित्र्यादविच्युतास्ते सर्वथा न्याय्यमेवाचरन्ति ।

साधारणलोकदृष्ट्या तेषा कार्येषु निष्ठुरताया कारुण्यस्य च परस्परविरुद्धत्वेन प्रतीयमान. सगमो वस्तुतो विरोधाभास एव,

यत एकस्या लोककल्याणभावनाया न्याय्याचरणप्रवणप्रवृत्तावेव वा तयोरुभयोरप्युद्गम ।

अयमेवार्थस्तैस्तै प्रकारैरभियुक्तोक्तिषु प्रतिपादितो दृश्यते। तथा हि—

दुर्गासप्तशत्यामेव तावद्भगवती महाशक्ति सबोध्य कथ्यते—

केनोपमा भवतु तेऽस्य पराक्रमस्य
रूप च शत्रुभयकार्यतिहारि कुत्र ।
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥

अपि च—

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थघोराणि तै रक्षास्मास्तथा भुवम् ॥

एव भगवतो रामस्य विषये भवभूतिरप्याह —

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणा चेतासि को हि विज्ञातुमर्हति ॥

अयमेवार्थ कालिदासेन दिलीपस्य वर्णन एवमुट्टङ्कितो दृश्यते—

भीमकान्तैर्नृपगुणै स बभूवोपजीविनाम् ।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णव ॥

इति ॥

---

(८)

अपथे पदमर्पयन्ति हि
श्रुतवन्तोऽपि रजोनिमीलिताः ।

यथा हि खलु दृश्यते लोके चक्षुष्मन्तोऽपि रजसा निमीलितनयना अन्धा इव अपथे पदमर्पयन्ति, एवमेव श्रुतवन्तोऽधीतशास्त्रा अपि अज्ञानविमोहितधियः कदाचिदकार्यमनुतिष्ठन्ति ।

"सत्यमेव देवा अनृतं मनुष्या" (शतपथब्राह्मणे),

यत्किं चेदं वरुण दैव्ये जनेऽ-
भिद्रोहं मनुष्याश्चरामसि ।
अचित्ती यत्तव धर्मा युयोपिम
मा नस्तस्मादेनसो देव रीरिषः ॥
(ऋ० ७।८६।५)

(चरामसि = चरामः । अचित्ती = अचित्त्या अज्ञानेन । धर्मा = धर्म, धारकं कर्म । युयोपिम = वयं विमोहितवन्तः । मा रीरिषः = मा हिंसीः ।),

"मज्जन्त्यविचेतसः ।" (ऋ० ६।६४।२१)

इत्यादिश्रुतिवचोभिरज्ञानवशान्मनुष्यस्य अकार्यकरणोन्मुखत्वमेव प्रतिपाद्यते । अयमेवार्थः

बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ।

इत्यादिप्रकारेण धर्मशास्त्रेषु यत्र तत्र निगद्यते ।

श्रुतवन्तोऽपि रजोनिमीलिता कथमपथे पदमर्पयन्तीत्येष एव प्रश्नस्तत्समाधान च यथा हृदयगमविधया भगवद्गीतायामुपलभ्यते तथान्यत्र प्रायेण दुर्लभमेव। तथा हि—

"अर्जुन उवाच।

अथ केन प्रयुक्तोऽय पाप चरति पूरुष।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजित ॥

श्री भगवानुवाच।

काम एष क्रोध एष रजोगुणसमुद्भव।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥
धूमेनाव्रियते वह्निर्यथादर्शो मलेन च।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥
आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।" इत्यादि।
(भगवद्गीताया ३।३६-३९)।

अत एव स्वचारित्र्यस्य कार्याकार्यविवेकबुद्धेश्च सरक्षणाय परिपुष्टतायै च मनुष्येण सततमप्रमत्तेन अमूढेन च भवितव्य-मित्यसकृत् प्रतिपाद्यते शास्त्रेषु। अत एव च आत्मपरीक्षणस्य अन्तरवेक्षणस्य वा अनल्प माहात्म्यमुद्घोष्यते वेदादिसच्छास्त्रेषु।

यस्तु विज्ञानवान् भवति समनस्क सदा शुचि।
स तु तत्पदमाप्नोति यस्माद् भूयो न जायते ॥
(कठोपनिषदि १।३।८)

कश्चिद्धीर प्रत्यगात्मानमैक्षद्
आवृत्तचक्षुरमृतत्वमिच्छन् ॥
(कठोपनिषदि २।१।१)

इत्यादिश्रुतीनामेष एवाभिप्रायो यदज्ञानवशाद्रागादिवशाद्वा आत्मनोऽकार्यकरणप्रवणता समीक्ष्य मनुष्येण सर्वदा स्वकीय-कार्याणां परीक्षणे सावधानेन अमूढेन अप्रमत्तेन च भवितव्यम् । आत्मपरीक्षणमन्तरवेक्षणं वा एवात्र प्रथमोऽभ्युपाय ॥

---

(१०)

स्त्री-शिक्षा

साम्प्रत जगति चिराय उपेक्षिताया स्त्रीजातेरुद्बोधनस्य शिक्षा-याश्च महान् प्रश्न । मानवजातेश्चतुरस्रसमुन्नतौ पुरुषाणां स्त्रीणां च परस्पर बुद्धिपूर्वकस्य सहयोगस्यापरिहार्यत्वेन आवश्यकता केन नानुभूयते। यथा एकेन चक्रेण रथस्य गतिर्न भवति, तथैव स्त्रीणां सहयोगेन विना सा समुन्नति साधयितु न शक्यते।

उक्तकारणादेव वर्तमानभारतेऽप्येष प्रश्नो जागर्तितराम् । तत्रास्मिन् विषये बहवोऽवान्तरप्रश्ना· समुत्तिष्ठन्ति ।

स्त्रीणां शिक्षायां आवश्यकताविषये दिष्ट्या नहि साप्रत कश्चि-द्विवाद· । "स्त्रीशूद्रौ नाधीयाताम्" एतादृशप्रमाणाभासेषु श्रद्धावतां

पण्डितमन्याना बाहुल्येन विलोप एव संजात. साप्रतिक-भारते ।

"मातृमान् पितृमानाचार्यवान् पुरुषो वेद", "सहस्र तु पितॄन् माता गौरवेणातिरिच्यते" इत्यादिप्रमाणानुरूप बालकाना बालिकाना च, विशेषत शैशवावस्थाया, शिक्षायै, गार्हस्थ्यकार्याणा सुचारुरूपेण सपादनार्थम्, अथ च गृहवातावरणे स्वर्गीयसुखशान्त्योरानयनाय स्त्रीणा शिक्षाया आवश्यकता प्राय सर्वैरप्यभ्युपगम्यते ।

तथापि, स्त्रीणा शिक्षा कथं भवेत् कीदृशी च भवेदित्यस्मिन् विषये विद्यते मतबाहुल्य विदुषाम् ।

सा शिक्षा कथ भवेदित्यस्मिन् विषये तावत् कन्याना कुमाराणा च सहैव शिक्षा भवेदित्येके मन्यन्ते । परस्पर समुचितसमानभावनाया पोषणार्थम्, स्वाभाविकसामाजिकजीवने चारित्र्यस्य दृढतायै च सहशिक्षाया उपयोगित्वमित्येव तै प्रतिपाद्यते । बाल्यकाले सहशिक्षाया कथचिदुपयोगित्वेऽपि तदनन्तर सा लाभापेक्षया सुतरा हानिकरी इत्यपर आतिष्ठन्ते ।

स्त्रीणा शिक्षा कीदृशी भवेदित्यस्मिन् विषयेऽपि वैमत्य विदुषा सलक्ष्यते ।

पुरुषाणा स्त्रीणा च कार्यकरणशक्तय. समाना इति तेषामधिकारा अपि समाना एव । अत एव जीवनयात्राया स्वकीयस्वाभाविक-

सत्प्रवृत्तीना समुचितविकासार्थ, तदर्थं चावसराणा समानत्वेन लाभार्थ, पुरुषाणामिव स्त्रीणामपि शिक्षाविषयक. कश्चिदपि प्रतिबन्धोऽत्राञ्छनीय इत्येव केचिन्मन्यन्ते शिक्षाविशारदा ।

अपरे पुनरेतन्नाभ्युपगच्छन्ति। तेषा चैष युक्तिवाद.। पुरुषाणा स्त्रीणा च तावत् प्रातिस्विको भेद केन न स्वीक्रियेत। प्रकृत्यैव तेषा प्रातिस्विक कार्य विभिन्नम्। अत एव नैव तेषामाधिकारिकसमानतया परस्परमविरोध स्थापनीय, किन्तु परस्परापेक्षावत्त्वेन। जाया लब्ध्वा हि आत्मन सपूर्णताया अनुभवो यथा पुरुषस्य भवति, एव वाव पति लब्ध्वा जायाया अपि। एतदेव तयो परस्परापेक्षावत्त्वम्। अयमेवार्थ "पुरुषो जाया वित्त्वा कृत्स्नतरमिवात्मान मन्यते" (ऐतरेयारण्यके १।३।५) इत्यनया श्रुत्या सुतरा प्रतिपाद्यते। एव चेत्, स्त्रीणा प्रातिस्विकीनां प्रवृत्तीना शक्तीना च विकास एव तासा शिक्षाया. प्रधान लक्ष्य भवेदित्येव तेषामभिप्राय ।

अनेनैवाभिप्रायेण श्रुतिराह "जायेदस्तम्" (ऋ० ३।५३।४) (=जाया इत् अस्तम्=जायैव गृह भवतीत्यर्थ)। लौकिका अप्याहु "गृहिणी गृहमुच्यते" इति।

ततश्च गार्हस्थ्यजीवनस्यैव दृष्ट्या स्त्रीणा शिक्षायास्तत्तद्विषयाणा च विचारो विधेय। नानाविधसंघर्षैर्नितरा विसष्ठुले विषमे च संसारे जीवन यापयता स्वकीयगृहाभ्यन्तरजीवन एव सुखशान्त्योराशा भवितुमर्हति। जीवनस्य यावान् काल. स्वगृहाभ्य-

न्तरे याप्यते जनेन न हि तावान् बाह्यससारे। बाल्यकाले च मातृसपर्केण बद्धमूला सस्कारा यावज्जीवन स्थायिनो भवन्ति। तदेव गार्हस्थ्यजीवनस्य सुमहद् माहात्म्यम्। तच्चान्तत- स्त्रीषु अवतिष्ठते। ततश्च तस्यैतस्य वैशिष्ट्यस्य रक्षा पुष्टिश्च यथा सपद्यते तादृशी एव शिक्षा स्त्रीणा विशेषतोऽपेक्षिता।

इत्येव 'स्त्रीशिक्षा' इति विषयो विशेषतो विदुषा विचारणामपेक्षते॥

---

(११)

भारतीयार्यधर्मस्य आशावादः

कस्यैतदविदित यदाशावाद एवार्यधर्मस्य मौलिक सिद्धान्त.। ओतप्रोत हि वैदिक वाङ्मयमाशावादस्य सिद्धान्तेन।

कृधी न ऊर्ध्वाञ्चरथाय जीवसे (ऋ० १।३६।१४) (अर्थात्, भगवन्! अस्मान् सफलजीवनयात्रायै समुन्नतान् विधेहि)।

विश्वदानी सुमनस. स्याम पश्येम नु सूर्यमुच्चरन्तम्।

(ऋ० ६।५२।५)

(अर्थात्, सर्वदैव प्रसन्नचेतस सन्तो वयमुद्यन्त सूर्य पश्येम)।

पश्येम शरद. शतम्। जीवेम शरद शतम्।
बुध्येम शरदः शतम्। रोहेम शरद· शतम्।

पूषेम शरद. शतम् । भवेम शरद शतम् ।
भूषेम शरद शतम् । भूयसी शरद शतान् ।
(अथर्व० १६।६७।१-८)

(अर्थात्, शत वर्षाणि ततोऽपि चाधिक काल यावद् वय पश्येम, जीवनयात्रा कुर्वीमहि, ज्ञान सपादयेमहि, उत्तरोत्तरामुन्नतिमाप्नुयाम, पुष्टि समृद्धिमैश्वर्य चाधिगच्छेम) ।

मनुष्यजीवने विद्युत सचारमिव नूतना स्फूर्तिमुत्पादयद्भिरेतादृशै प्राणसजीवनैर्वचनामृतरापूर्णमिव वै वैदिक वाङ्मयम् ।

ईश्वरप्रदत्तशक्तीना परस्पर सामञ्जस्येन विकास, तद्द्वारा च जीवनस्य सर्वाङ्गीणा सपूर्णता, एतद् वै मानवजीवनस्य प्रधान लक्ष्यम् । भगवता विश्वबन्धुना सृष्टमेतद्धि जगदस्माक तस्या सर्वाङ्गीणाया समुन्नते साधकमेव, न तु बाधकम् । अत एवार्यधर्मानुयायिनो जनस्य दृष्ट्या जीवनमेतत्प्रार्थनाया विषय, न तु ग्लाने । एषा चोदात्तभावना नून प्रकृतिनियमानुकूलं संयत जीवन यापयतो निष्पापस्य स्वच्छहृदयस्य च जनस्यैव सभवति ।

दौर्भाग्येण एतद्विपरीतमेव वृत्त चिराय दृश्यते भारतीयसमाजस्य । नैकशताब्दीतोऽन्धकारस्यावनतेश्च गर्ते पतितोऽय समाज खलु निराशावादसिद्धान्तै परिप्लुत । 'ससारोऽयमसार, सर्वथैव हेय, स्वप्न इव, पान्थशालेव वा विद्यते। तत्र वै अस्माक स्थितिर्नद्या निमज्जतो मनुजस्येव वर्तते। नूनमीश्वरेण स ससार केवल कारागारस्थानीयत्वेनास्मत्कृते विनिर्मित. ।' एतद्रूपैर्हि

निराशामयसिद्धान्तैर्भारतीयसमाजश्चिराय निरुत्साहो नि सत्त्वो निस्तेजस्कश्च सवृत्त ।

उपरिनिर्दिष्टसिद्धान्तै प्रभावितानामेव जनाना नून रौरवादिनरकाणा कल्पना। "मूर्ख कामी खलश्चाहम्" (="मै मूरख खल कामी"), तथा "ससारसागरस्येयं पार गच्छति नौर्यथा" (='नैया मेरी पार लगाओ") एतादृश्यो दैन्यभावनयोपेता प्रार्थनास्तस्या एव विचारधाराया प्रतीकम्।

ततश्चास्माक प्रथममेतत्कर्तव्य भवतु यद्वयमेन प्राणघानक नैराश्यवाद समूलघात निहत्य आशामयीभिरुदात्तभावनाभिरस्मत्समाजमापूरयेम। किञ्च

मह्य नमन्ता प्रदिशश्चतस्र (ऋ० १०।१२८।१)।

अहमस्मि सहमान उत्तरो नाम भूम्याम्

(अथर्व० १२।१।५४)।

एतादृशीनामुदात्तभावनानामनुरूपम्, न केवल समाजस्य यूनामेव, किन्तु प्रत्येक जनस्य समक्षं लक्ष्यमेतत्स्थापयेम यत् 'स्वकीयोन्नतिविरोधिनीनामखिलाना शक्तीना प्रवृत्तीना च निरासायैवास्माक जन्म, यस्यामपि दिशि अस्माकमुद्योगस्य गतिस्तस्यामेव नून विजयलक्ष्मीरस्मानुपैष्यति। वय खलु अमृतस्य ज्योतीरूपस्य परमात्मन पुत्रा., अत एव स्वकीयं जीवन प्रकाशमय कुर्वाणा वयमन्येषामपि जीवन प्रकाशमय करिष्यामः' इति। स एष भारतीयस्यार्यधर्मस्य आशावाद.॥

---

(१२)

अयोध्यापुरीवर्णनम्

समस्तेऽपि भारते पुण्यपुरीष्वेकतमा केन न श्रुता भवेदयोध्या नाम नगरी। भारतीयार्यधमस्य लालनपालनभूमे पवित्रस्योत्तर-प्रदेशस्यालकारभूतायास्तस्या सर्वोत्कृष्ट वैशिष्ट्य तु एतदेव यत्सा मर्यादापुरुषोत्तमस्य भगवतो रामचन्द्रस्य जन्मभूमिरिति। एतदेव तस्या आबालवृद्धम् आसेतुहिमालयम् आपूर्वापरसमुद्र च व्याप्तस्य पुण्यपुरीत्ययशस रापादकम्। एतत्कारणादेव भारतीय धार्मिक वाङ्मय तस्या गुणगणवर्णनाभिरापूर्णम्। अत एव च तत्त-त्प्रदेशेभ्य प्रतिवर्ष पर सहस्रा भारतवर्षीयास्तस्यास्तीर्थयात्रा कृत्वा धन्य पूत चात्मान मन्यन्ते।

दौर्भाग्येण राजनीतिकपरिवर्तनैश्चिराय राजनीतिकशक्त्या उपेक्षिता, अत एव च स्वकीयप्राचीनगौरवपदात्प्रच्याविता सा, प्राकृतिकदृष्ट्या सांस्कृतिकदृष्ट्या धार्मिकदृष्ट्या च, अद्यापि स्वकीय किञ्चिदनिर्वचनीय महत्त्वमावहति। तथा हि—

परितो हृद्योद्यानमालावलयिताया, अनेकैर्मनोहारिघट्टैरुप-शोभिताया रिङ्गत्तरङ्गाया पुण्यतोयाया सरय्वास्तटे सस्थिताया, सर्वर्तुसुखदायास्तस्या प्राकृतिकसुषमासपत्तेर्वर्णन पुनरुक्तिरेव।

परस्परश्रियमतिशयानैरिव विचित्रैरपि सचित्रैः शतशो रम्यातिरम्यैर्दिव्यदेवकुलैरलकृताया, सतत जनकनन्दिनीनन्दनस्य

राक्षसराजधूमकेतो ऋषिमुनिगणैरुपगीतगुणगरिम्णा पापशमनस्य भगवतो रामस्य गुणनाम्नो' कीर्तनैरापूरितदिगन्तराया, त्यक्तसर्व-स्वैर्विस्मृतससारसभारैरात्मारामै रामभक्तै साधुत्रयैरुपसेविताया, नानादेशीयै श्रद्धानिर्भरमानसैर्गृहीतमुनिव्रतैर्यात्रिनिवहैर्निचितप्रदेशा-यास्तस्या धार्मिकदृष्ट्या माहात्म्य नैव वर्णनामपेक्षते।

एव दर्शकाना हृदयेषु कामप्यपूर्वामवर्णनीया स्फूर्तिमुत्पादयाद्भि-रनेकैरितिहाससबद्धै प्राचीनस्थान सगताया, नानाविध-भोजनाच्छादनादिकष्टजात सहमानैरकिञ्चनैस्तपस्यामूर्त्तिभिर्विद्या-ध्ययनपरायणौ शतशश्छात्रै, भारतीयसस्कृतेरभिमान स्वधर्म-परायणता कर्मनिष्ठता आस्तिक्यबुद्धि शुचिता देवभक्ति इत्यादि-विशिष्टगुणान् बिभ्रद्भि. सततमध्ययनाध्यापननिरतैरध्यापकैश्चाध्या-सिताया', भारतीयपरम्परागतसस्कृते रक्षणबुद्ध्यैव धार्मिकवर्यैर्विद्या-दानार्थ सस्थापिताभि' पाठशालाभिर्विद्यालयैश्च मण्डितायास्तस्या. सांस्कृतिकं महत्त्वं सुतरा स्पष्टमेव।

सत्यप्येव तस्या साप्रतिकी परिस्थितिर्विवेचकाना मन सु काञ्चिद् व्यथा जनयति। नूनमरुन्तुदमिवैतद् वृत्त यत्परम्परा-प्रवाहबलादेव कथमपि नीयमान तस्या पूर्वोक्त सर्व महत्त्व सप्रति ह्रासोन्मुख जराजीर्ण च प्रतीयते। स्वराज्यलक्ष्म्याभिनन्दितेऽभिनवे भारते साप्रतिकजगत परिस्थितेरपेक्षया नून साद्य यावत् सर्वथोपेक्षितेव दृश्यते। तस्या अभिनवीकरणे नैव ज[illegible]तया नापि शासकै कश्चिद् दृष्टिलवोऽपि पात्यते। पर कस्यात्र सदेहो यत्तस्याः

सर्वं रूपमभिनवं परिष्कारं संस्कारं चापेक्षते। न केवलं तस्या बहिरङ्गरूपम्—तद्यथा वसतिः, मार्गा, गृहनिर्माणव्यवस्थेव वा—किन्तु तस्या अन्तरङ्गरूपमपि—तद्यथा देवकुलसंस्था, पाठशाला, विद्यालया, पीठानि, मठा वा—उपयोगिताया आकर्षकताया स्वच्छताया भव्यतायाश्च दृष्ट्या, जनतायै स्फूर्त्तिदात्री सर्वथा नूतना व्यवस्थामपेक्षते॥

---

(१३)

प्रगतिवादो रूढिवादश्च

कस्यापि मनुष्यस्य समाजस्य वा सर्वाङ्गीणाया समुन्नते पूर्णविकासस्य चात्यन्तं बाधिका प्रवृत्तिस्तस्य रूढिवाद एव। तस्य रूढिवादस्योत्पत्ते पुष्टेश्च कारणानि तान्येव येभ्य खलु निराशावादस्य प्रवृत्तिर्जायते। अवरुद्धोन्नतिविकासमार्गो हि जन समाजो वा स्वभावत एव नैराश्यवादेन आत्मन्यविश्वासेन च ग्रस्तो जायते। पादमात्रप्रचलन एव कदाचिन्मम गर्ते कूपे वा पतनं संभवतीति भयाद्भीतोऽन्ध इव स स्वस्थान एव स्थितिं वरं मन्यमान पदात्पदमपि प्रगतिं नैव करोति, रूढिवादस्य ग्राहेण वा ग्रस्तो जायते।

तद्विपरीतम्, यस्य जनस्य समाजस्य वा समक्षमुन्नतेर्मार्गा अनवरुद्धा प्रशस्ताश्च भवन्ति, आशायाश्च प्रकाशो विद्यते,

अत एव च य आत्मविश्वासेन समुपेत, नून स्वभावत एव स प्रगतिशीलो दृश्यते। कोऽपि चक्षुष्मान् प्रकाशस्य विद्यमानताया-मात्मविश्वासेन वै कुत्रापि स्वेच्छया गन्तुमर्हति। अत एव यथैव प्रगतिवाद प्रकाशस्य आशामयस्य विश्वासमयस्य च जीवनस्य लक्षणम्, तथैव खलु रूढिवादोऽन्धकारस्य नराश्योपेतस्य आत्म-विश्वासविरहितस्य च जीवनस्य प्रतीकम्। शब्दान्तरेषु, यथैव खलु रूढिवाद पृथ्व्या उदरे शिलीभूताना वृक्षादीनामिव निश्चेष्टाया जीवनरहितायाश्च स्थिते प्रख्यापक, तथैव प्रगतिवादो जीवनक्रियया सम्पन्नस्य सचेष्टस्य च प्राणिन स्थिते परिचायक।

अयमेव रूढिवादो भारतीयसमाजस्यात्यन्त महती समस्या। पादयोर्बद्धो निगड इव, एष एव समाजस्य नानारूपै प्रगतिमवरु-णद्धि। एतस्य हि दुष्प्रभाव, नितरा सूक्ष्मेणादृश्येन च प्रकारेण भयानका राजयक्ष्मकीटाणव शरीर इव, अस्माक समाजे प्रविष्टस्त जीर्ण शीर्ण च विधातु सद्यस्तत्परो विद्यते।

अस्य खलु प्रवृत्तिर्जीवनस्य विभिन्नक्षेत्रेषु दृश्यते। शब्दाना-मर्थविषये तावदयमेव रूढिवादस्तेषामन्तस्तलप्रवेशेऽस्माक बाधक, प्रायेण च मानसिकस्य पाषण्डस्य छद्मनश्च पोषको जायते। अयमेव मनुष्याणा हीनस्वार्थैर्निम्नप्रवृत्तिभिश्च प्रेरिताना कार्याणा वास्त-विक स्वरूपमाच्छाद्य जनताया प्रतारणायै आवरणायते। भक्ति, तप, दानम्, दया, यज्ञ, स्वर्ग, सन्तोष, श्रद्धा इत्यादिशब्दाना प्रयोगविषयको योऽय लोके विप्लवस्तस्य मूलकारणमेष शब्दगतो

रूढिवाद एव। भगवद्गीतायां यज्ञ तपो-दानादिविषये यदिद् सात्त्विकराजसतामसभेदप्रदर्शन तदप्यस्यैव रूढिवादस्य निराकरणाय प्रयत्न। प्रायेण जनैरनवगतमहत्त्वाया श्रीस्वामिदयानन्दाचार्यैर्निर्मिताया यज्ञ-स्वर्ग-नरक तीर्थादिशब्दार्थनिरूपणप्रवृत्ताया आर्योद्देश्यरत्नमालाया अपि वस्तुतोऽस्यैव शब्दगतरूढिवादस्य निरास एव प्रयोजनम्।

पूर्वोक्तस्य रूढिवादमूलकस्य मानसिकपाषण्डस्य च्छद्मनो वा कारणादेव नैक उद्भटा अपि विद्वास, भारतीयेतिहासस्य विभिन्नकालेषु, प्राचीनग्रन्थान् स्वसिद्धान्तानुकूल्येनैव व्याख्यातु सप्रयत्ना दृश्यन्ते। नूनमद्यत्वेऽपि विद्यत एव सा प्रवृत्तिरस्मद्देशे। एतदेव कारण यद्देशेऽस्मिन् विभिन्नकालेषु समाजस्य परिष्कार (=सुधार)-प्रगत्योरुद्देश्येन महापुरुषै प्रचालितान्यान्दोलनानि सम्प्रदायाश्च स्वप्रधानलक्ष्याच्च्युतानि रूढिवादस्य कृच्छ्रे पतितानि विनाशमगच्छन्। नैतत्तिरोहित प्राचीनस्य सामयिकस्य वा इतिहासस्य विशेषविदाम्।

रूढिवादिनामेष स्वभावो यत्ते, परभोजिनो वृक्षा वृक्षान्तराणीव, प्रगतिशीलान्यान्दोलनानि कथमप्यात्मसात्कृत्वा निष्प्राणता नि सत्त्वता चापादयन्ति। एतदर्थं च ते समाजे समादृताना शब्दाना भावनाना च रूपेण परम्परया समागताना रूढीनामेवोपयोग पूर्णत्वेनादृश्यविधयैव विदधति।

रूढिवादस्य पूर्वोक्ताभ्योऽदृश्याभ्यो घातकप्रवृत्तिभ्य आत्मन

स्वसमाजस्य च रक्षणार्थमैकान्तिकसत्यनिष्ठाया आत्मपरीक्षणस्य अमूढबुद्धेश्च सतत प्रयोगस्य महत्यावश्यकता। मनस्यन्यत्क्रियाया चान्यदित्येतद्द्वय येषामस्ति त एव वञ्चका 'द्वयाविन'[1] इत्येव वेदेषु गर्हणीयत्वेन प्रोक्ता ।

"मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन् को न ऋषिर्भविष्यतीति। तेभ्य एत तर्कमृषिं प्रायच्छन्" (निरुक्तपरिशिष्टे) इत्यत्र प्रतिपादितस्य तर्क एव ऋषि ' इत्येतस्य सिद्धान्तस्य वै उपयोगो न तावत्परषा सिद्धान्ताना खण्डनाय विधेयो यावदात्मन एव परीक्षणाय। आत्मपरीक्षण हि नाम मनुष्यस्य प्रथम समुन्नतेर्मूलम्। ऐकान्तिकी शब्दप्रमाणपरता वा, परम्परागना "अन्धेनैव नीयमाना यथान्धा" इत्येवरूपा अन्धभक्तिरेव वा रूढिवाद । अत एव स सर्वत प्रथम बुद्धेर्जडताया लक्षणम्।

तद्वैपरीत्येन, वेदेषु पुन "भद्रादभि श्रेय प्रेहि" (तैत्तिरीयसहिता १।२।३।३) (अर्थात्, हे भगवन् प्रापयतु भवान् न उत्कृष्टादुत्कृष्टतर पदम्), 'कृधी न ऊर्ध्वाञ्चरथाय जीवसे' (ऋ० १ । ३६ । १४) (अर्थात्, भगवन्, विधेहि न उन्नतान् प्रगतिशीलाश्च जीवनयात्रायाम्) इत्यादिमन्त्रै प्रगतिवादस्यैव गुणगान क्रियते।

---

१ तु० "त्व तस्य द्वयाविनोऽघशसस्य कस्य चित्" (ऋ० १।४२।४)। द्वयमस्यास्तीति द्वयावी द्वयवादी वञ्चक इति यावत्।

वेदेष्वसकृद् गीयमान आशावादोऽपि वस्तुत प्रगतिवादस्यैव रूपान्तरम्। स च जीवनस्य मुख्य लक्षणम्।

अतीतस्यैव चिराय गीतगानपरा वयमभूम। समयोऽय भविष्यस्य गीताना गानस्य। वास्तविकदृष्ट्या आदर्शो भविष्य एव तिष्ठति, नैवातीते। सभवति यदतीतस्य गीतगानेनास्माक जीवनस्य मन्दाया गतौ किमपि परिवर्तन न भवेत्। पर भविष्यस्य गीतगानमस्मदीयं जीवन स्फूर्तिमय विधास्यतीति नात्र सदेह। "परिमित वै भूतम् अपरिमित भव्यम्" (ऐ०ब्रा० ४। ६) (भव्य भविष्यमित्यर्थ) कथनमेतत्सुतरा सत्यमेव। वस्तुतस्तु अतीतस्य महत्त्व तावदेव यावत्तदस्माक भविष्यस्य निर्माणे साहाय्यकृत्। श्रेय प्रेयोमार्गयो रहस्यमस्मिन्नेव सिद्धान्ते निहितम्। यथा प्रेयोमार्गस्य सबन्धोऽस्माक जीवनस्यातीतकालसबन्धिनीभिर्भावनाभिर्भवति, तथैव श्रेयोमार्गस्य सबन्ध आदर्शै सह विद्यते। वास्तविकोन्नते रहस्य तूभयोरपि समन्वये सामञ्जस्ये च तिष्ठति॥

---

(१४)

गीताया भक्तेः स्वरूपम्

प्रायेण सर्वैर्भक्तिशास्त्रत्वेन समादृताया भगवद्गीताया भक्तिरिति शब्दस्यातिमहत्त्वम्। परमत्रावधीयता यद् भक्तिशब्दस्य

प्रचलितादर्थाद् गीताया भक्तिर्नितरा भिन्ना। गीतानुसार हि योऽसौ विश्वप्रपञ्चस्य सचालक सर्वेषा प्रेरक सर्वस्योत्तारको यज्ञ तपसामुपभोक्ता सर्वलोकमहेश्वरो भगवान् तस्य प्रीत्यर्थमेव कर्मकरण परमा भक्ति। तथा चोच्यते—

यत प्रवृत्तिर्भूताना येन सर्वमिद ततम्।
स्वकर्मणा तमभ्यर्च्य सिद्धि विन्दति मानव ॥

(गी० १८।४६)

एतदनुसार मनुष्यजीवनस्य सफलताया रहस्य कर्मद्वारा ईश्वरभक्तावेव विद्यते। उपयुक्त चैतत्, यतो व्यष्टेर्व्यक्तेर्वा कर्तव्यस्य समाप्ति पर्यवसान वा समष्ट्या सह तस्या सामञ्जस्य एवास्ते। एवप्रकारेण भक्तिवाद कर्तव्यबुद्धेरादर्शवादस्यैव वा परा काष्ठा। एष भक्तिवाद कर्तव्यबुद्धेर्भावनाया नूतनमाधुर्य-रसस्य सचार करोति। न हि तस्मिन्वर्तते कश्चिदवकाशो दैन्यस्य, आलस्यस्य, प्रमादस्य, अकर्मण्यताया वा। न स प्रकृते-र्विरुद्ध पुरुष स्त्रीवदाचरण शिक्षयति, नाप्यत्याचारिणोऽत्याचारस्य सहनमुपेक्षा वा। "वज्रादपि कठोराणि मृदूनि कुसुमादपि" इत्युक्ति-मनु नम्रताया. शौर्यस्य चादृष्टपूर्व सामञ्जस्यमत्र विद्यते। कि बहुना, गीताया भक्तिवादस्य दृष्ट्या स्वकर्तव्यपालनार्थ सर्वस्वमप्यर्पयन्तो महाराणाप्रताप गुरुगोविन्दसिह-प्रभृतयस्तादृशा एव भक्ता यादृशा गोस्वामी तुलसीदासो महात्मा नानक कबीरो वा।

गीताया भक्तेरादर्शमनुसरन् हि भक्त आशाया आत्मविश्वा-सस्य च प्रतिमूर्त्तिरेव भवति। महत्स्वपि सकटेषु समापतितेषु

उद्धरेदात्मनात्मान नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मन ॥

(गी० ६।५)

इति सिद्धान्ते विश्वसन्नविचलितधैर्य स तेषा स्वागतमेव करोति। तस्य मानसिकावस्थाया सुन्दर वर्णन गीतायामेव दृश्यते—

यदृच्छया चोपपन्न स्वर्गद्वारमपावृतम् ।
सुखिन क्षत्रिया पार्थ लभन्ते युद्धमीदृशम् ॥

(२।३२)

सुखदु खे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैव पापमवाप्स्यसि ॥

(२।३८)

वास्तवेन, गीताया एव प्रक्रियाया अनुसारेण यज्ञदानतप-आदिवद् भक्तिरपि सात्त्विकराजसतामसभेदेन त्रिविधेति व्याख्यातु शक्यते। तथा हि—

(१)

योऽन्तरात्मा जगत् साक्षी सृष्टवानिदमद्भुतम् ।
कल्याणार्थाय जीवाना, तत्प्रसादाय केवलम् ॥१॥
कर्तव्यमिति यत्कर्म क्रियते नियतात्मभि ।
सिद्ध्यसिद्ध्यो समैर्भूत्वा भक्ति. सा सात्त्विकी मता ॥२॥
मन.प्रसाद. सौम्यत्व समुत्साह स्वकर्मसु ।
श्रेयोऽभ्युदयसिद्धिश्च तस्या फलमिहोच्यते ॥३॥

(२)

सत्कारमानपूजार्थं प्रतार्य सकल जगत् ।
जीविकासाधनार्थं वा प्रेयोमार्गपरायणै. ॥४॥
लोकेशस्य प्रसादार्थमेवमुद्घोष्य सर्वत ।
क्रियते य समारम्भो भक्ति सा राजसी मता ॥५॥
दम्भो दर्पोऽभिमानश्च समुद्वेग· स्वकर्मसु ।
चित्तचञ्चलता चैव तस्या फलमिहोच्यते ॥६॥

(३)

समुत्सृज्य स्वक कर्म मोहालस्यपरायणै ।
कर्मण्यकर्म पश्यद्भिरकर्मणि च कर्म यत् ॥७॥
नाम्न सकीर्तनेनैव न तु कर्मसमाश्रयात् ।
पूज्यते भगवान्नित्य भक्ति सा तामसी मता ॥८॥
निरुद्यमा निरुत्साहा हीनसत्त्वपराक्रमा ।
अनार्यजुष्टमार्गस्था जायन्ते ता समाश्रिता ॥९॥

(प्राज्ञगीताया)

व्याख्या

जगत साक्षिभूतो योऽन्तरात्मा भगवानिदमद्भुत भुवन जीवाना कल्याणार्थमेव सृष्टवान् केवल तस्य प्रसन्नतायै कार्यस्य सिद्धिमसिद्धि च सम जानद्भि. सयतात्मभिर्यत्कर्म कर्तव्यमेतदिति बुद्ध्यैव क्रियते सा वै सात्त्विकी भक्तिरुच्यते । तया च भक्त्या मन.प्रसाद. सौम्यत्व स्वकर्मसु समुत्साहो नि श्रेयसस्याभ्युदयस्य च प्राप्तिरित्येतानि फलरूपेण भवन्ति ।

केवल स्वार्थसाधनतत्परैः, 'ईश्वरस्य प्रसन्नतायै एव कार्यमिद क्रियते' प्रत्यक्षत एव सर्वत्र घोषयित्वा, वस्तुतस्तु आत्मन एव सत्कारमानपूजार्थं जीविकाप्राप्त्यै वा, जगत्प्रतार्य यत्कार्यं क्रियते सा राजसी भक्तिरुच्यते। तया च मनुष्ये केवल दम्भस्य दर्पस्याभिमानस्य स्वकार्येष्वशान्तेश्चित्तचञ्चलतायाश्च वृद्धिरेव फलरूपेण दृश्यते।

कर्मण्यकर्मेति अकर्मणि च कर्मेति पश्यद्भिः, सर्वदा मोहालस्यपरैर्जनैः स्वकर्तव्यस्योपेक्षया केवल भगवन्नामसकीर्तनेन, न तु स्वार्थरहितकर्मद्वारा, यल्लोकेशस्य पूजा क्रियते सा तामसी भक्तिरुच्यते। तामसी भक्तिमाश्रिता हि जनाः निरुद्यमा निरुत्साहा हीनसत्त्वपराक्रमा अनार्यसेवितमार्गगामिनश्च जायन्ते।

तदेव भक्तेः सात्त्विकराजसतामसरूपेण विवेकः ॥

---

(१५)

जीवेम शरदः शतम्।
भूयश्च शरदः शतात्॥

(यजुर्वेदे ३६।२४)

आसीत् स समयो भारते यदा खलु, मातुरुत्सङ्ग गता शिशव इव, भगवत्याः प्रकृतिदेव्या क्रोडे क्रीडन्त इवास्माक पूर्वजा विधातुर्मूर्त्तं प्रसादमिव जीवनमिद मन्यमाना सततं सोल्लासहृदया

जीवनयात्रा कुर्वन्ति स्म। सव जीवनं तेषा कृते सगीतमयमिवासीत्।

अत एव

विश्व चिदायुर्जीवसे (ऋ० १।३७।१५) (जीवसे = जीवनार्थम्)।

भद्र जीवन्तो जरणामशीमहि (ऋग्० १०।३७।६) (जरणाम् = वृद्धावस्थाम्)।

मा भे, मा सविक्था (यजु० १।२३) (= त्व मा भषी। मा च त्वमुद्विग्नता यासी)।

अस्माक सन्त्वाशिष , सत्या न सन्त्वाशिष. (यजु० २।१०)।

भद्र भद्र न आभर (साम० पू० २।८।९)।

जीवा ज्योतिरशीमहि (साम० पू० ३।७।७)।

स नो जीवातवे कृधि (साम० उ० ६।२।११)।

तस्य नो धेहि जीवसे (साम० उ० ६।२।११)।

माता भूमि पुत्रो अह पृथिव्या (अथर्व० १२।१।१२)।

जीवेम शरद शतम्।
बुध्येम शरद शतम्।
रोहेम शरदः शतम्।
पूषेम शरद शतम्।
भवेम शरद. शतम्।
भूषेम शरद शतम्।
भूयसी शरद. शतात्॥

(अथर्व० १९।६७।२-८)

इत्यादिरूपाभिर्जीवनसंबन्धिनीभिरुदात्तभावनाभिरापूर्णं हि नो वैदिकं वाङ्मयम् ।

अत एव च "मह्य नमन्ता प्रदिशश्चतस्र' (ऋ० १०।१२८।१), "अहमिन्द्रो न परा जिग्ये" (ऋ० १०।४८।५) (न परा जिग्ये -- पराजय न प्राप्नोमि), 'अहमस्मि सपत्नहा, इन्द्र इवारिष्टो अक्षत" (ऋ० १०।१६६।२)", "जयेम स युधि स्पृध" (ऋ० १।८।३) (स्पृध = स्वकीयोन्नतेर्बाधकान् शत्रून्, बाधिका शक्तीर्वा) इत्यादिरूपास्तात्कालिकानामस्मत्पूर्वपुरुषाणा विजयिनामार्याणामोजस्विनो भावा अस्मान् अजय्येन उत्साहेन सपन्नान् विदधति ।

पर हन्त ! तदेव भारत किञ्चित्कालानन्तर विविधकारणवशादनार्यभावनाभि. परित समाक्रान्त बभूव । येन खलु पूर्वमुपवर्णिता जीवनसंबन्धिन्योऽस्माकमुदात्तभावना सपदि विपरीतता गता । तदानीन्तना एव 'असार संसार, सर्वथैव हेय, कारागारसदृशो बन्धस्थानम्, जीवन दु खमय क्षणभङ्गुर च' इत्यादिसदृशा हृदुल्लासहरा नैराश्यपूर्णा भावा अस्मत्समाज प्रायेणाकर्मण्यमुत्साहहीन कर्तव्यपराङ्मुख च विदधति । अत एव च

असारससारसमुद्रमध्ये
निमज्जतो मे शरण किमस्ति ?

इत्येव दैन्यभावनाभिर्भावित नो जीवन भार इव प्रतीयते ।

वस्तुतो जीवन प्रति एतादृश्या अनास्थाया प्रकटीकरणमात्म-

घातसदृशमेव। आत्मन उत्तरोत्तरोन्नतिर्विकासश्चैव सर्वेषामस्माक प्रथम लक्ष्यम्। तच्च जीवनेनैव साध्यम्। करुणावरुणालयस्य भगवतो जगदीश्वरस्यापि अस्या विविधसृष्टेर्निर्माणस्यायमेवाभिप्रायः। मा न भूव भूयासम्[१]–एतादृशी वै जीवनविषयिणी नैसर्गिकी आशी सर्वस्यापि प्राणिनः कस्य न विदिता। ततश्च जीवनविषयिणी अनास्था न केवलमात्मघातिन्येव, किन्तु प्रकृतेरपि विरोधिनी।

अत एव प्राचीना ऋषयो मुनय आचार्याश्च नानारसायनैर्योगाद्युपायैश्च दीर्घस्यायुष कृते सप्रयत्ना अभूवन्।

ततश्च आत्मन सर्वस्या समुन्नतेर्मूल जीवन प्रति अनास्थाया भावान् समूलमुन्मूलयित्वा आशामयभावनाया पुनरुज्जीवनमस्माक समाजस्य राष्ट्रस्य च मुख्यावश्यकता। तदत्र हृदयंगमतामापादनीयमधस्तन जीवनस्य संगीतकद्वयम्—

(१)

संयतस्व जीवनाय

प्राप्य मानवीयजन्म पुण्यकर्मसञ्चयेन।
दीनदु खिरक्षणेन सयतस्व जीवनाय ॥ १ ॥

---

१ तु० "सर्वस्य प्राणिन इयमात्माशीर्नित्या भवति—मा न भूवं भूयासमिति" (योगभाष्ये २।९)। भूयासम् = जीव्यासम्।

सत्पथानुवर्तनेन भव्यभावभावनेन ।
लोकशप्रसारणेन सयतस्व जीवनाय ॥ २ ॥
दैन्यभावभञ्जनेन धैर्यधर्मधारणेन ।
वीरतासमाश्रयेण सयतस्व जीवनाय ॥ ३ ॥

जीवन त्विद मुधेति
पामरा जना वदन्ति ।
नैव तत्तथा, ततोऽत्र
सयतस्व जीवनाय ॥ ४ ॥

(२)

जयन्ति के जना भुवि ?

परोपकारतत्परा स्वदेशभक्तिवत्सला ।
अमत्सरास्तथापि ये जयन्ति ते जना भुवि ॥१॥
उदात्तकर्मशालिनो न दैन्यभावधारिण ।
तथापि सन्ति प्रश्रिता जयन्ति ते जना भुवि ॥२॥
विहातुमुद्यता सदा परार्थमात्मनो हितम ।
अथाभिमानवर्जिता जयन्ति ते जना भुवि ॥३॥
विसृष्टकीर्तिकामना स्वधर्मपालने रता. ।
तथापि ये यशस्विनो जयन्ति ते जना भुवि ॥४॥
विरागमूर्त्तयोऽपि ये स्वदेशरागशोभिता. ।
अरण्यवासनि·स्पृहा जयन्ति ते जना भुवि ॥५॥

अमायिनो दृढव्रतास्तपस्विनो जितेन्द्रियाः ।
मदाशया महाशया जयन्ति ते जना भुवि ॥६॥

नतश्चार्यभावनाभावितानामस्माकं कर्तव्यमेतद् यत्सर्वथैव जीवनं प्रति

मरणं प्रकृतिः शरीरिणां विकृतिर्जीवनमुच्यते बुधः ।'

एतादृशीरनार्यभावनास्तिरस्कृत्य जीवनस्य रहस्यमवगच्छद्भि-स्तन्महत्त्वमवधार्यताम् । भवन्ति चात्र श्लोका जीवनरहस्यविषये—

जीवनस्य रहस्यम्

जीवनस्य रहस्यं ये
विदुस्ते तत्त्वदर्शिनः ।
'जीवनस्य भयं मृत्योर्
मरणान्तं च जीवितम् ॥ १ ॥

आ जन्मनः क्रमेणायु-
र्ह्रासो मृत्युपथानुगः ।'
इत्येव नैकधानर्थ-
गाथा या जीवनं प्रति ॥ २ ॥

परम्परागता लोकान्
विदधाति भयार्दितान् ।
निराशावादिनो मन्दा
मोहावर्तेऽत्र दुस्तरे ॥ ३ ॥

निमग्ना अवसीदन्ति
पङ्के गावो यथाऽवशा ।
तेषामेवानुकम्पार्थ-
मभिधत्तेऽसकृच्छ्रु ति ॥ ४ ॥
'कर्मैव जीवन, नित्य
विकासस्तस्य भास्वर ।
उत्तरोत्तरलोकेषु
कर्तव्यत्वेन मन्यताम् ॥ ५ ॥
'उत्तरोत्तरमुत्कर्षि-
जीवन शाश्वत हि न ।
अस्पृष्ट तमसा चापि
मोहरूपेण सर्वथा ॥ ६ ॥'
(प्राज्ञगीताया)·

अत एव श्रुतिराह—
जीवेम शरद· शतमित्यादि ॥

इति प्रबन्धप्रकाशस्य प्रथमभागे
निबन्धदिग्दर्शन नाम
तृतीयोल्लास ॥

सुभाषितरत्नसंदोहः

—०—

सुभाषितमयद्रव्यसंग्रहं न करोति यः ।
स तु प्रस्तावयज्ञेषु कां प्रदास्यति दक्षिणाम् ॥१॥

कथमिह मनुष्यजन्मा
संप्रविशति सदसि विबुधगमितायाम् ।
येन न सुभाषितामृत-
माह्लादि निपीतमा तृप्तेः ॥२॥

द्राक्षा म्लानमुखी जाता शर्करा चाश्मतां गता ॥
सुभाषितरसस्याग्रे सुधा भीता दिवं गता ॥३॥

पृथिव्यां त्रीणि रत्नानि
जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु
रत्नसंज्ञा विधीयते ॥४॥

१—सुभाषितपद्यावली

नियतिर्विधाय पुसा प्रथम सुखमुपरि दारुणं दुःखम् ।
कृत्वालोकं तरला तडिदिव वज्र निपातयति ॥ १ ॥
अङ्गणवेदी वसुधा कुल्या जलधि· स्थली च पातालम् ।
वल्मीकश्च सुमेरु कृतप्रतिज्ञस्य वीरस्य ॥ २ ॥
भवति सुभगत्वमधिक विस्तारितपरगुणस्य सुजनस्य ।
वहति विकासितकुमुदो द्विगुणरुचिं हिमकरोद्योत· ॥ ३ ॥
हस्त इव भूतिमलिनो यथा यथा लङ्घयति खल सुजनम् ।
दर्पणमिव तं कुरुते तथा तथा निर्मलच्छायम् ॥ ४ ॥
मरण प्रकृति· शरीरिणां विकृतिर्जीवनमुच्यते बुधै ।
क्षणमप्यवतिष्ठते श्वसन्यदि जन्तुर्ननु लाभवानसौ ॥ ५ ॥
स्वशरीरशरीरिणावपि श्रुतसयोगविपर्ययौ यदा ।
विरहः किमिवानुतापयेद्वद बाह्यैर्विषयैर्विपश्चितम् ॥ ६ ॥
अबन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्या स्वयमेव देहिन· ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादर· ॥ ७ ॥
सहसा विदधीत न क्रियामविवेक परमापदा पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पद· ॥ ८ ॥
स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छता मन ।
विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नते· ॥ ९ ॥

यशोऽधिगन्तु सुखलिप्सया वा मनुष्यसख्यामतिवर्त्तितुं वा।
निरुत्सुकानामभियोगभाजा समुत्सुकेवाङ्कमुपैति सिद्धि ॥ १० ॥

शरदम्बुधरच्छायागत्वर्यो यौवनश्रिय ।
आपातरम्या विषया पर्यन्तपरितापिन ॥ ११ ॥

तावदाश्रीयते लक्ष्म्या तावदस्य स्थिर यश ।
पुरुषस्तावदेवासौ यावन्मानान्न हीयते ॥ १२ ॥

सम्पदा सुस्थिरमन्यो भवति स्वल्पयापि य ।
कृतकृत्यो विधिर्मन्ये न वर्धयति तस्य ताम् ॥ १३ ॥

प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यत करसहस्रमपि ॥ १४ ॥

अवश्यभव्येष्वनवग्रहग्रहा यया दिशा धावति वेधस स्पृहा ।
तृणेन वात्येव तयानुगम्यते जनस्य चित्तेन भृशावशात्मना ॥ १५ ॥

निषिद्धमप्याचरणीयमापदि क्रिया सती नावति यत्र सर्वथा ।
घनाम्बुना राजपथे हि पिच्छिले क्वचिद् बुधैरप्यपथेन गम्यते ॥१६॥

भवन्ति नम्रास्तरव फलोद्गमै-
नवाम्बुभिर्दूरविलम्बिनो घना. ।
अनुद्धताः सत्पुरुषा समृद्धिभि
स्वभाव एवैष परोपकारिणाम् ॥ १७ ॥

पुराणमित्येव न साधु सर्व
न चापि काव्य नवमित्यवद्यम् ।
सन्त परीक्ष्यान्यतरद्भजन्ते
मूढ परप्रत्ययनेयबुद्धि ॥ १८ ॥

सुख हि दु खान्यनुभूय शोभते
घनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु यो याति नरो दरिद्रता
धृत शरीरेण मृतः स जीवति ।। १९ ।।
छायार्थं ग्रीष्मसतप्तो यामेवाह् समाश्रित ।।
अजानता मया सैव पत्रै शाखा वियोजिता ।। २० ।।
यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।
अपन्थान तु गच्छन्त सोदरोऽपि विमुञ्चति ।। २१ ।।
पतति व्यसने दैवाद्दारुणाद्दारुणात्मनि ।
सवर्मयति वज्रेण धैर्येण महता मन ।। २२ ।।
आरोप्यते शिला शैले यत्नेन महता यथा ।
निपात्यते क्षणेनाधस्तथात्मा गुणदोषयो ।। २३ ।।
यदि सन्ति गुणा पुंसा विकसन्त्येव ते स्वयम् ।
न हि कस्तूरिकामोद शपथेन विभाव्यते ।। २४ ।।
गुणेषु क्रियता यत्न किमाटोपै प्रयोजनम् ।
विक्रीयन्ते न घण्टाभिर्गावो दुग्धविवर्जिता ।। २५ ।।
आशाया ये दासास्ते दासा सर्वलोकस्य ।
आशा येषा दासी तेषा दासायते लोक ।। २६ ।।
आशा नाम मनुष्याणा काचिदाश्चर्यश्रृङ्खला ।
यया बद्धा प्रधावन्ति मुक्तास्तिष्ठन्ति पङ्गुवत् ।। २७ ।।
अद्यापि दुर्निवार स्तुतिकन्या वहति कौमारम् ।
सद्भ्यो न रोचते साऽसन्तस्तस्यै न रोचन्ते ।। २८ ।।

नात्यन्त सरलैर्भाव्य गत्वा पश्य वनस्थलीम् ।
छिद्यन्ते सरलास्तत्र कुब्जास्तिष्ठन्ति सर्वदा ॥ २९ ॥
नीरक्षीरविवेके हसालस्य त्वमेव तनुषे चेत् ।
विश्वस्मिन्नधुनान्य कुलव्रत पालयिष्यति क ॥ ३० ॥
वनानि दहतो वह्ने सखा भवति मारुत. ।
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम् ॥ ३१ ॥
अधोऽध पश्यतः कस्य महिमा नोपचीयते ।
उपर्युपरि पश्यन्त सर्व एव दरिद्रति ॥ ३२ ॥
न सशयमनारुह्य नरो भद्राणि पश्यति ।
सशय पुनरारुह्य यदि जीवति पश्यति ॥ ३३ ॥
गते शोको न कर्तव्यो भविष्य नैव चिन्तयेत् ।
वर्तमानेन कालेन वर्तयन्ति विचक्षणा ॥ ३४ ॥
कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥ ३५ ॥
यदि समरमपास्य नास्ति मृत्यो-
भर्यमिति युक्तमितोऽन्यत प्रयातुम् ।
अथ मरणमवश्यमेव जन्तो.
किमिति मुधा मलिन यश क्रियेत ॥ ३६ ॥
लोभ प्रतिष्ठा पापस्य प्रसूतिर्लोभ एव च ।
द्वेषक्रोधादिजनको लोभ पापस्य कारणम् ॥ ३७ ॥
शरीरनिरपेक्षस्य दक्षस्य व्यवसायिन ।
बुद्धिप्रारब्धकार्यस्य नास्ति किञ्चन दुष्करम् ॥ ३८ ॥

अतिदाक्षिण्ययुक्तानां शङ्कितानां पदे पदे ।
परापवादभीरूणां दूरतो यान्ति संपदः ॥ ३९ ॥
किन्नु मे स्यादिदं कृत्वा किं नु मे स्यादकुर्वतः ।
इति संचिन्त्य मनसा प्राज्ञः कुर्वीत वा न वा ॥ ४० ॥
उचितमनुचितं वा कुर्वता कार्यजातं
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामाविपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥ ४१ ॥
अप्रगल्भस्य या विद्या कृपणस्य च यद्धनम् ।
यच्च बाहुबलं भीरोर्व्यर्थमेतत्त्रयं भुवि ॥ ४२ ॥
पण्डिते चैव मूर्खे च बलवत्यपि दुर्बले ।
ईश्वरे च दरिद्रे च मृत्योः सर्वत्र तुल्यता ॥ ४३ ॥
अवज्ञास्फुटितं प्रेम समीकर्तुं क ईश्वरः ।
संधिं न याति स्फुटितं लाक्षालेपेन मौक्तिकम् ॥ ४४ ॥
बहूनामल्पसाराणां समवायो दुरत्ययः ।
तृणैर्विधीयते रज्जुर्बध्यन्ते तेन दन्तिनः ॥ ४५ ॥
तदेवास्य परं मित्रं यत्र संक्रामति द्वयम् ।
दृष्टे सुखं च दुःखं च प्रतिच्छायेव दर्पणे ॥ ४६ ॥
इक्षोरग्रात् क्रमशः पर्वणि पर्वणि यथा रसविशेषः ।
तद्वत्सज्जनमैत्री विपरीतानाञ्च विपरीता ॥ ४७ ॥
आत्मायत्ते गुणग्रामे नैर्गुण्यं वचनीयता ।
दैवायत्तेषु वित्तेषु पुंसां का नाम वाच्यता ॥ ४८ ॥

प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मन ।
किं नु मे पशुभिस्तुल्य किं नु सत्पुरुषैरिति ॥ ४६ ॥
यो यमर्थं प्रार्थयते यदर्थं घटतेऽपि च ।
अवश्य तदवाप्नोति न चेच्छ्रान्तो निवर्तते ॥ ५० ॥
धनमस्तीति वाणिज्य किञ्चिदस्तीति कर्षणम् ।
सेवा न किञ्चिदस्तीति भिक्षा नैव च नैव च ॥ ५१ ॥
व्रजत्यध प्रयात्युच्चैर्नर स्वैरेव चेष्टितै ।
अध· कूपस्य खनक ऊर्ध्वं प्रासादकारक ॥ ५२ ॥
उत्क्षिप्य टिट्टिभ पादावास्ते भङ्गभयाद्दिवः ।
स्वचित्तकल्पितो गर्व कस्य नात्रापि विद्यते ॥ ५३ ॥
सकृत्कन्दुकपातेन पतत्यार्य पतन्नपि ।
तथा पतति मूर्खस्तु मृत्पिण्डपतन यथा ॥ ५४ ॥
सिद्ध वा यदि वाऽसिद्ध चित्तोत्साहो निवेदयेत् ।
प्रथम सर्वजन्तूना तत्प्राज्ञो वेत्ति नेतर ॥ ५५ ॥
कालो हि सकृदभ्येति यन्नर कालकाङ्क्षिणम् ।
दुर्लभ. स पुनस्तेन कालकर्माचिकीर्षता ॥ ५६ ॥
आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणा ।
क्षिप्रमक्रियमाणस्य काल पिबति तद्रसम् ॥ ५७ ॥
दूरादुच्छ्रितपाणिरार्द्रनयन प्रोत्सारितार्धासनो
गाढालिङ्गनतत्पर प्रियकथाप्रश्नेषु दत्तादर· ।
अन्तर्गूढविषो बहिर्मधुमयश्चातीव मायापटु
को नामायमपूर्वनाटकविधिर्यः शिक्षितो दुर्जनै ॥ ५८ ॥

अफलानि दुरन्तानि समव्ययफलानि च ।
अशक्यानि च वस्तूनि नारभेत विचक्षण ॥ ५६ ॥
सुहृदिव प्रकटय्य सुखप्रद प्रथममेकरसामनुकूलताम् ।
पुनरकाण्डविवर्तनदारुणो विधिरहो विशिनष्टि मनोरुजम् ॥ ६० ॥
वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणा चेतासि को नु विज्ञातुमर्हति ॥ ६१ ॥
व्यतिषजति पदार्थानान्तर कोऽपि हेतु-
र्न खलु बहिरुपाधीन् प्रीतय सश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीक
द्रवति च हिमरश्मावुद्गते चन्द्रकान्त ॥ ६२ ॥
विषमावस्थिते दैवे पौरुषेऽफलता गते ।
विषादयन्ति नात्मान सत्त्वापाश्रयिणो नरा. ॥ ६३ ॥
चलन्तु गिरय काम युगान्तपवनाहता ।
कृच्छ्रेऽपि न चलत्येव धीराणा निश्चित मन ॥ ६४ ॥
भो दारिद्र्य ! नमस्तुभ्य सिद्धोऽह त्वत्प्रसादत ।
पश्याम्यह जगत्सर्व न मा पश्यति कश्चन ॥ ६५ ॥
गुरुषु मिलितेषु शिरसा प्रणमसि लघुषून्नता समेषु समा ।
उचितज्ञासि तुले ! किं तुलयसि गुञ्जाफलै कनकम् ॥ ६६ ॥
लक्ष्मीवन्तो न जानन्ति प्रायेण परवेदनाम् ।
शेषे धराभराक्रान्ते शेते नारायण स्वयम् ॥ ६७ ॥
अपि मुदमुपयान्तो वाग्विलासै स्वकीयै
परभणितिषु तोष यान्ति सन्त. सुशान्ता. ।

निजघनमकरन्दस्य·दपूर्णालिवाल.
कलशसलिलसेक नेहते किं रसाल ॥ ६८ ॥

इयमुन्नतसत्त्वशालिना महता कापि कठोरचित्तता ।
उपकृत्य भवन्ति दूरत परत. प्रत्युपकारशङ्कया ॥ ६९ ॥

शरदि न वर्षति गर्जति, वर्षति वर्षासु नि स्वनो मेघ ।
नीचो वदति न कुरुते, वदति न साधु करोत्येव ॥ ७० ॥

यन्त्रे निवेश्य सुतरामपि पीड्यमान-
स्तृष्णागृहीतहृदयै. सहसे त्वमिक्षो ।
यच्छत्रस मधुरमेव नितान्तमेषि
मृत्यु ततस्त्वदपर. क इवात्र धन्य ॥ ७१ ॥

कस्यापि कोऽप्यतिशयोऽस्ति स तेन लोके
ख्याति प्रयाति न हि सर्वविदस्तु सर्वे ।
कि केतकी फलति किं पनस. सुपुष्प.
किं नागवल्ल्यपि च पुष्पफलैरुपेता ॥ ७२ ॥

रात्रिर्गमिष्यति भविष्यति सुप्रभात
भास्वानुदेष्यति हसिष्यति पङ्कजालि ।
इत्थ विचिन्तयति कोशगते द्विरेफे
हा हन्त हन्त ! नलिनीं गज उज्जहार ॥ ७३ ॥

जीवन्तु मे शत्रुगणाः सदैव
येषा प्रसादात्सुविचक्षणोऽहम् ।
यदा यदा मे विकृतिं लभन्ते
तदा तदा मा प्रतिबोधयन्ति ॥ ७४ ॥

यदि नामास्य देहस्य यदन्तस्तद् बहिर्भवेत् ।
दण्डमादाय लोकोऽय शुन काकाश्च वारयेत् ॥ ७५ ॥
दु खमेवास्ति न सुख यस्मात्तदुपलक्ष्यते ।
दु खार्तस्य प्रतीकारे सुखसज्ञा विधीयते ॥ ७६ ॥
उद्घाटितनवद्वारे पञ्जरे विहगोऽनिल ।
यत्तिष्ठति तदाश्चर्य प्रयाणे विस्मय कुतः ॥ ७७ ॥
अकारणाविष्कृतवैरदारुणादसज्जनात्कस्य भयं न जायते ।
विष महाहेरिव यस्य दुर्वच सुदु सह संनिहित सदा मुखे ॥७८॥
वदन प्रसादसदनं सदय हृदय सुधामुचो वाच ।
करण परोपकरण येषा केषा न ते वन्द्याः ॥ ७९ ॥
रविरपि न दहति तादृग्यादृक्सदहति वालुकानिकर ।
अन्यस्माल्लब्धपदो नीच प्रायेण दुःसहो भवति ॥ ८० ॥
वस्तुनि चिराभिलषिते कथमपि दैवात्प्रसक्तसङ्घटने ।
प्राक्प्राप्तान्यपि बहुशो दु खानि पर सुखानि जायन्ते ॥ ८१ ॥

आदाय वारि परितः सरिता मुखेभ्यः
किं तावदर्जितमनेन दुरर्णवेन ।
क्षारीकृत च वडवादहने हुत च
पातालकुक्षिकुहरे विनिवेशित च ॥ ८२ ॥

नैवाकृति फलति नैव कुल न शील
विद्यापि नैव न च यत्नकृतापि सेवा ।
भाग्यानि पूर्वतपसा खलु सञ्चितानि
काले फलन्ति पुरुषस्य यथैव वृक्षा ॥ ८३ ॥

दुष्प्राप्याणि च वस्तूनि लभ्यन्ते वाञ्छितानि च ।
पुरुषै सशयारूढैरलसैर्न कदाचन ॥ ८४ ॥
दुरधिगम परभागो यावत्पुरुषेण साहस न कृतम् ।
जयति तुलामधिरूढो भास्वानिह जलदपटलानि ॥ ८५ ॥
प्राथमिकी घनवृष्टिः प्राप्ता शिखिनो निदाघतप्तस्य ।
आकस्मिकेन सा पुनरपनीता क्वापि पवनेन ॥ ८६ ॥
दारिद्र्यान्मरणाद्वा मरण मम रोचते न दारिद्र्यम् ।
अल्पक्लेश मरण दारिद्र्यमनन्तक दु खम् ॥ ८७ ॥
माता निन्दति नाभिनन्दति पिता भ्राता न संभाषते
भृत्य कुप्यति नानुगच्छति सुत कान्ता च नालिङ्गते ।
अर्थप्रार्थनशङ्कया न कुरुते सभाषण वै सुहृत्
तस्माद् द्रव्यमुपार्जय शृणु सखे द्रव्येण सर्वे वशा. ॥८८॥
कि कुलेनोपदिष्टेन शीलमेवात्र कारणम् ।
भवन्ति नितरां स्फीता सुक्षेत्रे कण्टकिद्रुमा. ॥ ८९ ॥
गुणानर्चन्ति जन्तूना न जाति केवल क्वचित् ।
स्फाटिक भाजन भग्न काकिण्यापि न गृह्यते ॥ ९० ॥
न किञ्चिदपि कुर्वाण· सौख्यैर्दु·खान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥ ९१ ॥
सर्वथा व्यवहर्तव्य कुतो ह्यवचनीयता ।
यथा स्त्रीणा तथा वाचा साधुत्वे दुर्जनो जन ॥ ९२ ॥
बलिभिर्मुखमाक्रान्तं पलितैरङ्कित शिर ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ ९३ ॥

धनेषु जीवितव्येषु स्त्रीषु भोजनवृत्तिषु ।
अतृप्ता मानवा सर्वे याता यास्यन्ति यान्ति च ॥ ९४ ॥
अकृत्वा परसन्तापमगत्वा खलमन्दिरम् ।
अनुत्सृज्य सता वर्त्म यत्स्वल्पमपि तद् बहु ॥ ९५ ॥
आत्माधीनशरीराणा स्वपता निद्रया स्वया ।
कदन्नमपि मर्त्यानाममृतत्वाय कल्पते ॥ ९६ ॥
सर्वत्र सम्पदस्तस्य सन्तुष्ट यस्य मानसम् ।
उपानद्गूढपादस्य ननु चर्मावृतैव भू ॥ ९७ ॥
अचिन्तितानि दु खानि यथैवायान्ति देहिनाम् ।
सुखान्यपि तथा मन्ये दैन्यमत्रातिरिच्यते ॥ ९८ ॥
अम्भोजिनीवननिवासविलासमेव
हसस्य हन्ति नितरा कुपितो विधाता ।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धा
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थ. ॥ ९९ ॥
नाल्पीयसि निबध्नन्ति पदमुन्नतचेतस ।
येषा भुवनलाभेऽपि नि सीमानो मनोरथा ॥ १०० ॥
सम्पदो महतामेव महतामेव चापद ।
वर्धते क्षीयते चन्द्रो न तु तारागण. क्वचित् ॥ १०१ ॥
आपत्स्वेव हि महता शक्तिरभिव्यज्यते न सम्पत्सु ।
अगुरोस्तथा न गन्ध प्रागस्ति यथाग्निपतितस्य ॥ १०२ ॥
उपचरितव्या सन्तो यद्यपि कथयन्ति नैकमुपदेशम् ।
यास्तेषा स्वैरकथास्ता एव भवन्ति शास्त्राणि ॥ १०३ ॥

हस्ती स्थूलतनु स चाङ्कुशवशः कि हस्तिमात्रोऽङ्कुशो
वज्रेणाभिहता पतन्ति गिरय कि शैलमात्र पवि· ।
दीपे प्रज्वलिते विनश्यति तम कि दीपमात्र तमस्
तेजो यस्य विराजते स बलवान् स्थूलेषु क प्रत्यय ॥ १०४ ॥

एकोऽहमसहायोऽह कृशोऽहमपरिच्छद ।
स्वप्नेऽप्यथवविधा चिन्ता मृगेन्द्रस्य न जायते ॥ १०५ ॥

कुसुमस्तवकस्येव द्वे गती स्तो मनस्विनाम् ।
मूर्द्ध्नि वा सर्वलोकस्य विशीर्येत वनेऽथवा ॥ १०६ ॥

सर्वे यत्र विनेतार सर्वे पण्डितमानिन· ।
सर्वे महत्त्वमिच्छन्ति तद् वृन्दमवसीदति ॥ १०७ ॥

काष्ठादग्निर्जायते मथ्यमानो भूमिस्तोय खन्यमाना ददाति ।
सोत्साहाना नास्त्यसाध्य नराणा मार्गारब्धाः सर्वयत्ना
फलन्ति ॥ १०८ ॥

उद्यम साहस धैर्य बुद्धि शक्ति पराक्रम ।
षडेते यत्र वर्तन्ते तत्र देव सहायकृत् ॥ १०९ ॥

धृति· क्षमा दया शौच कारुण्य वागनिष्ठुरा ।
मित्राणा चानभिद्रोहः सप्तैता समिध श्रिय· ॥ ११० ॥

जलमभ्यासयोगेन शैलाना कुरुते क्षयम्
कर्कशाना मृदुस्पर्शी किमभ्यासान्न साध्यते ॥ १११ ॥

जनापवादमात्रेण न जुगुप्सेत चात्मनि ।
जानीयात्स्वयमात्मान यतो लोको निरङ्कुश ॥ ११२ ॥

गीतसूक्तिरतिक्रान्ते स्तोता देशान्तरस्थिते ।
प्रत्यक्षे तु कवौ लोक. सावज्ञ सुमहत्यपि ॥ ११३ ॥
प्रत्यक्षकविकाव्य च रूप च कुलयोषित ।
गृहवैद्यस्य विद्या च कस्मैचिद्यदि रोचते ॥ ११४ ॥
मासि मासि समा ज्योत्स्ना पक्षयो. शुक्लकृष्णयो. ।
तत्रैक· शुक्लता यातो यश पुण्यैरवाप्यते ॥ ११५ ॥
अश्व शस्त्र शास्त्र वीणा वाणी नरश्च नारी च ।
पुरुषविशेष प्राप्ता भवन्त्ययोग्याश्च योग्याश्च ॥ ११६ ॥
पात्रविशेषन्यस्त गुणान्तर व्रजति शिल्पमाधातु ।
जलमिव समुद्रशुक्तौ मुक्ताफलता पयोदस्य ॥ ११७ ॥
महाजनस्य सपर्क कस्य नोन्नतिकारकः ।
पद्मपत्रस्थित तोय धत्ते मुक्ताफलश्रियम् ॥ ११८ ॥
परोपकारैकधिय· स्वसुखाय गतस्पृहा ।
जगद्धिताय जायन्ते तत्समा साधवो भुवि ॥ ११९ ॥
नालसा प्राप्नुवन्त्यर्थं न क्लीबा न च मानिन ।
न च लोकरवाद्भीता न च शश्वत्प्रतीक्षिण. ॥ १२० ॥
नालम्बते दैष्टिकता न निषीदति पौरुषे ।
शब्दार्थौ सत्कविरिव द्वय विद्वानपेक्षते ॥ १२१ ॥
उत्साहसम्पन्नमदीर्घसूत्र क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूर कृतज्ञ दृढसौहृद च लक्ष्मी स्वय याति निवासहेतो ॥ १२२ ॥
कुचैलिन दन्तमलोपधारिण
बह्वाशिन निष्ठुरभाषिणश्च ।

सूर्योदये चास्तमिते शयान
विमुञ्चति श्रीरपि चक्रपाणिम् ।। १२३ ।।
न धर्मकाल. पुरुषस्य निश्चितः
न चापि मृत्यु पुरुष प्रतीक्षते ।
सदा हि धर्मस्य क्रियैव शोभना
सदा नरो मृत्युमुखेऽभिवर्तते ।। १२४ ।।
नगरी नगरस्येव रथस्येव रथी सदा ।
स्वशरीरस्य मेधावी कृत्येष्ववहितो भवेत् ।। १२५ ।।
न कञ्चिदवमन्येत सर्वस्य शृणुयान्मतम् ।
बालस्याप्यर्थवद्वाक्यमुपयुञ्जीत पण्डित. ।। १२६ ।।
सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु ।। १२७ ।।
सर्वे भवन्तु सुखिन सर्वे सन्तु निरामया ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दु खभाग्भवेत् ।। १२८ ।।

प्राज्ञगीतायाः

दुःखमीमांसा

उद्वेगजनक दुःखं
सर्वेषामेव प्राणिनाम् ।
सेयमापाततो बुद्धि-
स्तत्त्वदृष्ट्या विविच्यते ।। १२९ ।।

न चैवाकस्मिक दु खं
न चाप्यस्त्यप्रयोजनम् ।
न चैवावश्यक, दु ख
दु खमित्येव गृह्यताम् ॥ १३० ॥

कार्यकारणसूत्रेण
सूत्रधारेण केनचित् ।
चाल्यमाने जगत्यस्मिन्
कथ दुःखमहेतुकम् ॥ १३१ ॥

गर्भावस्थां समारभ्य
या यावस्थानुभूयते ।
प्राणिना, तद्धितायैव
स्पष्ट तस्याः प्रयोजनम् ॥ १३२ ॥

एव स्थावरलोकेऽपि
वृक्षादीनां समुद्भवे ।
नानावस्थास्तु बीजस्य
जायन्ते सप्रयोजनाः ॥ १३३ ॥

तत्रैवं सति लोकेऽस्मिन्
दुःखावस्थेति या मता ।
सप्रयोजनता तस्या
नून, नैवात्र सशय· ॥ १३४ ॥

सहेतुकत्वमित्येव
सप्रयोजनतां तथा ।

दु खस्यावेद्य तत्त्वज्ञो
न ततो विजुगुप्सते ॥ १३५ ॥
अन्धकारगत कश्चिद्
यथाकस्माद् भयातुर ।
भवेत्तथैव दु खेभ्यो
मन्दानां जायते भयम् ॥ १३६ ॥
उत्तरोत्तरमुत्कृष्ट-
प्रगतावुत्सुकस्तु य· ।
दु.खाना स्वागतं कुर्वस्-
तत्त्वज्ञो नावसीदति ॥ १३७ ॥
यथा छात्रस्य कस्यापि
तापसस्य धनार्थिन. ।
कष्टाना महतामङ्गी-
कारो दृष्ट फलार्थिन· ॥ १३८ ॥
विधातु सर्वलोकस्या-
भिप्रायो ह्येष दृश्यते ।
यत्कार्यसिद्धित पूर्वं
कष्टस्वीकरण मतम् ॥ १३९ ॥
अत एव सिस्टक्षु. सन्
लोकानेतान् प्रजापति. ।
तपोऽतप्यत, नैकत्र
श्रूयते ब्राह्मणादिषु ॥ १४० ॥

शिवस्य नीलकण्ठस्य
विषपानं यदुच्यते ।
व्याख्यानमस्य तेनापि
सिद्धान्तस्य विधीयते ।। १४१ ।।

रामस्य तस्य भीष्मस्य
बुद्धस्यापि महात्मन ।
क्राइस्टस्य जिनस्यापि
गान्धिनश्च महात्मन ।। १४२ ।।

जीवनेषु तथान्येषा
लोकोत्तरयशस्विनाम् ।
स्वेच्छयैव सुख त्यक्त्वा
कष्टस्वीकरण मतम् ।। १४३ ।।

आपेक्षिकी मता तस्माद्
भावना सुखदु खयो. ।
नैकान्तिक तयो रूप-
मित्येवमवधार्यताम् ।। १४४ ।।

——

सुभाषितपद्यावल्या

विषयसूची

अतिशयविशेषा मनुष्याणाम् ७२, ९९

अवन्ध्यकोपस्य जनस्य अमर्शशून्यस्य च परस्पर भेद ७

अभ्यासस्य महिमा १११

आपत्तिकाल आचरणम् १६

आपत्ति· १, ९, १६, १६, ३२, १०१, १०२

आशा २६, २७

उचितज्ञता ६६

कर्मशीलता ३४, ३५, ३८, ५२, ७२

कवि. काव्य च ९२, ११३, ११४

कार्यसिद्धि १०, ३८, ५५

काल· ५६, ५७

कृशे कस्यास्ति सौहृदम् ३१

खलः सुजनश्च ४, ८२

गुणदोषौ २३

गुणा २४, २५, ४८, ८९, ६०

तृष्णा ६३, ९४

दारिद्र्यम् १६, ३२, ६५, ८७, ८८

दु खमीमासा १२६—१४४

दुर्जना ५८

धर्माचरणम् १२४, १२५

धैर्यम् २२, ६३, ६४

नियति १

नीच ८०

न्यायप्रवृत्तो मनुष्य २१

पण्डितः १२६

परोपकारिता १७, ६६

पुराणमित्येव न साधु सर्वम् १८

भद्रभावना १२७, १२८

भाग्यानि ८३

भीरुर्मनुष्य ४२

मरणम् (मृत्युर्वा) ५, ४३, ७७

महान्तो मनुष्याः ६, ६६, १००, १०१, १०२, १०३, ११८

मानरक्षा १३, ५३, ६६

मित्रता प्रेम च ४४, ४६, ४७, ६२, ८१, ९१

यश ३६, ७२, ११५

योग्यताया अयोग्यतायाश्च मूलम् ११६, ११७, ११८

यौवन विषयाश्च ११

लक्ष्मीवता मदान्धता ६७

लोभ ३७

विधि १४, १५, ६०, ६६
विमृश्यकारिता तदभावश्च ८, २०, ४०, ४१
विरह (बाह्यैर्विषयै) ६
वीरः २, ३६, १०४, १०५
वैराग्यम् ७५, ७६
व्यवसायी मनुष्य· ३८
शत्रुगस्य ७४
शीलम् ८६
सन्तोष· ६५—६८
सन्तोऽसन्तश्च २८, ६१, ६८, ७०, ७१, ७८, ७६, १०३, ११९
समवाय. (=सहति) ४५, १०७
समुन्नते. पन्था १३, ३२—३६, ४६, ५०, ५२, ५५, ५९, ८४, ८५, ६२, १०८—११२, ११८, १२०—१२३
सम्पद कथ दूरतो यान्ति ३६
सरलताया हानि २६
साहसमुत्साहश्च ८५, १०८, १०६, १२२
सुख दु ख च १, १६, ७६, ८१, ८६, ६८
सुजन ३, ४
सेवा ५१
स्तुतिकन्या २८
हंसस्य नीरक्षीरविवेक. ३०

२—सुभाषितपद्यखण्डमाला

रघुवंशात्

हेम्न. सलक्ष्यते ह्यग्नौ विशुद्धि श्यामिकापि वा ॥ १ । १० ॥

न पादपोन्मूलनशक्तिरह शिलोच्चये मूर्च्छति मारुतस्य ॥ २ । ३४ ॥

क्रिया हि वस्तूपहिता प्रसीदति ॥ ३ । २९ ॥

यशस्तु रक्ष्य परतो यशोधनै ॥ ३ । ४८ ॥

पद हि सर्वत्र गुणैर्निधीयते ॥ ३ । ६२ ॥

आदान हि विसर्गाय सता वारिमुचामिव ॥ ४ । ८६ ॥

पर्यायपीतस्य सुरैर्हिमांशो कलाक्षय. श्लाघ्यतरो हि वृद्धे ॥५ । १६ ॥

उष्णत्वमग्न्यातपसम्प्रयोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्य ॥५।५४॥

भिन्नरुचिर्हि लोक. ॥ ६ । ३० ॥

रत्न समागच्छतु काञ्चनेन ॥ ६ । ७९ ॥

प्रतिकारविधानमायुष सति शेषे हि फलाय कल्पते ॥ ८ । ४० ॥

अभितप्तमयोऽपि मार्दव भजते कैव कथा शरीरिषु ॥ ८ । ४३ ॥

विषमप्यमृत क्वचिद्भवेदमृत वा विषमीश्वरेच्छया ॥ ८ । ४६ ॥

धिगिमा देहभृतामसारताम् ॥ ८ । ५१ ॥

अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिता ॥ ९ । ७४ ॥

तेजसा हि न वय समीक्ष्यते ॥ ११ । १ ॥

अपि स्वदेहात्किमुतेन्द्रियार्थाद्यशोधनाना हि यशो गरीय. ॥१४।३५॥

आज्ञा गुरूणां ह्यविचारणीया ॥ १४ । ४३ ॥

कुमारसम्भवात्

क्षुद्रेऽपि नून शरण प्रपन्ने ममत्वमुच्चै शिरसा सतीव ॥ १ । १२ ॥

विकारहेतौ सति विक्रियन्ते येषा न चेतासि त एव धीराः ॥१ ।५९॥

प्रायेण सामग्र्यविधौ गुणाना पराङ्मुखी विश्वसृज प्रवृत्ति ॥३।२८॥

अशनेरमृतस्य चोभयोर्वशिनश्चाम्बुधराश्च योनय ॥ ४।४३ ॥

क ईप्सितार्थस्थिरनिश्चय मन पयश्च निम्नाभिमुख प्रतीपयेत् ॥ ५ । ५ ॥

शरीरमाद्य खलु धर्मसाधनम् ॥ ५ । ३३ ॥

न रत्नमन्विष्यति मृग्यते हि तत् ॥ ५ । ४५ ॥

अलोकसामान्यमचिन्त्यहेतुक द्विषन्ति मन्दाश्चरित महात्मनाम् ॥ ५ । ७५ ॥

प्राय. प्रत्ययमाधत्ते स्वगुणेषूत्तमादर : ॥ ६ । २० ॥

मेघदूतात्

याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥ १ । ६ ॥

आशाबन्धः कुसुमसदृश प्रायशो ह्यङ्गनाना

सद्य पाति प्रणयि हृदय विप्रयोगे रुणद्धि ॥ १ । १० ॥

रिक्त सर्वो भवति हि लघु पूर्णता गौरवाय ॥ १ । २० ॥

आपन्नार्त्तिप्रशमनफला· सम्पदो ह्युत्तमानाम् ॥ १ । ५३ ॥

कस्यात्यन्त सुखमुपनत दु खमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ २ । ४६ ॥

किरातार्जुनीयात्

. नहि प्रिय प्रवक्तुमिच्छन्ति मृषा हितैषिण ॥ १ । २ ॥
हितं मनोहारि च दुर्लभ वच. ॥ १। ४ ॥
व्रजन्ति ते मूढधिय पराभव भवन्ति मायाविषु ये न मायिन ॥१।३०॥
विचित्ररूपाः खलु चित्तवृत्तय ॥ १ । ३७ ॥
परैरपर्यासितवीर्यसम्पदा पराभवोऽप्युत्सव एव मानिनाम् ॥१ ।४१॥
ननु वक्तृविशेषनि.स्पृहा गुणगृह्या वचने विपश्चित ॥ २ । ५ ॥
निवसन्ति पराक्रमाश्रया न विषादेन सम समृद्धय ॥ २ । १५ ॥
सहसा विदधीत न क्रियामविवेक परमापदा पदम् ॥ २ । ३० ॥
स क्षत्रियस्त्राणसह सता य ॥ ३ । ४८ ॥
न हीङ्गितज्ञोऽवसरेऽवसीदति ॥ ४ । २० ॥
किमिवावसादकरमात्मवताम् ॥ ६ । १९ ॥
सा लक्ष्मीरुपकुरुते यया परेषाम् ॥ ७ । २८ ॥
आत्मवर्गहितमिच्छति सर्व ॥ ९ । ६४ ॥
प्रेम पश्यति भयान्यपदेऽपि ॥ ९ । ७० ॥
उपनतमवधीरयन्त्यभव्या ॥ १० । ५१ ॥
विमल कलुषीभवच्च चेत· कथयत्येव हितैषिण रिपु वा ॥ १३ । ६ ॥
प्रकृत्यमित्रा हि सतामसाधवः ॥ १४ ।२१ ॥
सहापकृष्टैर्महता न सगतं भवन्ति गोमायुसखा न दन्तिन· ॥१४।२२॥

शिशुपालवधात्

श्रेयसि केन तृप्यते ॥ १ । २९ ॥

ऋते रवे क्षालयितु क्षमेत क. क्षपातमस्काण्डमलीमस नभ. ॥१।३८॥

सदाभिमानैकधना हि मानिन. ॥ १ । ६७ ॥

ज्ञातसारोऽपि खल्वेक सदिग्धे कार्यवस्तुनि ॥ २ । १२ ॥

महीयास प्रकृत्या मितभाषिण· ॥ २ । १३ ॥

इन्धनौघधगप्यग्निस्त्विषा नात्येति पूषणम् ॥ २ । २३ ॥

अनिर्लोडितकार्यस्य वाग्जाल वाग्मिनो वृथा ॥ २ । २७ ॥

बद्धमूलस्य मूल हि महद्वैरतरो· स्त्रिय ॥ २ । ३८ ॥

कथापि खलु पापानामलमश्रेयसे यत ॥ २ । ४० ॥

मा जीवन्य. परावज्ञादु खदग्धोऽपि जीवति ॥ २ । ४५ ॥

सामानाधिकरण्य हि तेजस्तिमिरयो कुत ॥ २ । ६२ ॥

सर्व स्वार्थं समीहते ॥ २ । ६५ ॥

उपायमास्थितस्यापि नश्यन्त्यर्था प्रमाद्यत ॥ २ । ८० ॥

अयथाबलमारम्भो निदान क्षयसम्पद ॥ २ । ९४ ॥

बृहत्सहाय. कार्यान्त क्षोदीयानपि गच्छति ॥ २ । १०० ॥

क्षणे क्षणे यन्नवतामुपैति तदेव रूप रमणीयताया. ॥ ४ । १७ ॥

समय एव करोति बलाबलम् ॥ ६ । ४४ ॥

स्फुटमभिभूषयति स्त्रियस्त्रपैव ॥ ७ । ३८ ॥

...अस्तसमयेऽपि सतामुचित खलूच्चतरमेव पदम् ॥ ९ । ५ ॥

जितरोषरया महाधिय सपदि क्रोधजितो लघुर्जन· ॥ १६ । २६ ॥

अथवाभिनिविष्टबुद्धिषु व्रजति व्यर्थकता सुभाषितम् ॥ १६ । ४३ ॥

नैषधात

काय निदानाद्धि गुणानधीते ॥ ३ । १७ ॥
अपा हि तृप्ताय न वारिधारा स्वादु सुगन्धि स्वदते तुषारा ॥३।९३॥
पित्तेन दूने रसने सितापि तिक्तायते . ॥ ३।९४ ॥
तदुदित स हि यो यदनन्तर ॥ ४ । ३ ॥
कम क स्वकृतमत्र न भुङ्क्ते ॥ ५ । ६ ॥
आर्जव हि कुटिलेषु न नीति ॥ ५ । १०३ ॥
मित च सार च वचो हि वाग्मिता ॥ ६ । ८ ॥
चकास्ति योग्येन हि योग्यसङ्गम. ॥ ६ । ५६ ॥
दैवे निरुन्धति निबन्धनता वहन्ति
हन्त प्रयासपरुषाणि न पौरुषाणि ॥ ११ । ५५ ॥
देवा हि नान्यद्वितरन्ति किन्तु प्रसद्य ते साधुधिय ददन्ते ॥ १४।६ ॥
प्रेत्यास्मि कीदृग्भवितेति चिन्ता
सन्तापमन्तस्तनुते हि जन्तोः ॥ १४ । ७४ ॥
अदोषतामेव सता विवृण्वते द्विषा मृषादोषकणाधिरोपणा. ॥१५।४॥

कथासरित्सागरात्

अकाण्डपातोपनता न क लक्ष्मीर्विमोहयेत् ।
अकालमेघवद्वित्तमकस्मादेति याति च ।
अचिन्त्यो बत दैवेनाप्यापात' सुखदु खयो ।
अन्तरापाति हि श्रेय कार्यसम्पत्तिसूचकम् ।
अप्राप्य नाम नेहास्ति धीरस्य व्यवसायिन ।

अश्नुते स हि कल्याणं व्यसने यो न मुह्यति ।
असारेऽस्मिन्भवे तावद्भावाः पर्यन्तनीरसाः ।
अहो अतीव भोगाशा क नाम न विडम्बयेत् ।
अहो दैवाभिशप्तानां प्राप्तोऽप्यर्थः पलायते ।
आपदि स्फुरति प्रज्ञा यस्य धीरः स एव हि ।
आरब्धा ह्यसमाप्तैव किं धीरैस्त्यज्यते क्रिया ।
एकचित्ते द्वयोरेव किमसाध्यं भवेदिति ।
कदर्याणां परे प्राणाः प्रायेण ह्यर्थसञ्चयाः ।
करुणार्द्रा हि सर्वस्य सन्तोऽकारणबान्धवाः ।
कष्टा हि कुटिलश्वश्रूपरतन्त्रवधूस्थितिः ।
कस्य नोच्छृङ्खलं बाल्यं गुरुशासनवर्जितम् ।
कामं व्यसनवृक्षस्य मूलं दुर्जनसङ्गतिः ।
को हि वित्तं रहस्यं वा स्त्रीषु शक्नोति गूहितुम् ।
जितक्रोधेन सर्वं हि जगदेतद्विजीयते ।
ज्ञानमार्गे ह्यहङ्कारः परिघो दुरतिक्रमः ।
त्यजन्त्युत्तमसत्त्वा हि प्राणानपि न सत्पथम् ।
ददाति तीव्रसत्त्वानामिष्टमीश्वर एव हि ।
दुःखान्धा हि पतन्त्येव विपच्छ्वभ्रेषु कातराः ।
दैवमेव हि साहाय्यं कुरुते सत्त्वशालिनाम् ।
न काचस्य कृते जातु युक्ता मुक्तामणेः क्षतिः ।
न स्वेच्छं व्यवहर्तव्यमात्मनो भूतिमिच्छता ।
पङ्को हि नभसि क्षिप्तः क्षेप्तुः पतति मूर्धनि ।

प्राणिना हि निकृष्टापि जन्मभूमि. परा प्रिया ।
प्राणेभ्योऽप्यर्थमात्रा हि कृपणस्य गरीयसी ।
यो यद्वपति बीज हि लभते सोऽपि तत्फलम् ।
रत्नव्ययेन पाषाण को हि रक्षितुमर्हति ।
वक्ति जन्मान्तरप्रीति मन· स्निह्यदकारणम् ।
सत्त्वानुरूप सर्वस्य धाता सर्व प्रयच्छति ।
सर्वश्चित्तप्रमाणेन सदसद्वाभिवाञ्छति ।
हितोपदेशो मूर्खस्य कोपायैव न शान्तये ।

पञ्चतन्त्रात्

इह लोके हि धनिना परोऽपि स्वजनायते ।
किं तया क्रियते धेन्वा या न सूते न दुग्धदा ।
कृषि. क्लिष्टा, विद्या गुरुविनयवृत्त्यातिविषमा ।
न स्वल्पस्य कृते भूरि नाशयेन्मतिमान्नर. ।
अरक्षित तिष्ठति दैवरक्षित सुरक्षित दैवहत विनश्यति ।
जठर को न बिभर्ति केवलम् ।
अप्रकटीकृतशक्ति शक्तोऽपि जनस्तिरस्क्रिया लभते ।
उत्तरादुत्तर वाक्य वदता सम्प्रजायते ।
प्राकाश्य स्वगुणोदयेन गुणिनो गच्छन्ति किं जन्मना ।
षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्ण स्थिरो भवेत् ।
पैशुन्याद्भिद्यते स्नेह ।
तृणानि नोन्मूलयति प्रभञ्जनो मृदूनि नीचै प्रणतानि सर्वत. ।

अश्नुते स हि कल्याणं व्यसने यो न मुह्यति ।
असारेऽस्मिन्भवे तावद्भावा पर्यन्तनीरसा ।
अहो अतीव भोगाशा क नाम न विडम्बयेत् ।
अहो दैवाभिशप्ताना प्राप्तोऽप्यर्थं पलायते ।
आपदि स्फुरति प्रज्ञा यस्य धीरः स एव हि ।
आरब्धा ह्यसमाप्तैव किं धीरैस्त्यज्यते क्रिया ।
एकचित्ते द्वयोरेव किमसाध्य भवेदिति ।
कदर्याणा परे प्राणाः प्रायेण ह्यर्थसञ्चया. ।
करुणार्द्रा हि सर्वस्य सन्तोऽकारणबान्धवा ।
कष्टा हि कुटिलश्वश्रूपरतन्त्रवधूस्थिति ।
कस्य नोच्छृङ्खल बाल्य गुरुशासनवर्जितम् ।
काम व्यसनवृक्षस्य मूल दुर्जनसङ्गति ।
को हि वित्त रहस्य वा स्त्रीषु शक्नोति गूहितुम् ।
जितक्रोधेन सर्व हि जगदेतद्विजीयते ।
ज्ञानमार्गे ह्यहङ्कारः परिघो दुरतिक्रम. ।
त्यजन्त्युत्तमसत्त्वा हि प्राणानपि न सत्पथम् ।
ददाति तीव्रसत्त्वानामिष्टमीश्वर एव हि ।
दु.खान्धा हि पतन्त्येव विपच्छ्वभ्रेषु कातरा ।
दैवमेव हि साहाय्य कुरुते सत्त्वशालिनाम् ।
न काचस्य कृते जातु युक्ता मुक्तामणेः क्षति ।
न स्वेच्छ व्यवहर्तव्यमात्मनो भूतिमिच्छता ।
पङ्को हि नभसि क्षिप्त क्षेप्तु पतति मूर्धनि ।

प्राणिना हि निकृष्टापि जन्मभूमिः परा प्रिया ।
प्राणेभ्योऽप्यर्थमात्रा हि कृपणस्य गरीयसी ।
यो यद्वपति बीज हि लभते सोऽपि तत्फलम् ।
रत्नव्ययेन पाषाण को हि रक्षितुमर्हति ।
वक्ति जन्मान्तरप्रीति मन स्निह्यदकारणम् ।
सत्त्वानुरूप सर्वस्य धाता सर्व प्रयच्छति ।
सर्वश्चित्तप्रमाणेन सदसद्वाभिवाञ्छति ।
हितोपदेशो मूर्खस्य कोपायैव न शान्तये ।

पञ्चतन्त्रात्

इह लोके हि धनिना परोऽपि स्वजनायते ।
कि तया क्रियते धेन्वा या न सूते न दुग्धदा ।
कृषि क्लिष्टा, विद्या गुरुविनयवृत्त्यातिविषमा ।
न स्वल्पस्य कृते भूरि नाशयेन्मतिमान्नर. ।
अरक्षित तिष्ठति दैवरक्षित सुरक्षितं दैवहत विनश्यति ।
जठर को न बिभर्ति केवलम् ।
अप्रकटीकृतशक्ति. शक्तोऽपि जनस्तिरस्क्रिया लभते ।
उत्तरादुत्तर वाक्य वदता सम्प्रजायते ।
प्राकाश्य स्वगुणोदयेन गुणिनो गच्छन्ति कि जन्मना ।
षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्ण स्थिरो भवेत् ।
पैशुन्याद्भिद्यते स्नेह ।
तृणानि नोन्मूलयति प्रभञ्जनो मृदूनि नीचै प्रणतानि सर्वतः ।

महान् महत्स्वेव करोति विक्रमम् ।
तुल्ये बले तु बलवान् परिकोपमेति ।
उपायेन हि यत्कुर्यात् तन्न शक्य पराक्रमै ।
यस्य बुद्धिर्बलं तस्य निर्बुद्धेस्तु कुतो बलम् ।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् ।
कृपणानुसारि च धनम् ।
मेघो गिरिदुर्गवर्षी च ।
सेवाधर्मं परमगहनो योगिनामप्यगम्य ।
मृदुना सलिलेन खन्यमानान्यवघृष्यन्ति गिरेरपि स्थलानि ।
दीर्घौ बुद्धिमतो बाहू ।
तातस्य कूपोऽयमिति ब्रुवाणा' क्षारं जलं कापुरुषा पिबन्ति ।
यद्भविष्यो विनश्यति ।
अनिर्वेद श्रियो मूलम् ।
बहूनामप्यसाराणा समवायो हि दुर्जय ।
नष्टं मृतमतिक्रान्त नानुशोचन्ति पण्डिता ।
गतानुगतिको लोको न लोक पारमार्थिक ।
घातयितुमेव नीच. परकार्यं वेत्ति न प्रसाधयितुम् ।
नाश्मनि स्यात् क्षुरक्रिया ।
पय पानं भुजङ्गाना केवल विषवर्धनम् ।
अत्यादर. शङ्कनीय ।
पण्डितोऽपि वर शत्रुर्न मूर्खो हितकारक. ।
अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिना ध्रुव ।

अकृतोपद्रव कश्चिन्महानपि न पूज्यते ।

सम्पत्तौ च विपत्तौ च महतामेकरूपता ।

काल सर्वजनान् प्रसारितकरो गृह्णाति दूरादपि ।

सुतप्तमपि पानीय शमयत्येव पावकम् ।

सता साप्तपद मैत्रम् ।

कोऽतिभार समर्थानाम् ?

किं दूर व्यवसायिनाम् ?

को विदेश. सुविद्यानाम् ?

क. पर प्रियवादिनाम् ?

हेतुरत्र भविष्यति ।

ऊष्मापि वित्तजो वृद्धिं तेजो नयति देहिनाम् ।

सकृदपि दृष्ट्वा पुरुष विबुधा जानन्ति सारता तस्य ।

हस्ततुलयापि निपुणा पलप्रमाणा विजानन्ति ।

यदस्मदीयं न हि तत्परेषाम् ।

आच्छादिते रवौ मेघैराच्छन्ना. स्युर्गभस्तय. ।

वाञ्छाविच्छेदन प्राहु स्वास्थ्य शान्ता महर्षय. ।

प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शन वरम् ।

क्षते प्रहारा निपतन्त्यभीक्ष्णम् ।

छिद्रेष्वनर्था बहुलीभवन्ति ।

नक्र स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।

निर्वाते ज्वलितो वह्नि स्वयमेव प्रशाम्यति ।

तुषैरपि परिभ्रष्टा न प्ररोहन्ति तण्डुला ।

कृशे कस्यास्ति सौहृदम्।

आत्मन प्रतिकूलानि परेषा न समाचरेत्।

बलीयसा हीनबलो विरोध न भूतिकामो मनसापि वाञ्छेत्।

भिन्नश्लिष्टा तु या प्रीतिर्न सा स्नेहेन वर्धते।

अनागतं य. कुरुते स शोभते।

स शोच्यते यो न करोत्यनागतम्।

सन्तापयन्ति कमपथ्यभुज न रोगाः ?

क श्रीर्न दर्पयति ?

क न निहन्ति मृत्यु ?

लुब्धस्य नश्यति यश , पिशुनस्य मैत्री,
नष्टक्रियस्य कुलमर्थपरस्य धर्मः,
विद्याफल व्यसनिन., कृपणस्य सौख्यम्।

कण्टकेनैव कण्टकम्।

अपि शत्रु प्रणम्यापि रक्षेत् प्राणान् धनानि च।

सर्वनाशे समुत्पन्ने अर्द्धं त्यजति पण्डित ।

यस्मिन्कुले त्वमुत्पन्नो गजस्तत्र न हन्यते।

मौन सर्वार्थसाधनम्।

अभिमतसिद्धिरशेषा भवति हि पुरुषस्य पुरुषकारेण।

वर बुद्धिर्न सा विद्या विद्याया बुद्धिरुत्तमा।

उदारचरिताना तु वसुधैव कुटुम्बकम्।

दुष्टे दुष्ट समाचरेत्।

अपि कापुरुषो मार्गे द्वितीय. क्षेमकारक ।

याद्दशी भावना यस्य सिद्धिर्भवति ताद्दशी ।

हितोपदेशात्

यन्नवे भाजने लग्न सस्कारो नान्यथा भवेत् ।

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथै ।

काचः काञ्चनससर्गाद्धत्ते मारकतीद्युती ।

न व्यापारशतेनापि शुकवत्पाठ्यते बक ।

ज्ञान भार क्रिया विना ।

न गणस्याग्रतो गच्छेत् ।

अल्पानामपि वस्तूना सहति कार्यसाधिका ।

निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ।

धनाशा जीविताशा च गुर्वी प्राणभृता सदा ।

अन्धस्य किं हस्ततलस्थितोऽपि प्रकाशयत्यर्थमिह प्रदीप ?

काय सन्निहितापाय ।

जलबिन्दुनिपातेन क्रमश पूर्यते घट ।

काच काचो मणिर्मणि ।

अनुहुङ्कुरुते घनध्वनि न हि गोमायुरुतानि केसरी ।

अशेषदोषदुष्टोऽपि काय कस्य न वल्लभः ।

(स्वेदितो मर्दितश्चैव रज्जुभि परिवेष्टित ।)

मुक्तो द्वादशभिर्वर्षैः श्वपुच्छः प्रकृति गत ।

नलिकागतमपि कुटिल न भवति सरल शुन पुच्छम् ।

त्विग्मक्रियमाणस्य काल पिबति तद्रसम् ।
सामानाधिकरण्य हि तेजस्तिमिरयो कुत ?

चरकसंहितायाः

धर्मार्थकाममोक्षाणामारोग्य मूलमुत्तमम् ।
सम्यक्प्रयोग सर्वेषा सिद्धिराख्याति कर्मणाम् ।
सुखार्था. सर्वभूताना मता सर्वा. प्रवृत्तय ।
आत्मानमेव मन्येत कर्तार सुखदु खयो ।

सुश्रुतसंहितायाः

एकशास्त्रमधीयानो न विद्याच्छास्त्रनिश्चयम् ।
शरीरे चैव शास्त्रे च दृष्टार्थ स्याद्विशारद ।
दृष्टश्रुताभ्या सन्देहमवापोह्याचरेत् क्रियाः ।

सामान्यसंग्रहः

स्वर्णाद्रिशृङ्गाग्रमधिष्ठितोऽपि
काको वराक. खलु काक एव ।
कातरा एव जल्पन्ति यद्भाग्य तद्भविष्यति ।
महतामाश्रयः कार्य. फल भाग्यानुसारत ।
गद्यं कवीनां निकषं वदन्ति ।

अनाक्रम्य जगत्सर्वं नो सन्ध्या भजते रविः ।

यस्यागमः केवलजीविकायै

तं ज्ञानपण्यं वणिजं वदन्ति ।

कीर्तिर्यस्य स जीवति ।

शास्त्राण्यधीत्यापि भवन्ति मूर्खा

यस्तु क्रियावान् पुरुषः स एव ।

गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ।

स्वार्थात्सतां गुरुतरा प्रणयिक्रियैव ।

अत्यारूढिर्भवति महतामप्यपभ्रंशनिष्ठा ।

नाधर्मश्चिरमृद्धये ।

निसर्गतोऽन्तर्मलिना ह्यसाधवः ।

नित्यं संनिहितो मृत्युः कर्तव्यो धर्मसंग्रहः ।

३—सुभाषितगद्यावली

दशकुमारचरितात्

जलबुद्बुदसमाना विराजमाना सपत् तडिल्लतेव सहसैवोदेति, नश्यति च ।

अवज्ञासोढ्यं दारिद्र्यम् ।

आत्मानमात्मनानवसाद्यैवोद्धरन्ति सन्त ।

न ह्यलमतिनिपुणोऽपि पुरुषो नियतिलिखितां लेखामतिक्रमितुम् ।

सेयमाकृतिर्न व्यभिचरति शीलम् ।

इह जगति हि न निरीहदेहिन श्रिय सश्रयन्ते ।

श्रेयासि च सकलान्यनलसाना हस्ते नित्यसानिध्यानि ।

दिव्य हि चक्षुर्भूतभवद्भविष्यत्सु व्यवहितविप्रकृष्टादिषु च विषयेषु शास्त्र नामाप्रतिहतवृत्ति ।

दैव्याः शक्ते पुरो न बलवती मानवी शक्ति ।

हर्षचरितात्

निसर्गविरोधिनी चेय पय पावकयोरिव धर्मक्रोधयोरेकत्र वृत्ति ।

अतिरोषणश्चक्षुष्मानप्यन्ध एव जन ।

कुपितस्य प्रथममन्धकारीभवति विद्या, ततो भ्रुकुटि ।

जनयन्ति च विस्मयमतिधीरधियामप्यदृष्टपूर्वा दृश्यमाना जगति स्रष्टु सृष्ट्यतिशया ।

सता हि प्रियवदता कुलविद्या ।

न किंचिन्न कारयत्यसाधारणी स्वामिभक्ति. ।

न सन्त्येव ते येषा सतामपि सता न विद्यन्ते मित्रोदासीन-शत्रव ।

स्वैरिणो विचित्राश्च लोकस्य स्वभावा प्रवादाश्च ।

धनोष्मणा म्लायत्यल लतेव मनस्विता ।

भुजे वीर्यं निवसति न वाचि ।

सपत्कणिकामपि प्राप्य तुलेव लघुप्रकृतिरुन्नतिमायाति ।

सोऽय कुरङ्गकै कचग्रह केसरिणः ।

हरिणार्थमतिक्षेपणा सिंहसभार ।

न च स्वप्नदृष्टनष्टेष्विव क्षणिकेषु शरीरेषु निबध्नन्ति बन्धुबुद्धि प्रबुद्धा ।

स्थायिनि यशसि शरीरधीर्वीराणाम् ।

सज्जनमाधुर्याणामभूतदास्यो दश दिश ।

उपयोगं तु न प्रीतिर्विचारयति ।

अतिद्रुतवाहिनी चानित्यतानदी ।

कादम्बर्याः

अतिकष्टास्वप्यवस्थासु जीवितनिरपेक्षा न भवन्ति खलु जगति सर्वप्राणिना प्रवृत्तय· ।

सर्वथा न कञ्चिन्न खलीकरोति जीविततृष्णा।

प्रायेणाकारणमित्राणयतिकरुणार्द्राणि च सदा खलु भवन्ति सता चेतासि।

अपत्राणा किन्न न सन्ति लोका शुभा ।

जन्मा तरकृत हि कर्म फलमुपनयति पुरुषस्येह जन्मनि।

नहि शक्य दैवमन्यथाकर्तुमभियुक्तेनापि।

धमपरायणाना सदा समीपसचारिणयः कल्याणसपदो भवन्ति।

आवेदयन्ति हि प्रत्यासन्नमानन्दमग्रपातीनि शुभानि निमित्तानि।

सत्योऽय लोकवादो यत्सपत्सपद विपद्विपदमनुबध्नातीति।

आत्मकृताना हि दोषाणा नियतमनुभवितव्य फलमात्मनैव।

अहो जगति जन्तूनामसमर्थितोपनतान्यापतन्ति वृत्तान्तान्तराणि।

अहो दुर्निवारता व्यसनोपनिपातानाम्।

सर्वथा न कञ्चन न स्पृशन्ति शरीरधर्माणमुपतापा.।

अयत्नेनैव खलूपहासास्पदतामीश्वरो नयति जनम्।

सर्वथा दुर्लभ यौवनमस्खलितम्।

सुखमुपदिश्यते परस्य।

नास्ति खल्वसाध्यं नाम भगवतो मनोभुव.।

बहुप्रकाराश्च ससारवृत्तय ।

प्रायेण च निसर्गत एवानायतस्वभावभङ्गुराणि सुखानि, आयतस्वभावानि च दु खानि।

दुर्लभो हि दाक्षिण्यपरवशो निर्निमित्तमित्रमकृत्रिमहृदयो विदग्धजन ।

स्वप्न इवाननुभूतमपि मनोरथो दर्शयति ।

बहुभाषिणो न श्रद्दधाति लोक ।

आजन्मक्रमाहितो बलवान् जननीस्नेह ।

केन कदावलोकितो ज्योत्स्नारहितश्चन्द्रमा ।

एतत्खलु प्रदीपेनाग्ने प्रकाशनम् ।

मिथ्यापि तत्तथा यथा गृहीत लोकेन ।

यस्यामेव वेलाया चित्तवृत्ति, सैव वेला सर्वकार्येषु ।

भृत्या अपि त एव ये सपत्तेर्विपत्तौ सविशेष सेवन्ते ।

अनतिक्रमणीया हि नियति ।

लोकेऽपि च प्राय कारणगुणभाञ्ज्येव कार्याणि दृश्यन्ते ।

अभिज्ञानशाकुन्तलात्

सर्व. कान्तमात्मीय पश्यति ।

स्निग्धजनसविभक्त खलु दु ख सह्यवेदनं भवति ।

अतिस्नेहः पापाशङ्की ।

अहो सर्वास्ववस्थासु रमणीयत्वमाकृतिविशेषाणाम् ।

न कदापि सत्पुरुषा. शोकपात्रात्मानो भवन्ति ।

न खलु धीमता कश्चिदविषयो नाम ।

क उष्णोदकेन नवमल्लिका सिञ्चति ।

गुर्वपि विरहदुःखमाशाबन्धः साहयति।

ननु प्रवातेऽपि निष्कम्पा गिरयः ।

विक्रमोर्वशीयात्

अनुत्सेकः खलु विक्रमालङ्कारः ।

नास्त्यगतिर्मनोरथानाम् ।

छिन्नबन्धे मत्स्ये पलायिते निर्विण्णो धीवरो भणति धर्मो मे भविष्यति ।

सर्वमप्यौदरिकाणामभ्यवहार एव पर्य्यवस्यति ।

लोप्त्रेण[1] सूचितस्य कुम्भिलकस्य नास्ति वाचा प्रतिविधानम् ।

सर्वत्र खल्वात्मानुमानेन वर्तितु युक्तम् ।

उत्तररामचरितात्

एते हि हृदयमर्मच्छिदः संसारभावा येभ्यो बीभत्समानाः सन्त्यज्य सर्वान्कामानरण्ये विश्राम्यन्ति मनीषिणः ।

प्रसवः खलु प्रकर्षपर्यन्तः स्नेहस्य, परं चैतदन्योन्यसंश्लेषणं पित्रोः ।

स्नेहश्च निमित्तसव्यपेक्षश्चेति विप्रतिषिद्धमेतत् ।

साक्षात्कृतधर्म्माणो महर्षयस्तेषामृतम्भराणि भगवतां परोरजांसि प्रज्ञानानि न क्वचिद्व्याहन्यन्त इत्यनभिशङ्कनीयानि ।

---

१ लोप्त्रं चौर्येणाप्तं धनम् ।

मृच्छकटिकात्

गुण खल्वनुरागस्य कारण न बलात्कार ।

साहसे श्री प्रतिवसति ।

न चन्द्रादातपो भवति ।

अहो धिग्वैषम्य लोकव्यवहारस्य ।

पुरुषभाग्यानामचिन्त्या खलु व्यापारा. ।

ईदृशो दासभावो यत्सत्य कमपि न प्रत्याययति ।

काव्यमीमांसायाः

प्राय प्राणभृता प्रेमाणमन्तरेण नान्यद् बन्धनमस्ति ।

अविच्छेदेन शीलनमभ्यास । स हि सर्वगामी सर्वत्र निरतिशय कौशलमाधत्ते ।

यादृश(शा)कारश्चित्रकरस्तादृशाकारमस्य चित्रमिति प्रायोवाद ।

पक्षपातो हि गुणदोषौ विपर्यासयति ।

न च दृप्येत् । दर्पलवोऽपि सर्वसंस्कारानुच्छिनत्ति ।

परैश्च परीक्षयेत् । यदुदासीन पश्यति न तदनुष्ठातेति प्रायोवादः ।

अनियतकाला प्रवृत्तयो विप्लवन्ते ।

सम्यक्स्वापो वपुष. परमारोग्याय ।

पुरुषरत्नानामेक एव राजोदन्वान् भाजनम् ।

महात्मना हि सवादिन्यो बुद्धय एकमेवार्थमुपस्थापयन्ति ।

मतिदर्पणे कवीनां विश्वं प्रतिफलति ।

कथं नु वयं द्रक्ष्यामह इति महात्मनामहंपूर्विकयैव शब्दार्थाः पुरो धावन्ति ।

निरुक्तात्

नैष स्थाणोरपराधो यदेनमन्धो न पश्यति। पुरुषापराधः स भवति ।

यथा जानपदीषु विद्यातः पुरुषविशेषो भवति, पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति ।

कस्तद्वेद यदभूतम् ?

बहुप्रजाः कृच्छ्रमापद्यत इति परिव्राजकाः ।

नित्यं ह्यविज्ञातुर्विज्ञानेऽसूया ।

एतद् वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृग्यजुर्वाभिवदति ।

साक्षात्कृतधर्माण ऋषयो बभूवुः । तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्संप्रादुः । उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च ।

आचार्यः आचारं ग्राहयति ।

सैषा पुरुषगर्हा, न शास्त्रगर्हा ।

अप्येकः (अविद्वान्) पश्यन् न पश्यति वाचम् । अपि च शृण्वन् न शृणोत्येनाम् ।

अर्थं वाचः पुष्पफलमाह ।

पुत्रः पुरु त्रायते ।...।पुन्नरकं ततस्त्रायत इति वा ।

ऋषिर्दर्शनात् ।

पुरोहितः पुर एनं दधति ।

तद्यथा कितवाद्बिभीयादेवमेव दुरुक्ताद्बिभीयात् । न दुरुक्ताय स्पृहयेत् कदाचित् ।

पुराणं कस्मात् । पुरा नवं भवति ।

सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः ।

सुचक्षा अहमक्षीभ्यां भूयासम् । सुवर्चा मुखेन । सुश्रुत्कर्णाभ्यां भूयासम् ।

माहाभाग्याद्देवताया एक आत्मा बहुधा स्तूयते ।

यद् यद्रूपं कामयते तत्तद्देवता भवति ।

अभ्यासे भूयांसमर्थं मन्यन्ते ।

मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन्को न ऋषिर्भविष्यतीति । तेभ्य एतं तर्कमृषिं प्रायच्छन् ।

यदेव किंचानूचानोऽभ्यूहत्यार्षं तद्भवति ।

——

४—वैदिकसूक्तिमञ्जरी

ऋग्वेदसंहितायाः

सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते ।
त्वामभि प्र णोनुमो जेतारमपराजितम् ।। (१।११।२) ।

(मा भेम = शत्रुभ्यो भीता मा भूम । अभि प्र णोनुमः = सर्वतः प्रकर्षेण स्तुम)

पूर्वीरिन्द्रस्य रातयो न वि दस्यन्त्यूतयः । (१।११।३) ।

(रातयः = दानानि । पूर्वी = प्रभूता । ऊतयः = रक्षणानि । वि दस्यन्ति = उपक्षीयन्ते)

कृधी न ऊर्ध्वाञ्चरथाय जीवसे । (१।३६।१४) ।

(ऊर्ध्वान् = उन्नतान् । चरणाय = लोके चरणाय, जीवनयात्रायै इति यावत् । जीवसे = जीवनाय) ।

विश्वस्मा उग्र कर्मणे पुरोहितः । (१।५५।३) ।

(उग्र उद्गूर्णो हि मनुष्यो विश्वस्मै कर्मणे पुरोहितत्वेनावस्थाप्यत इति भाव) ।

देवाना भद्रा सुमतिर्ऋजूयता देवाना रातिरभि नो नि वर्तताम् ।
देवाना सख्यमुप सेदिमा वय देवा न आयु प्र तिरन्तु जीवसे ।।
(१।८९।२)

(ऋजूयताम् = ऋजुमार्जवेन युक्त वर्तनमात्मन इच्छन्तीति

ऋजूयन्तस्तेषामस्माकम्। अस्तु इति शेष। राति.=दानम्। नि=नितराम्। उपसेदिम=प्राप्नुयाम)।

भद्र कर्णेभि शृणुयाम देवा
भद्र पश्येमाक्षभिर्यजत्राः। (१।८६।८)

(अक्षभि=अक्षिभि.। यजत्रा=हे यजनीया देवा)।

यस्तन्न वेद किमृचा करिष्यति। (१।१६४।३६)

(य.=मनुष्य। तत्=ऋक्प्रतिपाद्य वस्तु, अर्थतत्त्व वा)।

य इत्तद् विदुस्त इमे समासते। (१।१६४।३६)

(य एव वेदादिप्रतिपाद्यमर्थजात विदुस्त एव सुखेन जीवन्तीत्यभिप्राय)।

इन्द्र मित्र वरुणमग्निमाहु-
रथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वद-
न्त्यग्निं यम मातरिश्वानमाहु॥ (१।१६४।४६)

(तुलना विधेया—"माहाभाग्याद्देवताया एक आत्मा बहुधा स्तूयते" निरुक्ते ७।४)।

अन्यस्य चित्तमभि सचरेण्यम्। (१।१७०।१)

(सचरेण्यम्=सचारि)।

मिनाति श्रिय जरिमा तनूनाम्। (१।१७६।१)

(जरिमा=जरा। मिनाति=हिनस्ति)।

न मृषा श्रान्त यदवन्ति देवा। (१।१७६।३)

(=श्रान्तं परिश्रम कुर्वाण जन देवा अवन्तीति यत्तद् न मृषेत्यर्थ.)।

अपो सु म्यक्ष वरुण भियस मत्। (२।२८।६)

(भियसम्=भयम्। अपो म्यक्ष=अपगमय। मत्=मत्त)।

बल धेहि तनूषु नो बलमिन्द्रानळुत्सु न।
बल तोकाय तनयाय जीवसे त्व हि बलदा असि॥
(३।५३।१८)

नावाजिन वाजिना हासयन्ति
न गर्दभ पुरो अश्वान्नयन्ति। (३।५३।२३)

(वाजिना.=वाचामिना वाजिना। सर्वज्ञाः। अवाजिनम्=मूर्खजनम्। न हासयन्ति=हास्यास्पद न कुर्वन्ति। तेन सह स्पर्धा न कुर्वन्तीत्यर्थः। एवमेव गर्दभमश्वात्पुरो न नयन्ति।)।

ऋतस्य धीतिर्वृजिनानि हन्ति। (४।२३।८)

(धीति.=प्रज्ञा स्तुतिर्वा। वृजिनानि=पापानि)।

नकिरिन्द्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन्।
नकिरेवा यथा त्वम्॥ (४।३०।१)

स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाविव।
पुनर्ददताघ्नता जानता स गमेमहि॥ (५।५१।१५)

(पन्थाम्=कर्तव्यपथम्। ददता=साहाय्यकर्त्रा। अघ्नता=हितैषिणा। जानता=ज्ञानसपन्नेन। परोपकारिणा हितैषिणा च

विदुषा सङ्गेन प्रेरणा लभमाना वय चन्द्रदिवाकराविव स्वकर्तव्य-पथादविच्युता भवेमेत्यर्थ)।

क्रत चिदेनो नमसा विवासे। (६।५१।८)

(आ विवासे = विनाशयामि)।

जही न्यत्रिणा पणिं, वृको हि स। (६।५१।१४)

(जहि = विनाशय। अत्रिणम् = अदनशील परापकारिणम्। पणिम् = वणिजम्। वृक = अपहरणशील॰)।

पुमान् पुमासं परिपातु विश्वत॰। (६।७५।१४)

ब्रह्म वर्म ममान्तरम्। (६।७५।१९)

नहि स्वमायुश्चिकिते जनेषु। (७।२३।२)

(चिकिते = ज्ञायते। जनेषु केनापि स्वजीवित न ज्ञायत इत्यर्थ.)।

तस्य व्रतानि न मिनन्ति धीराः। (७।३१।११)

(तस्य = परमेश्वरस्य। मिनन्ति = हिंसन्ति। धीराः = प्राज्ञा)।

मा नो निद्रा ईषत मोत जल्पि। (८।४८।१४)

(निद्रा = प्रमादालस्यरूपा.। जल्पि. = जल्पनम्, जनप्रवादो लोकचर्चा वा। मा ईषत = बाधितुमीश्वरा मा भूवन्। प्रमादालस्यादिवशेन लोकप्रवादेन वा मनुष्य स्वकर्तव्यमार्गाच्च्युतो न भवेदिति भाव)।

अस्ति रत्नमनागस.। (८।६७।७)

(अपापस्य कृते रमणीयपदार्थानामुपस्थितिर्भवतीति भाव)।

इन्द्रं वर्धन्तो अप्तुर

कृण्वन्तो विश्वमार्यम् ।

अपघ्नन्तो अराव्ण. ॥ (९।६३५)

(वर्धन्त = वर्धयन्त । अप्तुरः = उदकस्य प्रेरका, सद्भावनायाः प्रचारका इति यावत् । अराव्णः = अदातॄन् । अपघ्नन्त = विनाशयन्त । वय भवेम यद्वा जीवेमेति शेष) ।

नानान वा उ नो धियो, वि व्रतानि जनानाम् । (९।११२।१)

(न = अस्माक जनानाम् । नानानम् = नानाजातीयका । व्रतानि = कर्माणि) ।

तक्षा रिष्ट रुतं भिषग् ब्रह्मा सुन्वन्तमिच्छति । (९।११२।१)

(तक्षा रिष्ट दारुतक्षणमिच्छति, भिषग् रुत रोगमिच्छति, ब्रह्मा ब्राह्मणश्च सुन्वन्तमिच्छति) ।

अक्षैर्मा दीव्य कृषिमित्कृषस्व । (१०।३४।१३)

(आदर्शजीवनम्)

विश्वाहा त्वा सुमनस सुचक्षस.

प्रजावन्तो अनमीवा अनागसः ।

उद्यन्त त्वा मित्रमहो दिवे दिवे

ज्योग्जीवा. प्रति पश्येम सूर्य ॥ (१०।३७।७)

(अनमीवा. = रोगरहिता. । हे मित्रमह = मित्ररूपं महो महत्त्वं

यस्य तत्सबोधनम, यद्वा मित्राणा पूजयित.। ज्योग्जीवा = ज्योक् चिर जीवा जीवन्त)।

——

गोभिष्टरेमामतिं दुरेवाम्। (१०।४२।१०)

(दुरेवाम् = दुष्टागमनाम्, दारिद्र्याद्युद्भूताम्। अमतिम् = दुर्बुद्धिम्, मन्दा बुद्धिं वा)।

प्र तार्यायु. प्रतर नवीय.। (१०।५९।१)

(प्र तारि = प्रवर्धताम्। प्रतरम् = प्रवृद्धतरम्। नवीय = नवतरम्)।

ज्योक् पश्येम सूर्यमुच्चरन्तम्। (१०।५९।६)

(ज्योक् = चिरम्। उच्चरन्तम् – उद्गच्छन्तम्)।

उद्बुध्यध्व समनस. सखाय.। (१०।१०१।१)

शुक्लयजुर्वेदसंहितायाः

इदमहमनृतात् सत्यमुपैमि। (१।५)

उर्वन्तरिक्षमन्वेमि। (१।७)

(अन्तरिक्षम् = अवकाशम्। अहमात्मनः समुन्नत्यै उरु विस्तीर्णमवकाशमवसरं वा लभे इति समुन्नतिपथेन गच्छत स्वाभिप्रायाविष्करणम्)।

तनूपा अग्नेऽसि तन्वं मे पाहि,
आयुर्दा अग्नेऽस्यायुर्मे देहि;
वर्चोदा अग्नेऽसि वर्चो मे देहि।

अग्ने यन्मे तन्वा ऊन तन्म आपृण ॥ (३।१७)

(तन्वम् = शरीरम् । आपृण = आपूरय) ।

तत्सवितुर्वरेण्य

भर्गो देवस्य धीमहि ।

धियो यो न. प्रचोदयात् ॥ (३।३५)

(वरेण्यम् = वरणीयम्, सर्वै. प्रार्थनीयम् । भर्गः = सर्वपापाना भर्जनसमर्थ तेज । धीमहि = ध्यायामः । प्रचोदयात् = सत्कर्मानुष्ठानाय प्रेरयति) ।

ऋतस्य पथा प्रेत । (७।४५)

वाममद्य सवितर्वाममु श्वो

दिवे दिवे वाममस्मभ्य सावी । (८।६)

(वामम् = यद् वननीय सभजनीय तत् । सावी' = प्रसूया.) ।

अनाधृष्टा. सीदत सहौजस. । (१०।४)

(सहौजसः = ओजसा सहिता , बलयुक्ता । अनाधृष्टाः = अनाधर्षिता , अपराभूता शत्रुभिः । सीदत = तिष्ठत) ।

यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जन ।

निन्दाद्यो अस्मान् धिप्साच्च सर्व त मस्मसा कुरु ॥ (११।८०)

(अरातीयात् = अरातिरिवाचरति । द्वेषते = द्वेष्टि । निन्दात् = निन्दयति । धिप्सात् = धिप्सति, दम्भितुमिच्छति, जिघासति । मस्मसाकुरु = चूर्णीकुरु) ।

सᳫशित मे ब्रह्म सᳫशित वीर्य बलम् ।

सᳫशित क्षत्र जिष्णु ॥ (११।८१)

(संशितम् = तीक्ष्णीकृतम्) ।

रुच नो धेहि ब्राह्मणेषु रुचꣳ राजसु नस्कृधि ।

रुच विश्येषु शूद्रेषु मयि धेहि रुचारुचम् ॥ (१८।४८)

(रुचम् = दीप्तिम् । विश्येषु = वैश्येषु । रुचा सह रुचम् = अविच्छिन्ना रुचमित्यर्थ) ।

तेजोऽसि तेजो मयि धेहि,
वीर्यमसि वीर्य मयि धेहि,
बलमसि बल मयि धेहि,
ओजोऽस्योजो मयि धेहि,
मन्युरसि मन्यु मयि धेहि,
सहोऽसि सहो मयि धेहि ॥ (१९।९)

यथेमा वाच कल्याणीमावदानि जनेभ्यः । ब्रह्मराजन्याभ्याꣳ शूद्राय चार्याय च स्वाय चारणाय च ॥ (२६।२)

(अरण = अपगतोदक पर इत्यर्थ) ।

वाचस्पतिर्वाच न स्वदतु । (३०।१)

(स्वदतु = स्वादयतु । अस्मदुक्ता वाक् वाचस्पतये रोचतामित्यर्थः) ।

आशिक्षायै प्रश्निनम्, उपशिक्षाया अभिप्रश्निनम् । (३०।१०)

भूत्यै जागरणम्, अभूत्यै स्वपनम् । (३०।१७)

प्रियाय प्रियवादिनम् । (३०।१३)

न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः । (३२।३)

(तस्य पुरुषस्य । प्रतिमा = प्रतिमानम्, उपमानम्) ।

स ओत प्रोतश्च विभू प्रजासु । (३२।८)

स नो बन्धुर्जनिता स विधाता । (३२।१०)

(मेधायै प्रार्थना)

या मेधा देवगणा.
पितरश्चोपासते ।
तया मामद्य मेधया-
ग्ने मेधाविन कुरु स्वाहा ॥ (३२।१४)

(मनसः पवित्रता)

यत्प्रज्ञानमुत चेतो धृतिश्च
यज्ज्योतिरन्तरमृत प्रजासु ।
यस्मान्न ऋते किं चन कर्म क्रियते
तन्मे मन शिवसंकल्पमस्तु ॥ (३४।३)

(हिरण्यस्तुतिः)

यो बिभर्त्ति दाक्षायण॑ हिरण्य॑ स देवेषु
कृणुते दीर्घमायु, स मनुष्येषु कृणुते दीर्घमायु ॥ (३४।५१)
विश्व तद्भद्र यदवन्ति देवा (३४।५८)

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मान ततो न विचिकित्सति ।।
यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानत ।
तत्र को मोह क शोक एकत्वमनुपश्यत ।। (४०।६-७)

(वि चिकित्सति = सशेते) ।

कविर्मनीषी परिभू· स्वयम्भूर्
याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्य समाभ्य । (४०।८)

(याथातथ्यत = यथास्वरूपम् स्वभावानुरूपमिति यावत् । अर्थान् = कर्तव्यरूपानर्थान्, भोग्यपदार्थान् वा । शाश्वतीभ्य = नित्याभ्यः । समाभ्य· = सवत्सरेभ्य । परमात्मना भोग्यपदार्थाना कर्तव्यकर्मणा वा विभाग सृष्टौ सर्वदा याथातथ्येनैव क्रियत इति भाव.) ।

अग्ने नय सुपथा राये अस्मान् । (४०।१६)

सामवेदसंहितायाः

पावका न. सरस्वती । (पूर्वार्चिके २।१०।५)
सदा गाव शुचयो विश्वधायस । (पू० ५।६।६)
इन्द्रो विश्वस्य राजति । (पू० ५।७।१०)
मदेम शतहिमा. सुवीरा । (पू० ५।७।८)
सूर्य आत्मा जगतस्तस्थुषश्च । (पू० ६।१४।२)

इच्छन्ति देवा सुन्वन्त न स्वप्नाय स्पृहयन्ति। (उत्त० १।२।३)
साह्याम दस्युमव्रतम्। (उ० ३।१।२)
जनस्य गोपा अजनिष्ट जागृविः। (उ० ३।१।६)
वय स्याम भुवनेषु जीवसे। (उ० ३।२।१)
भद्रा इन्द्रस्य रातय . (उ० ५।२।१४)
(रातयः = दानानि)

अथर्ववेदसंहितायाः

स श्रुतेन गमेमहि, मा श्रुतेन वि राधिषि। (१।१।४)
वाचा वदामि मधुमद् भूयास मधुसदृश.। (१।३४।३)
आप इद्वा उभेषजीरापो अमीवचातनी·।
आपो विश्वस्य भेषजी। (३।७।५)

(उत्तमशालाया स्वरूपम्)

इहैव ध्रुवा प्रति तिष्ठ शालेऽश्वावती गोमती सूनृतावती।
ऊर्जस्वती घृतवती पयस्वत्युच्छ्रयस्व महते सौभगाय ॥ (३।१२।२)

त्व नो देव दातवे रयिं दानाय चोदय। (३।२०।५)
यथा न सर्व इज्जन सगत्या सुमना असद्, दानकामश्च नो भुवत्।
(३।२०।६)

सर्वं तद्राजा वरुणो वि चष्टे

यदन्तरा रोदसी यत्परस्तात् ॥ (४।१६।५)

युवं वायो सविता च भुवनानि रक्षथ । (४।२५।३)

(वायोः सवितुश्च यक्ष्मनाशकत्वम्)

रयिं मे पोष सवितोत वायुस्

तनू दक्षमा सुवता सुशेवम् ।

अयक्ष्मतातिं मह इह धत्त

तौ नो मुञ्चतमहस ॥ (४।२५।५)

मह्य नमन्ता प्रदिशश्चतस्त्र । (५।३।१)

उत्परस्तात्सूर्य एति विश्वदृष्टो अदृष्टहा ।

दृष्टाश्च घ्नन्नदृष्टाश्च सर्वांश्च प्रमृणन् क्रिमीन् ॥ (५।२३।६)

दैवीं नाव स्वरित्रामनागसो

अस्रवन्तीमा रुहेमा स्वस्तये । (७।६।३)

भद्रादधि श्रेय प्रेहि । (७।८।१)

(भद्रगृहाणि)

उपहूता भूरिधना. सखायः स्वादुसमुदः ।

अक्षुध्या अतृष्या स्त गृहा मास्मद्बिभीतन ॥ (७।६०।४)

(देवानां पूरयोध्या)

अष्टाचक्रा नवद्वारा

देवाना पूरयोध्या ।

तस्या हिरण्यय कोश

स्वर्गो ज्योतिषावृत ॥ (१०।२।३१)

ये पुरुषे ब्रह्म विदुस्ते विदु परमेष्ठिनम् । (१०।७।१७)

प्रेव पिपतिषति मनसा मुहुरा वर्तते पुन. । (१२।२।५२)

सुश्रुतौ कर्णौ भद्रश्रुतौ कर्णौ

भद्र श्लोक श्रूयासम् । (१६।२।४)

५—लौकिकन्यायाञ्जलिः

अजाकृपाणीयन्याय ।

यथा हि खलु कण्डूयनार्थं स्तम्भादौ ग्रीवा प्रसारयन्त्या अजाया यदृच्छया पतता कृपाणेन ग्रीवा छिद्येत, एव यत्राकस्मादेवानर्थोद्यापतेत्तत्र, अकस्मादेवाश्चर्यमय्या घटनायाः स्थले वाय न्याय. ।

अणुरपि विशेषोऽध्यवसायकर ।

अनिषिद्ध ह्यनुमत भवति ।

अन्धकवर्तकीयन्यायः (अथवा—अन्धचटकन्याय·) ।

हिन्दी—"अन्धे के हाथ बटेर" ।

अन्धगजन्याय· ।

यथैक एव गज. करपादादिरूपेण केनचिदवयवविशेषेण प्रज्ञापितोऽन्धै. सर्परूप स्तम्भरूप इत्येव नानारूपेण कल्प्यते । एवमेव यत्रैकमेव वस्तु अज्ञानवशाद् बहुश कल्प्यते तत्रायं न्याय· ।

अन्धपरम्परान्यायः (अथवा—अन्धेनैव नीयमाना यथान्धा. ।

यद्वा—अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे ।)

अन्धदर्पणन्याय. ।

तथा हि । यस्य नास्ति स्वयं प्रज्ञा शास्त्र तस्य करोति किम् ।

लोचनाभ्या विहीनस्य दर्पण कि करिष्यति ॥

अन्धस्य दीपो बधिरस्य गीतम् ।

अयमपरो गण्डस्योपरि स्फोट. ।

अरण्यरोदनन्याय. ।

अर्क्के चेन्मधु विन्देत किमर्थ पर्वत व्रजेत् ।

अय भाव. । अल्पान्महतश्च कर्मण. सम फल जायेत चेत्ततोऽल्पेनैव सिद्धे कार्ये महति न कश्चित्प्रवर्तेत ।

अशक्तास्तत्पद गन्तुं ततो निन्दा प्रकुर्वते ।

हिन्दी—"अङ्गूर खट्टे है ।"

तथा हि । दह्यमाना सुतीव्रेण नीचा. परयशोऽग्निना ।

अशक्तास्तत्पद गन्तुं ततो निन्दां प्रकुर्वते ॥

अशक्तोऽह गृहारम्भे शक्तोऽह गृहभञ्जने ।

अथवा—घातयितुमेव नीच. परकार्यं वेत्ति न प्रसाधयितुम् ।

अस्त्रमस्त्रेण शाम्यति (अथवा—वज्र वज्रेण भिद्यते) ।

आकाशमुष्टिहननन्यायः ।

मुष्टिभिर्व्योमताडनवन्निष्फलेऽसभवे च कर्मणि न्यायस्यास्य प्रयोग. ।

आम्रसेकपितृतर्पणन्यायः ।

(अथवा—एका क्रिया द्व्यर्थकरी प्रसिद्धा । आम्राश्च सिक्ता पितरश्च प्रीणिताः ।) हिन्दी—"एक पंथ दो काज" ।

आम्रान्पृष्टः कोविदारानाचष्टे ।

इतो भ्रष्टस्ततो भ्रष्ट ।

इतो व्याघ्र इतस्तटी।

उभयत स्पाशा[1] रज्जु ।

कस्यचित्करणेऽकरणे च तथा भावेऽभावे च दोषापत्तिरित्यर्थ. ।

उत्सङ्गसङ्गिनि बालके तदन्वेषणम् ।

काकतालीयन्याय (=अजाकृपाणीयन्याय)।

काकस्य कति वा दन्ता मेषस्याण्ड कियत्पलम् ।
गर्दभे कति रोमाणि इत्येषा मूर्खकल्पना ॥

काशकुशावलम्बनन्यायः ।

नद्यादौ पतितस्य सन्तरणानभिज्ञस्य हि काशकुशावलम्बनमनर्थक भवति ।

कुड्यं विना न चित्रम् । अथवा - सति कुड्ये चित्रम् ।

कूपमण्डूकन्याय ।

कूपयन्त्रघटिकान्याय' ।

तथा हि—एष क्रीडति कूपयन्त्रघटिकान्यायप्रसक्तो विधि ।

क्रिया हि विकल्प्यते न वस्तु ।

अय भाव. । कर्तुमकर्तुमन्यथा वा कर्तु शक्य हि कर्म । यथाश्वेन गच्छति, पद्भ्यामन्यथा वा, न वा गच्छतीति । न तु वस्त्वेव नैवमस्ति नास्तीति वा विकल्प्यते ।

---

१ उभयत स्पाशेति । स्पश बाधनस्पर्शनयोरिति भौवादिकस्य, स्पश ग्रहणसश्लेषणयोरिति चौरादिकस्य वा रूपमेतत् [महाभाष्ये (६।१।६८) कैयटः]।

कास्त क्व निपतित ।

चते चारमिव ।

खल्वाटबिल्वीयन्याय (=काकतालीयन्याय)।

गतानुगतिको लोको न लोक पारमार्थिक ।

घुणाक्षरन्याय॰ ।

तत्र वर्धमान (३।१९५)—घुणोत्किरणात्कथचिन्निष्पन्न-मक्षर घुणाक्षरम्। तदिव यदकुशलेन दैवाद् निष्पद्यते तद् घुणाक्षरीयम् ।

चिन्तामणिं परित्यज्य काचमणिग्रहणन्याय ।

तस्य तदेव हि मधुर यस्य मनो यत्र सलग्नम् ।

तुष्यतुदुर्जनन्याय. ।

यत्र प्रतिवाद्युक्तपक्ष दुष्टमपि अङ्गीकृत्य वादी दूषणान्तर ददाति तत्राय न्यायः ।

त्यजेदेक कुलस्यार्थे ।

अथवा—सर्वनाशे समुत्पन्ने ह्यर्ध त्यजति पण्डित. ।

नष्टाश्वदग्धरथन्याय. ।

परस्परापेक्षावतोर्द्वयो. सहयोगेन यत्र कार्य निष्पादयितु शक्यते तत्राय न्याय ।

नहि कठोरकण्ठीरवस्य कुरङ्गशाव प्रतिभटो भवति ।

नहि भवति तरक्षुः प्रतिपक्षो हरिणशावकस्य ।

नहि वरविघाताय कन्योद्वाहः ।

नहि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते, न च मृगा

सन्तीति यवा नोप्यन्ते ।

न हि सर्वः सर्वं जानाति ।

न हि करकङ्कणादर्शनायादर्शापेक्षा ।

हिन्दी—"हाथ कगन को आरसी क्या" ।

न हि गोधा सर्पन्ती सर्पणादहिर्भवति ।

न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवतीत्यर्थः ।

न ह्येष स्थाणोरपराधो यदेनमन्धो न पश्यति ।

निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव ।

पङ्कप्रक्षालनन्यायः ।

अथवा—प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ।

पङ्ग्वन्धन्याय । (=नष्टाश्वदग्धरथन्यायः) ।

पर्जन्यो यावदूनं पूर्णं च सर्वमभिवर्षति ।

अथवा—मेघो गिरिजलधिवर्षी च ।

पश्यस्यद्रौ ज्वलदग्निं न पुनः पादयोरधः ।

पिष्टपेषणन्यायः ।

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ।

भक्षितेऽपि लशुने न शान्तो व्याधिः ।

भस्मन्याज्याहुतिः । (=अरण्यरोदनन्यायः) ।

मारणाय गृहीतोऽङ्गच्छेदं स्वीकरोति ।

य एव करोति स एव भुङ्क्ते ।

योगाद्रूढिर्बलीयसी ।

यो यच्छ्रद्धः स एव सः ।

लक्षणप्रमाणाभ्या वस्तुसिद्धि ।

लोचनाभ्या विहीनस्य दर्पण किं करिष्यति ।

वर साशयिकान्निष्कादसाशयिक कार्षापण ।

वरमद्य कपोत श्वो मयूरात् ।

विषकुम्भ पयोमुखम् ।

विषस्य विषमौषधम् ।

वृद्धिमिष्टवतो मूलमपि ते नष्टम् ।

वृश्चिकभिया पलायमान आशाविषमुखे निपतित. ।

शिरसि मसीपटल दधाति दीप. ।

हिन्दी—"चिराग तले अँधेरा ।"

शीर्षे सर्पो देशान्तरे वैद्य. ।

श्वःकार्यमद्य कुर्वीत ।

सदैव दशभि पुत्रैर्भार वहति गर्दभी ।

सूचीकटाहन्याय ।

स्थालीपुलाकन्याय ।

स्वभावो दुरतिक्रम. ।

हस्तकङ्कण किं दर्पणे प्रेक्ष्यते ।

इत्याचार्यश्रीमङ्गलदेवशास्त्रिविरचितस्य प्रबन्धप्रकाशस्य प्रथमभागे सुभाषितरत्नसंदोहो नामान्तिमश्चतुर्थोल्लासः ।



RECENTLY PUBLISHED

PRABANDHA-PRAKASHA

PART II

(Convocation and other addresses in Sanskrit)

BY

Dr. Mangal Deva Shastri, *M A , D Phil.* *(Oxon.)*

WITH A FOREWORD

By

Dr. Bhagavan-dasa, *M A., D Litt.*

HIGHLY SPOKEN OF

By

UNIVERSITY SANSKRIT PROFESSORS & OTHER EMINENT PERSONS

प्रबन्धप्रकाशः

द्वितीयो भागः

अर्थात्

विशिष्टविद्वत्परिषत्सु ग्रन्थकर्त्रा प्रदत्ताना दीक्षान्तादि-
भाषणाना सग्रहात्मक, ऐतरेयपर्यालोचनेन
महानिबन्धेन, वेदादिसच्छास्त्रेभ्य.
सकलितया सुविचारमाधुकर्या
च समुपेतो ग्रन्थः

स च

विद्यामार्तण्ड (कां० वि०)
डाक्टर श्री मङ्गलदेव शास्त्री,
एम० ए०, डी० फिल० (ऑक्सफोर्ड),
इत्येतेन विनिर्मितः

सुप्रसिद्धैर्महनीयकीर्त्तिभि-
र्महत्तरैश्चातितरां प्रशंसितः

प्रबन्ध-प्रकाश

द्वितीय भाग

) भाव, भाषा-शैली, तथा विचार-पद्धति की दृष्टि से आधुनिक सस्कृत जगत् की नवीनतम रचना है।

) इसकी रचना चिरकाल तक गवर्नमेट सस्कृत कालेज, बनारस, के प्रिंसिपल, गवर्नमेट सस्कृत कालेज परीक्षाओ के रजिस्ट्रार, संस्कृत स्टडीज यू० पी० के सुपरिन्टेन्डेन्ट, अनेक ग्रन्थो के रचयिता, सुप्रसिद्ध विद्वान् डा० मङ्गलदेव शास्त्री ने की है।

) ससार के सुप्रसिद्ध दार्शनिक विद्वान् डाक्टर भगवान्दासजी ने अपने प्राक्कथन से इसे गौरवान्वित किया है।

) सरस, सरल, मञ्जुल सस्कृत भाषा मे लिखी गई इस पुस्तक मे विभिन्न दृष्टियो से भारतीय संस्कृति, उसके अङ्ग, उसके प्रति सस्कृतज्ञो का कर्त्तव्य, अभिनव भारत मे सस्कृतज्ञो का स्थान, संस्कृत की उन्नति के उपाय, भगवद्गीता का स्वरूप, वेदो का स्वरूप, शिक्षा के आदर्श, आदि विषयो पर गभीर विचार किये गये है।

() पुस्तक सस्कृत के प्रोफेसरो, अध्यापको, उच्चश्रेणि की सस्कृत तथा I A S आदि प्रतियोगिता की परीक्षाओ के छात्रो के लिये अत्यन्त उपयोगी है।

---

३२५ पृष्ठो की सुन्दर सचित्र सजिल्द पुस्तक का मूल्य केवल ३) रु०

प्राप्तिस्थान—

नेजर—इंडियन प्रेस, लिमिटेड, प्रयाग (या बनारस)

The book mainly consists of convocation and other addresses in Sanskrit delivered By the author on special occasions

It is altogether a new contribution in Sanskrit by a distinguished sholar, who as Principal, Government Sanskrit College, Banaras, Registrar, Sanskrit College Examinations, U.P., Superintendent of Sanskrit Studies, U.P., etc., etc., has supervised and directed the studies of Sanskrit on Shastric traditional lines for many years

It will be found highly useful and thought-provoking by professors, teachers and advanced students of Sanskrit, and also by persons interested in the modern problems of Sanskrit.

Order for a copy at once, as the edition is expected to be finished shortly.

Pages 325, price Rs 3/- only

To be had of—

THe Manager,

The Indian Press, Ltd ,

ALLAHABAD & BANARAS

प्रख्यात विद्वानों की बहुमूल्य सम्मतियाँ

Extracts from Select Opinions

1 **Dr Bhagavan dasa M A., D Litt, Banaras—**

" आचार्य श्री मङ्गलदेवशास्त्रिणा, प्रगतेर्भावनाया जागर्ति-। सस्कृतज्ञाना साम्प्रतिकी ख्यावश्यकतेत्यनुभवता, स्वोपज्ञमनोरम-वृत्त्या सोपपत्ति च सरससरलैर्मञ्जुभिश्च पदैर्गूढगभीरविषयान् प्रतिपाद-ता, प्रगतिशीलविचारपरम्पराभि परिपूर्णा भव्यैर्भावैर्विभूषितो ारतीयताभावनाभावितश्च ग्रन्थोऽय विनिर्मित ।

अत्र हि प्राधान्येन सस्कृतज्ञाना हितेन सबद्धान् "अभिनवभारत स्कृतज्ञाना स्थानम्", "भारतीयसस्कृते स्वरूपम्", "देववाण्या अव-ातिरस्माक कर्तव्य च", "आर्यधर्मस्य सदेश" इत्यादिविषयान्, प्राचीन-स्कृतवाङ्मयेन च सबद्धान् "वेदा अभिनवभारत च", "भगवद्गीता-या: स्वरूपमुपयोगश्च' . .इत्यादिविषयानधिकृत्य तत्तद्विशिष्टावसरेषु ग्रन्थकृता प्रदत्ताना भाषणाना सग्रह । तत्परिशिष्टरूपेण च . वेदा-दिसच्छास्त्रेभ्य: सकलिता विचारगभीरा हृदयगमाश्च संदर्भा सूक्तयश्च नून ग्रन्थस्यात्युपयोगिता सपादयन्ति ।

स एष सस्कृतभाषायामिदप्रथमत्वेन कृतो यत्न सस्कृत-ज्ञानामवश्यमभिनन्दनीयो भविष्यतीति मे विश्वास.। तदस्य विषये

देववाण्याः समुत्कर्ष भावयंस्तद्विदां तथा ।
ग्रन्थ एष चिरं भूयाद्विदुषां हर्षवर्धनः ॥

इत्येव मदीयं शुभाशसनम् ।"

2- **His Excellency Shri M S Aney, Governor of Bihar —**

I have great pleasure to observe that I read partly some of the speeches, particularly अभिनवभारते सस्कृतज्ञाना स्थानम् , भगवद्गीताया स्वरूपम् , श्रुतिविमर्श. (ऐतरेयब्राह्मण आचारविचारा) I found the discussion and exposition of points raised therein very lucid and closely reasoned The review of Aitareya-Brāhmana - is sufficiently thought provoking The reader can get a fairly good idea of the high moral ideals and the general outlook on life of the ancient Brahma-Vadins and the people from this

In the chapter on सुविचारमाधुकरी you have brought out a panorama of essence of Vedic Culture from the times of Holy Vedas to the comparatively recent times of Dhammapadas

This close resemblance of thought in the preachings of great masters in India will

remove prejudices and create a better and more intelligent understanding among the followers of the various sects And that is, in my opinion, a great need from the point of view of the evolution of Indian Nationalism at the present time

The book, if prescribed for general reading by the students going up for University Examinations, will certainly be a great help in popularising the study of Sanskrit among the students

Mahamahopadhyaya Dr P V Kane, Ex Vice Chancellor, Bombay University Bombay,—

. . प्रबन्धप्रकाशाख्यो ग्रन्थ मया दृष्ट । महान् सतोष
ंजात । भवद्भिर्भारतीयसस्कृते स्वरूप सम्यग् निदिष्टम् । देववाण्या
प्रवनति कथ जाता, अस्माभि कि च कर्तव्य तदपि सम्यक्तया प्रतिपा-
देतम् । आर्यधर्मस्य सदेश आशावादमूरीकरोति न तु नैराश्यमिति यद्भ-
द्भिरुद्घोषित तन्महान्त प्रमोद जनयति । गीर्वाणवाण्या व्यवहार
कथ सुकरो जायते तद्भवद्भिरनेन ग्रन्थेन सम्यक् प्रदशितम् । एवमेव
त्रभवद्भिर्दैव्या वाण्या पुरस्कार सदैव कृतो भवेदित्याशासे ।

'प्रबन्धप्रकाश' इत्याख्येन ग्रन्थेन बहूपकृतं तत्र-भवद्भिः ।

4 **The Hon ble Shri Shri Prakash Minister for Natural Resources and Scientific Research, Government of India, New Delhi** —

. मै आपको बधाई और धन्यवाद देता हूँ कि आपने इतनी उपयोगी पुस्तक लिखी। मुझे आशा है आपकी पुस्तक का अच्छा प्रचार होगा और इसके द्वारा समुचित ज्ञान का सचार होगा। .

4 **The Hon'ble Shri C D Deshmukh, Minister for Finance, Government of India, New Delhi** —

. .सुरवाणुपासकेष्वेकमात्मानं गणयतोऽनतिविदग्धस्यापि मे भवता प्रबन्धप्रकाशोऽनल्प प्रमोदमाततान। आशासेऽभ्यधिका यश प्राप्तिं भवता गीर्वाणवाणीसेवायाम् . .

6 **The Hon ble Shri N V Gadgil, Minister for Mines Works and Powers, Government of India, New Delhi** —

I have got the book and I am reading it as time permits However I am glad to state that *it is a unique book of its kind*

The Hon'ble Shri B G Kher, Chief Minister, Government of Bombay, Bombay —

प्राप्तो मया भवदीयप्रवचनसंग्रहात्मक सुविचारमाधुर्या समुपेत 'प्रबन्धप्रकाश' नामको ग्रन्थ । पठितानि च कतिपयानि प्रवचनानि । विशेषतो गीताजयन्तीमहोत्सवशुभावसरे आविष्कृतं भगवद्गीताया स्वरूप प्रत्यक्षीकृत्य सहर्षं समाधानमभून्मे मनसि । अत्यन्तमनुगृहीतोऽस्मि । तपस्तत्रभवता वर्धताम् ।

8 **The Hon'ble Shri K M Munshi, Minister for Food, Government of India, New Delhi —**

Many thanks for a copy of your latest Sanskrit book Prabandha-Prakasha Part II I have glanced through your book with interest

9 **The Hon'ble Dr Sampurnanand, Minister for Education and Labour, U P, Lucknow —**

मै आपकी पुस्तक 'प्रबन्धप्रकाश' (भाग २) को पढ गया । मुझे वह बहुत पसन्द आई । कही कही मतभेद हो सकता है, पर इससे पुस्तक की उपयोगिता मे कोई अन्तर नही आता । संस्कृत पढ़नेवालों को इस प्रकार की बहुत कम पुस्तके अब तक उपलब्ध रही है ।...

10 **Pandit Madho Sarup Vats, M A , Director General of Archaeology in India, New Delhi —**

I am extremely pleased to go through "Prabandha Prakasha" Part II *The book is thought provoking and a valuable contribution to modern Sanskrit literature* Your essays couched in faultless Sankrit and modern analytic diction successfully refute the false argument that Sanskrit is a 'Dead Language"

I find myself in full agreement with your views regarding the defects and shortcomings in the study of Sanskrit in Pathashalas by the old method, Essays like those under review should go a long way to remedy this defect

I am very much impressed by the "Samāvartana Satra-Paddhati", which revives the picture of Ancient Indian Civilisation in most brilliant colours

1 **Well-known Vedic Scholar Shri Pandit Brahma Datt Jijñāsu, Editor of "Veda Vāni", Banaras —**

.. संस्कृत भाषा के लेखन पर पूर्ण अधिकार करने की कला (विज्ञान) का प्रकाश 'प्रबन्ध-प्रकाश' ग्रन्थ के रूप मे भारतीय जनता समक्ष आया है। . मै अपने अनुभव के आधार पर कह सकता कि इस विषय पर मैने इससे अच्छी रचना अब तक नही देखी। . निश्चय ही यह लिखकर आचार्य मङ्गलदेवशास्त्री जी ने संस्कृत छात्रो का ी नही, अपितु भारत का महान् उपकार किया है।.... प्राचीन भारतीय संस्कृति, सभ्यता और साहित्य-संबन्धी बहुत ही ऊँचे, सामयिक तथा गम्भीर विचार अति सरलता से दिये गये है।.. ...संस्कृत विद्यालयो के छात्रो को ही नही, किन्तु अध्यापको को भी, 'प्रबन्ध-प्रकाश' द्वितीय भाग .. . अवश्य पढना चाहिये।

हम चाहते है कि यह ग्रन्थ भारत के सभी विश्वविद्यालयों मे संस्कृत भाषा पर अधिकार प्राप्ति के लिये प्रामाणिक माना जावे और पाठ्यग्रन्थो मे रखा जावे।

12. **Well known Art Critic Shri Rai Krishna Dasa, Editor, the Kalānidhi, Banaras —**

. .. आपकी पुस्तक 'प्रबन्धप्रकाश' (भाग २) को. ... अधिकाश देख गया हूँ। आपने सचमुच बहुत ही सुन्दर ग्रन्थ

प्रस्तुत किया है। मुझे उससे बहुत उच्चकोटि का (बौद्धिक) भोज्य प्राप्त हुआ।....

13 **Dr Babu Ram Saxena, M A, D Litt. Head of the Sanskrit Department, Allahabad University, Allahabad —**

डाक्टर मङ्गलदेव शास्त्री के प्रबन्ध-प्रकाश के प्रथम भाग से विद्-त्समाज तथा विद्यार्थीगण चिरकाल से लाभ उठा रहे थे। स स्कृत भाषा मे प्रबन्ध लेखन पर ऐसा उपादेय ग्रन्थ अभी भी दूसरा कोई नही है। डा० शास्त्री ने प्रबन्ध-प्रकाश का द्वितीय भाग प्रकाशित कर और भी उपकार किया है। ...ग्रन्थकार न केवल स स्कृतभापा और साहित्य के उच्चकोटि के विद्वान् है, अपितु शुद्ध राष्ट्रीय भावना से राष्ट्र-कल्याण के लिए सर्वदा मनन-शील रहते है।.. ..प्रस्तुत ग्रन्थ मे, अन्य महत्त्वपूर्ण विषयो के साथ साथ, संस्कृत भाषा, साहित्य तथा सस्कृतज्ञ का क्या स्थान वर्तमान स्वतन्त्र भारत मे होना चाहिए इस विषय का गम्भीर विवेचन है और अनेक ऐसे सुझाव है जिनसे राष्ट्र अग्रसर हो सकता है।

ग्रन्थ के अन्तिम भाग मे "सुविचार-माधुकरी" के नाम से स हिता, ब्राह्मण, उपनिषद् आदि प्राचीन भारतीय वाङ्मय से उद्धृत सुभाषित स गृहीत है जो बडे उपयोगी है। ....हमे विश्वास है कि प्रबन्ध प्रकाश के द्वितीय भाग का समुचित स्वागत और सम्मान होगा।

14 Dr Surya kanta, M A, D Litt (Punjab), D Phil, (Oxon), Officer D'Academie Francaise, Head of the Department, University Oriental College, Jullundur (E Punjab) —

प्रबन्धप्रकाश का द्वितीय भाग प्राप्त हुआ। धन्यवाद। वास्तव मे जैसा नाम वैसा गुण। पुस्तक के प्रबन्ध पढते ही बनते है। उनके भाव, उनकी भाषा, उनकी शैली आपके व्यक्तित्व से अनुस्यूत है, और प्रबन्धो की विविधता तथा सामयिकता ने पुस्तक मे जान डाल दी है। मै आशा करता हूँ कि सस्कृत के प्रेमी इसका आदर करेंगे। . .

15 Pandit Deva Datta Upadhyaya, Vyakarana-(Navya and Prachina) Acharya, Vedanta-Acharya, Mimansa Tirtha, etc, Professor of Darshana, Government Sanskrit College, Banaras —

. . .नाविदित . . विद्वदग्रेसराणा यत्परश्शतवर्षेभ्य.... . पर लघिमानमासादयन्त्येषा गीर्वाणवाणी ..कस्मैचित् प्राचीन-सस्कृतिसमुद्बोधकसुललितसरलसस्कृतनिबन्धग्रन्थरत्नाय चिराय समुत्कण्ठिता समासीत्। . सस्कृताध्येतृसमाजोऽपि पूर्वोक्ताय ग्रन्थरत्नाय नून चिरात् समुत्कण्ठित समासीदेव।.. . तदेतत्सर्व हृदि निधायैव . ...ग्रन्थकर्त्रा .प्रबन्धप्रकाशस्य द्वितीयभागोऽय प्रकाशित इति मन्ये।

. . . . .अस्मिन् ग्रन्थे हृदयग्राहिण्या तलस्पर्शिन्या सुललितसरलसंस्कृतशब्दावल्या भारतीयसस्कृतेरापोषका निबन्धास्तथा निहिता, यथानायासेनैव विदुषा.. ..शास्त्रीयसिद्धान्तामृतनि.ष्यन्दरस सुस्वादितो भवेत्। . निबन्धेषु पदे पदे लोकोक्तिसदृशवैदिकमन्त्रप्रतानोऽस्य ग्रन्थस्यातुल महिमानमातनोति। नान्यत्र एतादृशी विशिष्टा मनोहरा च शैली कापि दरीदृश्यते।

अन्यगभीरविषयै सहैव . 'सुविचारमाधुकरी' इत्याख्यो भागस्तु महता परिश्रमेण ग्रन्थकर्त्रा "घटे सागर इव" निहित ।

किञ्च . ...प्रगतिशीलभावनाना समुद्बोधनपरस्य, अद्यत्वे प्रायेणाहरहो जागरिताना . ..नानाविधसमस्याना समाधानपरस्य च कस्यचिद् ग्रन्थस्य देववाण्यामभावेन यत्तस्या दारिद्र्यमासीत् तद्दूरीकर्तुमेव इदप्रथमत्वेन निर्मितोऽयं ग्रन्थो विदुषा समादरभाजन भविष्यतीति नास्त्यत्र सन्देहलेश.।

सर्वत्र सस्कृतभाषाविज्ञैश्छात्रैर्विद्वद्भिश्च . ... स्वगृहे स्वावासे स्वाश्रमे च नून 'हस्तपुस्तक' रूपेण सस्थापनीयमनर्घमेतद् ग्रन्थरत्नम्। . .. .

16 Pt Lakshman Shastri Joshi, Tarka-tirtha, Editor in Chief "Dharma Kosha" and one of the Sanskrit Translators of the Indian Constitution, Wai (Dist Satara N) —

आपकी सस्कृत पुस्तक (प्रबन्धप्रकाश, भाग २) मिली, और पढ़ भी ली। पुस्तक बहुत अर्थगम्भीर विविध विषयो के विवेचन से भरी हुई है। परम्परा और प्रगतिशीलता का मधुर सङ्गमन इसमे मिलता है। ..

Other Select Opinions

on the

Prabandha-Prakasha

PART II

1 **Prof L Renou, Professor of Sanskrit, University of Paris, Paris** —

"I have received your excellent book in Sanskrit—Prabandha Prakasa, II, and admired your easy and elegant 'Riti' in Sanskrit The book is full of new ideas about Sanskrit education and learning It may be recommended to every University interested in the treasure of Old Traditions"

Prof K K Handiqui, M A, (Calc Et Oxon), Vice Chancellor, Gauhati University, Gauhati —

"I have read Dr Mangal Deva Shastri's Prabandha Prakasha Part II with considerable interest The book contains his learned and thoughtful Addresses on cultural topics and the problems of Sanskrit Education, primarily in relation to those who study it under the

orthodox system He deplores their aversion to modern studies and calls attention to the secular aspects of ancient Sanskrit learning He lays stress on the optimistic tone of Vedic literature and the will to strive and succeed which finds eloquent expression in some of the Vedic Texts In an instructive essay the author explains and illustrates the ethico-religious ideas in the *Aitareya Brāhmana*, a famous text of later Vedic literature The concluding section of the book contains a judicious selection of passages from Vedic and Classical Sanskrit texts which throw light on the ideals of ancient Indian culture The book will be read with pleasure and profit by all lovers of Sanskrit learning."

3. **Prof, Dharmendra Nath Shastri, Tarka Shiromani, M A, Head of the Sanskrit Department, Meerut College, Meerut, and Convener, Sanskrit Board of the Agra University —**

"The Prabandha Prakāśa Part II mainly comprises the addresses delivered by Dr Mangal Deva Shastri at the convocations of some National Universities and academies and at some cultural conferences These addresses mark an altogether a new style of Sanskrit Prose. Never before have I come across

modern ideas being expressed in chaste and idiomatic Sanskrit with such ease It shows how our classical language, in the hands of a master, is capable not only of expressing modern thoughts, but also imparting them a new vigour and richness What struck me most is the manner in which gems of old wisdom (in the form of pithy maxims) have been set off against the background of modern ideology. It is indeed a treat for Sanskrit Scholars to go through the pages of these thought-provoking addresses in Sanskrit The book will fulfil a long-felt need of Sanskrit Scholars of the post graduate classes of Indian Universities"

4 **Pandit Vagishwara Vidyalankara, Sahityacharya, Prof and Registrar, Gurukula University, Kangri, Hardwar (writes in the Gurukula Patrika of the Gurukula University, Kangri) —**

भारतीय वाङ्मय के क्षेत्र मे डाक्टर मगलदेव शास्त्री, एम० ए०, डी० फिल०, विद्यामार्त्तण्ड, का अध्ययन तो विशेष गभीरता, व्यापकता तथा सूक्ष्मता के लिये प्रसिद्ध है ही, किन्तु सरल और सरस सस्कृत भाषा मे नवीन विचारो को भी सफलता पूर्वक अभिव्यक्त करने की आपकी क्षमता अत्यन्त प्रशसनीय है। बहुत

समय से सस्कृत दैनिक व्यवहार की भाषा नहीं रही। अत. पाण्डित्य, प्रयत्न तथा अभ्यास के बल पर यद्यपि विद्वज्जन उसमे पर्याप्त सुन्दर रचना कर लेते है, तथापि उसमे स्वाभाविक प्रवाह का भङ्ग कही कही अवश्य खटक ही जाता है। डाक्टर शास्त्री इसके अपवाद है। आप अनेक वर्षो तक काशी के राजकीय सस्कृत महाविद्यालय के आचार्य तथा वहाँ की संस्कृत परीक्षाओ के रजिस्ट्रार रहे। उस समय आप सस्कृत के शिक्षकों तथा छात्रो के साथ सीधे सपर्क मे आये और आपने इस त्रुटि को विशेष रूप से अनुभव कर 'प्रबन्धप्रकाश' द्वारा इसका परिमार्जन करने का प्रयत्न किया। आपका प्रयत्न इस दिशा मे सर्वोत्तम है, यह पूर्ण विश्वास के साथ कहा जा सकता है।

प्रबन्धप्रकाश जिस शैली मे लिखा गया है वह सजीव तथा स्वाभाविक है। उसे पढते समय हमे यह प्रतीत नहीं होता कि अंग्रेजी या हिन्दी मुहावरों को सस्कृत का चोला पहना दिया गया है। निबन्ध लिखने के लिये आवश्यक विचारों का सग्रह, उन विचारो का क्रम से विन्यास, विकास तथा उपसहार, और विचारों को व्यक्त करने के लिये उपयुक्त शब्दों तथा उनके प्रयोग की कला को सीखने के लिये प्रबन्ध-प्रकाश अद्वितीय पुस्तक है। इसका अनुशीलन तथा इसकी शैली के अनुकरण का अभ्यास करके छात्र सफल लेखक बन सकते है। यही कारण है कि देश के सभी प्रधान विश्वविद्यालयों ने सस्कृत की उच्चतम परीक्षाओं के रचना-सम्बन्धी पत्र में इसे स्थान दिया हुआ है।

अभी डाक्टर शास्त्री ने इसका द्वितीय भाग भी प्रकाशित कर सस्कृत छात्रों का महान् उपकार किया है।

प्रबन्धप्रकाश के इस द्वितीय भाग मे डाक्टर शास्त्री द्वारा समय-समय पर विविध विश्वविद्यालयो मे दिये गये दीक्षान्त अभिभाषण आदि के अतिरिक्त ऐसे निबन्ध भी है जिनमे वेद, ब्राह्मण, उपनिषद्, रामायण, गीता आदि ग्रन्थों का समुद्रमथन कर निकाले गये बहुमूल्य रत्नो की माला है। इनमे प्राचीन साहित्य पर नूतन प्रकाश डाला गया है।

प्रबन्ध-प्रकाश के ये दोनों भाग सस्कृत साहित्य के उज्ज्वल रत्न है।..

५. प्रोफ़ेसर पद्मनारायण आचार्य, एम० ए०:—

प्रबन्धप्रकाश (भा० २) मे स स्कृत और स स्कृति के प्रेमियो के लिए बहुत कुछ है। प्रत्येक स स्कृतविद्यालय मे इसका स ग्रह किया जाय तो छात्रो को युग की चेतना का परिचय मिल जायगा। . सरल स ंस्कृत मे स्वस्थ विचार इस प्रकार रखे गए है कि पढ़नेवाले को चिंतन और मनोविनोद दोनो का लाभ होता है। इन निबन्धो को पढकर विश्वास हो जाता है कि स स्कृत भाषा अभी सजीव है और उसमे युगानुरूप विचार प्रकट करने की पूर्ण शक्ति है। . श्रुतिविमर्श और सुविचार-माधुकरी स्मरण रखने योग्य है। ... .प्रबन्धप्रकाश का प्रकाशन स स्कृत-भाषा-भाषियो तथा स स्कृत-प्रेमियो के लिए गौरव की बात है।

——

ग्रन्थकर्त्रा डा० मङ्गलदेवशास्त्रिणा प्रणीतानां

संपादितानां[1] वा ग्रन्थानां परिचयः—

(संस्कृते)

(१) **ऋग्वेदप्रातिशाख्यम्**, उवटाचार्यकृतभाष्येण सहितम्। प्रकाशकः—इंडियन प्रेस, लिमिटेड, इलाहाबाद।

(२,३) **प्रबन्धप्रकाशः** (भागद्वयात्मक)। प्रकाशकः—इंडियन प्रेस, लिमिटेड, इलाहाबाद।

(४) **न्यायसिद्धान्तमाला** (द्वौ भागौ)। प्रकाशक—गवर्नमेंट प्रेस, इलाहाबाद।

(५) **उपनिदानसूत्रम्** (सामवेदीयम्)। प्रकाशक—पूर्ववत्।

(६) **उपेन्द्रविज्ञानसूत्रम्** (वेदान्तः)। प्रकाशक—पूर्ववत्।

(७) **आश्वलायनश्रौतसूत्रम्** (सिद्धान्तिभाष्यसहितम्) (प्रथमो भाग.)। प्रकाशकः—पूर्ववत्।

१—वाराणसेय राजकीय स० महाविद्यालयस्याध्यक्षरूपेण ग्रन्थकर्त्रा सादितानामनेकेषा ग्रन्थाना नात्रोल्लेख. क्रियते।

(८) आर्यविद्यासुधाकरः। प्रकाशक :—मेसर्स मोतीलाल
ारसीदास, बुक्सेलर्स, चौक, बनारस।

(९) भारतीयसंविधानस्य (उत्तरार्धस्य) संस्कृतानुवादः।

प्रकाशक —

e Manager of Government Publications Delhi.

(इंग्लिशभाषायाम्)

(१०) ऋग्वेदप्रातिशाख्यम् English Translation,
ritical Notes, Appendices etc.। प्रकाशक :—मेसर्स
ोतीलाल बनारसीदास, बुक्सेलर्स, चौक, बनारस।

(११) Part of the Introduction to the
)ritical Edition of the ऋग्वेदप्रातिशाख्य, Oxford
Jniversity Press, Oxford (out of print)

(हिन्दीभाषायाम्)

(१२) भाषाविज्ञान (अथवा तुलनात्मक-भाषाशास्त्र),
चतुर्थसंस्करण, प्रकाशक—इंडियन प्रेस, लिमिटेड, इलाहाबाद।

(१३) भारतीय आर्यधर्म की प्रगतिशीलता (भारतीय
संस्कृति के विकास का विवेचनात्मक अध्ययन)। प्रकाशक—पूर्ववत्।

(१४) मिना (= प्रेम और प्रतिष्ठा का संघर्ष) ('मिना फन
बार्नहाल्म' नामक जर्मन नाटक का अनुवाद)। प्रकाशक—
हिन्दुस्तानी एकेडेमी, इलाहाबाद।

(१५) **वेदों का वास्तविक स्वरूप, अथवा—वेदों के महान् आदर्श।** प्राप्तिस्थान—मेसर्स मोतीलाल बनारसी दास, बुक्सेलर्स, चौक, बनारस।

(प्रकाशनार्थं प्रस्तुता ग्रन्था·)

(१) **शतपथब्राह्मणपर्यालोचनम्**

(२) **ऐतरेयपर्यालोचनम्**

(३) **ऐतरेयारण्यकपर्यालोचनम्**

(४) **वैदिकसूक्तसंग्रहः** (अनुवादेन, विविधटिप्पणीभिः परिशिष्टैश्च सहित)

(५) **ऋग्वेदप्रातिशाख्यम्** (उवटभाष्यसहितऋग्वेदप्रातिशाख्यसस्करणस्य बृहद्भूमिकादिसवलितः प्रथमो भाग.)

अन्ये चैवविधा ग्रन्था.।

——